Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रुद्रयामलम्

उत्तरतन्त्रम्

डॉ० सुधाकर मालवीय

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Q233:2394 8512
152N9.2
Malaviya, Sudhakar, ed
and tr.
Rudrayamalam

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

8512
Q233:2394
152N9.2
S.J.V.J. PRATISHTHAN
LIBRARY
Jangamawadimath, Varanasi

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

❁ ❁ ❁ ❁ ❁

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

॥ श्रीः ॥

व्रजजीवन प्राच्यभारती ग्रन्थमाला

८६

रुद्रयामलम्

(उत्तरतन्त्रम्)

(द्वितीयो भागः)

(४६ - ९० पटलात्मकः)

'सरला'-हिन्दीव्याख्योपेतम्

सम्पादक एवं व्याख्याकार

डॉ० सुधाकर मालवीय

एम. ए., पीएच्. डी., साहित्याचार्य,

संस्कृत-विभाग : कला-संकाय,

काशी हिन्दू विश्वविद्यालय, वाराणसी

LIBRARY

चौखम्बा संस्कृत प्रतिष्ठान

दिल्ली

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रकाशक

चौखम्बा संस्कृत प्रतिष्ठान

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

38 यू . ए . बंगलो रोड, जवाहरनगर

पो० बा० नं० 2113

दिल्ली 110007

फोन : 3956391

सर्वाधिकार सुरक्षित

प्रथम संस्करण 1999

(1-2 भाग सम्पूर्ण)

मूल्य { प्रथम भाग : 375.00
द्वितीय भाग : 375.00

अन्य प्राप्तिस्थान

चौखम्बा सुरभारती प्रकाशन

के० 37/117, गोपालमन्दिर लेन

पो० बा० नं० 1129, वाराणसी 221001

फोन : 335263
333371

SRI JAGAGURU VIDYARADHYA
JNANA SIMHASAN JNANAMANDAL
LIBRARY
Jangamwadi Math, Varanasi
ACC No. 9512

*

प्रधान वितरक

चौखम्बा विद्याभवन

चौक (बनारस स्टेट बैंक भवन के पीछे)

पो० बा० नं० 1069, वाराणसी 221001

फोन : 320404

कम्प्यूटर टाईपसेटर :
चित्तरञ्जन कम्प्यूटर वर्क्स, नई दिल्ली

मुद्रक :
महावीर प्रेस, वाराणसी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

The

BRAJAJIVAN PRACHYABHARATI GRANTHAMALA

86

RUDRAYĀMALAṂ

(UTTARATANTRAṂ)

PART TWO

(From 46 to 90 Paṭala)

WITH SARALĀ HINDI TRANSLATION

Edited & Translated

By

Dr. SUDHAKAR MALAVIYA

M. A., Ph. D. Sahityacarya

Department of Sanskrit : Arts Faculty,

Banaras Hindu University

Varanasi - 5

CHAUKHAMBA SANSKRIT PRATISHTHAN

DELHI

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Publishers :

© CHAUKHAMBA SANSKRIT PRATISHTHAN

(Oriental Publishers & Distributors)

38 U. A. Bungalow Road, Jawaharnagar

Post Box No. 2113

DELHI 110007

Telephone : 3956391

Q233:2394
152N9.2

First Edition

1999

Also can be had of

CHAUKHAMBA SURBHARATI PRAKASHAN

K. 37 / 177, Gopal Mandir Lane

Post Box No.1129

VARANASI 221001

Telephone : 335263

: 333371

S.J.V.J. PRATISHTHAN
LIBRARY
Jangamawadimath, Varanasi
Acc. No 438

Sole Distributors :

CHOWKHAMBA VIDYABHAWAN

CHOWK (Behind The Benares State Bank Building)

Post Box No. 1069

VARANASI 221001

Telephone : 320404

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रस्तावना

विद्यास्तावच्चतुर्दशसंख्याका[1] । तत्र आगमशास्त्रस्य धर्मशास्त्रे परिगणना कृताऽस्ति ।

आगमशास्त्रविवेचनम्

आगमशब्दः आ ग म इति त्रिभिरक्षरैर्निष्पन्नः। त्रीण्यपि आगमाक्षराण्युपादाय उक्तम्—

"आगतं शिववक्त्रेभ्यो गतं च गिरिजाश्रुतौ ।
मतं च वासुदेवेन (कार्तिकेयेन) तस्मादागम उच्यते" ।। इति ।

एवमागमः शिवपार्वत्योः शिवकार्त्तिकेययोर्वा संवादरूपः । पार्वती कार्तिकेयो वा प्रष्टा शिवश्च प्रतिवक्ता । परमशिवस्य चिद् आनन्द-इच्छा-ज्ञान-क्रियारूपा पञ्चशक्तयः सन्ति । इमा अन्तरङ्गाः शक्तय एव १. ईशान, २. तत्पुरुष, ३. सद्योजात, ४. वामदेव, ५. अघोर इति नामभिः प्रसिद्धाः । शिवस्य पञ्चमुखानि सन्ति । एभिरेव परमेश्वरस्तन्त्रं समुदपादयत् । एतेनेदमायातं यत् परमेश्वरस्य शक्तिरेव तन्त्रोत्पत्तेरुत्सवभूता । स्वच्छन्दतन्त्रे उक्तम्—

"गुरुशिष्यपदे स्थित्वा स्वयं देवो व्यवस्थिता ।
पूर्वोत्तरपदैर्वाक्यैस्तन्त्रं समवतारयत" ।। (स्व० त० ८।३१)
प्रष्ट्रो च प्रतिवक्त्री च स्वयं देवी व्यवस्थिता" । इत्यपि श्रूयते ।

आगम-निगम इति धाराद्वयी यद्यपि स्वतन्त्ररूपेण परस्परनिरपेक्षतया प्रसृजा अस्यां भारतभूमौ, तथापि ते परस्परपूरके । निगमः सिद्धान्तरूप आगमश्च तस्यैव सिद्धान्तस्य व्यवहाररूपः प्रक्रियारूपो वा । एतदेव मनसि निधाय सम्भवतो वाराहीतन्त्रम् आगमं वेदस्याङ्गभूतं स्वीकरोति । तथा चोक्तं तत्र—

"कल्पश्चतुर्विधः प्रोक्त आगमो डामरस्तथा ।
यामलश्च तथा तन्त्रं तस्य भेदाः पृथक् पृथक्" ।। इति । (वाराहीतन्त्रम्)

अत्र श्लोके आगमतन्त्रयोः पार्थक्यं परिलक्ष्यते । वस्तुतस्तन्त्रशास्त्रस्य क्षेत्रम् आगमशास्त्रस्य क्षेत्राद् विस्तृततरम् । समस्तो भौतिकीविस्तारः, आध्यात्मिकमनन्तं च विश्वं तन्त्रस्य

---

१. पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।। (याज्ञ. स्मृति १. ३)

तन्त्राणां धर्मशास्त्रेऽन्तर्भावः (वरिवस्यारहस्यप्रकाशः) । परमार्थतस्तु तन्त्राणां स्मृतित्वाविशेषेऽपि मन्त्रादिस्मृतीनां कर्मकाण्डशेषत्वं तन्त्राणां ब्रह्मकाण्डशेषत्वमिति सिद्धान्तात् ।

—भास्करराययप्रणीत सौभाग्यभास्कर (ललितासहस्रनामभाष्य), प्रथमशतकस्योपक्रमः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषया भवन्ति । तन्त्रशास्त्रस्य विशालता मालिनीविजयतन्त्रे प्रतिपादिता—

"सिद्धयोगीश्वरीतन्त्रं नवकोटिप्रविस्तरम्" । इति । (मा० वि० १।८)

विस्मृतिविनाशोपेक्षादिकारणवशात् तन्त्रशास्त्रसम्बद्धा केवलं नवलक्षश्लोका जगति प्राप्यन्ते । तत्र लक्षैकमात्रं भारतवर्षे प्रचलन्ति ।

अनाकलितेस्वीपूर्वादारभ्य त्रयोदशख्रीष्टाब्दपर्यन्तं तन्त्रशास्त्रं न केवलं भारते, अपि तु तिब्बत-चीन-थाईलैण्ड-मंगोलिया-कम्बोडिया-प्रभृतिदेशेषु प्रभावशालिरूपेण प्रचलदासीत् । तिब्बतभाषायां 'ऋग्युद्' इति नाम्ना प्रसिद्धं तन्त्रशास्त्रम् अष्टोत्तरसप्तति (७८) भागेषु तिब्बतदेशे प्राप्यते । तत्र चत्वारिंशदुत्तरषट्शताधिकद्विसहस्रं (२६४०) ग्रन्थाः सन्ति ।

आगमस्योद्भवस्थानविषये मतैक्यं नास्ति । केचिद् वङ्गदेशं केचिद् गौडदेशम् अस्योद्भवस्थानं मन्यन्ते । शैवागमस्योत्पत्तिर्मध्यदेशे जाता इत्यपि केषाञ्चिन्मतम् । बौद्धीयवज्रयानसाधनाया उत्पत्तेर्मुख्यं केन्द्रम् आन्ध्रप्रदेश आसीत् । एतेनेदमायातं यद् आगमस्य पृथक् पृथक् शाखानामुत्पत्तिस्थानानि पृथक् पृथगासन् ।

आगमशास्त्रे शक्तिशक्तिमतोर्भेदः—

शिवमुखोक्तेऽस्मिन् शास्त्रे शिवः परमं तत्त्वम् । अतएव स परमशिव इति कथ्यते । कौलाचार्या एवं विश्वमयं मन्यन्ते, तन्त्राचार्या विश्वोत्तीर्णम्; किन्तु त्रिकमतावलम्बिनां मते शिवो विश्वातीतो विश्वमयश्च युगपदेवास्ति । मात्रया अयं विश्वमयः शेषेण विश्वोत्तीर्णः । उक्तं च पुरुषसूक्ते—

"एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" ॥ (ऋ० १०. ९०. ३)

यथाऽचलप्रतिष्ठे समुद्रे क्वचिल्लघुतरङ्गाः क्वचिद् बृहदूर्मयः क्वचिच्छान्तिर्निश्चलता च सहैव परिलक्ष्यन्ते, एवमेव परमशिवेऽपि विश्वोत्तीर्णता विश्वमयता च सहैव वर्तेते । विश्वोत्तीर्णतादशायाम् इदं विश्वं परमशिवे मयूराण्डरसन्यायेनापरिस्फुट राजते शिवे । विश्वमयतादशायाम् इदं विश्वं तस्यैव परिस्फुटो विस्फारो भवति, अण्डादाविर्भूत-नानावर्णपुच्छादियुक्तमयूरशरीरवत् । विश्वोत्तीर्णतादशायां शिवः

"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्"

इत्युक्तिं चरितार्थयन् राजते । याऽस्य विश्वमयतादशा साऽस्यैव शक्तेः प्रसरः । पारमेश्वरी इयं शक्तिस्तस्य स्वातन्त्र्यरूपा स्वभावभूता । इयं शक्तिश्चिद्रूपा न तु जडा । मीमांसका वेदान्तिनश्चापि शक्तिं स्वीकुर्वन्ति; किन्तु तेषां मते शक्तिर्मायारूपा अनिर्वचनीया मिथ्या अस्ति । योगदर्शने चितिशक्तिरपरिणामिनी स्वीक्रियते । सा कूटस्थनित्या । संक्षेप-शारीरककारः सर्वज्ञात्ममुनिरमलां चितिशक्तिं स्वीकरोति । आगमशास्त्रे शक्तेः स्वरूपं नितान्तं भिन्नम् । प्रत्यभिज्ञाहृदये उक्तम्—

"चितिः स्वतन्त्रा विश्वसिद्धिहेतुः" । (प्र० हृ०, सू० १)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अस्याः शक्तेः परिणामो न भवति किन्तु प्रसारः सङ्कोचश्च सहैव भवतः । सूत्रे स्वतन्त्रशब्दो ब्रह्मवादिनां शक्तितावैलक्षण्यमाचक्षाणो माहेश्वर्यसारतां ब्रूते । चिद्रूपा शक्तिर्वेदान्ते सुप्ता गुप्ता वास्ति । इयं ब्रह्मण उपाधिः । तस्माद् इदं विश्वमैश्वर्यं वेदान्ते औपाधिक आगन्तुकः । आगमे चिच्छक्तिः स्वाभाविकी, न त्वौपाधिकी ।

इयं चितिर्देशकालादिभिरपरिच्छिन्ना अवच्छेदकविरहिता अखण्डा अस्ति । इयं स्वातन्त्र्यमयो बोधो बोधमयं स्वातन्त्र्यं वेति कथ्यते । यद्यपि शिवशक्त्योरभेद आगमे बहुधा प्रतिपादितः—

''न शिवः शक्तिरहितो न शक्तिर्व्यतिरेकिणी ।
शक्तिशक्तिमतोर्भेदः शैवे जातु न वर्ण्यते'' ।। इत्यादि ।

तथापि जागतिकदृष्ट्या अत्र शिवांशो निष्क्रियः साक्षी चास्ति, शक्त्यंशश्च सर्वदा पञ्चकृत्यकारी वर्तते । किन्तु उभयोरभेदस्वीकाराद् मन्यते यत् श्रीपरमशिवभट्टारक एवेत्थं नानावैचित्र्यसहस्रैः स्फुरति, शिवादि-धरण्यन्तम् अखिलमभेदेनैव स्फोरयति । तस्मादन्यद् न किञ्चिद् ग्राह्यं ग्राहकं वा ।

शिवः प्रकाशरूपः शक्तिश्चास्य विमर्शः । विमर्शस्यैवेदं फलं यत् पञ्चकृत्यं सर्वदा प्रचलदास्ते । इदं पञ्चकृत्यं सृष्टिः स्थितिः संहारो निग्रहोऽनुग्रहश्च । आदौ शिवः स्वस्वातन्त्र्येणात्मानं निगृह्णाति – गोपयति, पश्चात् स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति सृजति । ततः स्थितिं करोति अर्थाद् नानारूपेण ग्राह्यग्राहकभेदेन लीलाविलासं करोति । भगवता व्यासेनापि सूचितम्—

''लोकवत्तु लीलाकैवल्यम्'' । (ब्र० सू० २।१।३३) इति।

लीलावितानानन्तरमात्मनो रूपं संजिहीर्षुरात्मनोंऽशभूतान् मनुष्यान् दीक्षादिदानद्वाराऽनुगृह्णाति, अर्थात् तेषु पूर्णाहंभावमुत्पाद्य स्वात्मसात् करोति ।

कुण्डलिनीयोगे वाक्तत्त्वविमर्शः

उपर्युक्तेषु पञ्चकृत्येषु यदा स्वरूपगोपनानन्तरं संविच्छक्तिः सृष्टिं चिकीर्षति, तदा प्राणरूपेण परिणता भवति । उक्तञ्च—''प्राक् संवित् प्राणे परिणता'' इति ।

अस्यायं स्पष्टार्थः—शुद्धसंवित्स्वरूपः परमेश्वरः पूर्णः सन्नपि लीलाविलासाय स्वस्वातन्त्र्येण आत्मानमपूर्णमवभाषयिषुः स्वाविभक्तं विश्वं विभक्तवत् करोति । यदायं स्वे विश्वोत्तीर्णे रूपे विमर्शनं कृत्वा विविक्ताकाशरूपं धारयति, अर्थात् सर्वविधभावैर्विनिर्मुक्तः सन् अनावृतरूपेण स्वयं स्फुरति । इयमेव चैतन्यस्य शून्यरूपता । उक्तं च तैत्तिरीयोपनिषदि—''तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः'' इति (तै० उ० २।१)। अस्यां शून्याकाशस्वरूपायां संविदि संविच्छक्तिः स्वयं बिन्दुरूपेणात्मानं प्रकटयति—

इयं बिन्दुरूपा संविदेव महामाया कुण्डलिनीत्याद्यनेकैर्नामभिर्लोके व्यवह्रियते ।
इयमेव प्रथमं वाक्तत्त्वं परावाग् इति वा कथ्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतावद्वर्णनिनेदमायातं यत् परमेश्वर आत्मानं द्विधा असृजत्-एकं शब्दरूपेण वाग्रूपेण वा, अपरमाकाशरूपेणार्थरूपेण वा । एतत्त्ववश्यमेवावधेयं यत् तस्यामवस्थायामाकाशबिन्दू वा, वागर्थौ वा अत्यन्तमविविक्तरूपेण तिष्ठतः ।

चैतन्यशक्तिः संविच्छशक्तिर्वा आत्मानं शून्यरूपेण प्रकट्य पश्चाद् आत्मानं प्राणरूपेण परिणमयति उन्मीलयति वा । तदुक्तं स्वच्छन्दतन्त्रे—

वर्णाः शब्दात्मकाः सर्वे जगत्यस्मिन् चराचरे ।
स्थिताः पञ्चाशता ... ... ।
शब्दात् प्राणः समाख्यातः तस्माद् वर्णास्तु प्राणतः ।
उत्पद्यन्ते [१] लयं यान्ति यत्र शब्दो लयं गतः ॥
(स्व. तं. ४ । २४७–४८)

प्राणः संविच्छक्तेः किञ्चिच्चलनस्य स्पन्दस्य वा प्रथमः प्रसरः । व्यष्टिदेहे बुद्धेराविर्भावात् प्रागेव प्राणस्योल्लासः सञ्जायते । यतो ह्यन्तःकरणस्य सारभूता बुद्धिः प्राणमेवाश्रित्यात्मानं प्रकटयितुं समर्था भवति । अस्मिन् मानवशरीरे तिस्रो भूमयः—प्राणः, बुद्धिः, देहश्च । तत्र प्राणभूमावेकः स्वाभाविको धर्म उच्चार इति नाम्ना प्रसिद्धः । अयं प्राणस्य स्पन्दात्मक उच्चार एव देहं स्वायत्तीकृत्य तिष्ठति येनाचेतनोऽपि देहश्चेतन इव प्रतिभाति ।

अनाहतनादरहस्य विमर्शः —

अस्मात् प्राणात्मकादुच्चाराद् एकोऽव्यक्तध्वनिर्निरन्तरं स्फुरन्नास्ते । इयं द्वितीया पश्यन्ती वाक् । एनाम् अनाहतनादमपि कथयन्ति आगमविदः । अनाहतः, अर्थाद् आघातं विना उत्तिष्ठन् नादः अनाहतो नाद इति कथ्यते । शरीरे मूलाधार नामकमेकं चक्रं शरीरस्य मध्यभागे नाभिजननेन्द्रिययोर्मध्येऽस्ति। एतत् प्रथमायाः परावाचः स्थानम् । अनाहतनादात्मिका पश्यन्तीति नाम्ना प्रसिद्धा या द्वितीया वाक्, तस्याः स्थानं नाभिप्रदेशः । इयं पश्यन्ती वाक् प्राणिमात्रे स्वाभाविकरूपेण प्रचलति । नास्य कश्चित् कर्त्ता उत्प्रेरयिता वाऽस्ति ।

अकारादि–हकारान्ताः सर्वे वर्णा अस्यां पश्यन्त्यां वाच्यविभक्तरूपेण विद्यमाना भवन्ति । यतो हीयं वाग् वर्णोत्पत्तेर्निमित्तभूताऽस्ति । तस्मादियमपि वर्णपदवाच्या भवति, पूर्वमुक्तं यत् परावाचि वागर्थावविविक्तो तिष्ठतः । अस्यां द्वितीयायां पश्यन्त्यां वाच्यपि शब्दार्थयोरभिन्ना स्थितिर्भवति, यद्यपि आभ्यन्तरे भेदस्य स्फुरत्ता जाग्रियमाणा भवति । वाक्तत्त्वस्य परावस्था पूर्णतयाऽव्यक्ता, पश्यन्ती तस्य तत्त्वस्य किञ्चिद् व्यक्तावस्था । अत्र योगिनः साधका वा चैतन्यस्य स्फुरणं साक्षादनुभवन्ति । पश्यन्तीवाच इयमेवावस्था-आत्मसाक्षात्कारः, मन्त्रसिद्धिः, इष्टदर्शनमित्यादि । यथोक्तं बृहदारण्यके—

---

१. एवं ध्यात्वा षोडशारे स्थिरचेताः प्रपूजयेत् ।
वर्णरूपं शक्तियुतं लोकनाथं सदाशिवाम् ॥ (रुद्र० ६८. २१)
पूर्वा दिवामतो ध्यायेत् कामनाभयवर्जितः ।
गुप्तस्थाने ध्यानकार्यं यत्र विद्याः स्फुरन्ति ताः ॥ (रुद्र० ६८. २३)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"आत्मा वाऽरे द्रष्टव्यः" (बृ० उ० २।४।५),
"यत् साक्षाद् परोक्षाद् ब्रह्म" (बृ० उ० ३।४।१)।

छान्दोग्ये च— "य आत्मा अपहतपाप्मा विजरो विमृत्युः... सोऽन्वेष्टव्यः"

स विजिज्ञासितव्यः (छा० उ० ९।७।१)।

तृतीया वाग् मध्यमा इति नाम्ना आगमशास्त्रे प्रसिद्धा । अस्याः स्थानं हृदयम् । सृष्टिक्रमे परावाचः प्रारभ्य पश्यन्तीमतिक्रम्य यदा मध्यमा वाक् प्राप्यते, तदा अभेदस्य क्षरणं भवति, भेदश्च सूक्ष्मरूपेण परिस्फुरति । इयं मध्यमा वाक् प्रयत्ननिरपेक्षा सती स्वाभाविकरूपेण हृदये प्रवहति । मध्यमा वागेव मध्यनाड्या द्वारोद्घाटनस्य सूचिका । अस्यां वाचि भेदाभेदयोः साङ्कर्यं दृश्यते । विश्वं स्वतो भिन्नरूपेण प्रतीयमानमपि अभिन्नमिवाभाति । एनां प्राप्य योगिनो दृष्टिः क्रमशोऽन्तर्मुखी भवितुं प्रारभते, प्राणः, मनः सर्वं सूक्ष्मतामापन्नं भवति, फलतः योगिनः साधकस्य वा अविद्याच्छन्नो हृदयाकाशः निर्मलो भवन् आलोकितो भवति । कामक्रोधादयो दोषास्तेषां वासनाश्च मनसोऽपसरन्ति । अन्तराकाशस्य नैर्मल्येन सह हृदयसरोवरे स्थितं भावरूपं कमलं विकसितं भूत्वा ऊर्ध्वमुखं भवति । साधकः संसाराद् विरक्तिमनुभवति; किन्त्वस्यामवस्थायामपि नैरन्तर्येण ज्योतिषो दर्शनं न भवति तमोनिवृत्तिस्तु भवत्येव । यदा इयं वाग् हृदये दृढीभूता भवति तदाऽन्ये ध्वनयः क्षीणक्षीणतरा भवन्ति अव्यक्तशब्दाज्ज्योतिष आविर्भावश्च भवति ।

चतुर्थी वाग् वैखरीति नाम्ना प्रसिद्धा । अस्याः स्थानं कण्ठदेशोऽस्ति । विखरः स्थूलो देहस्तस्मिन् भवा जाता उत्पन्ना वा वाणी वैखरी । "वैखरी विश्वविग्रहा" इति कथितम् । निखिलमपि चराचरात्मकं विश्वं वैखरी वाच एव परिणामः प्रकाशो वा । वागिन्द्रियेण यस्या उच्चारणं भवति, श्रोत्रेन्द्रियेण च यस्याः श्रवणं भवति, सा वैखरी वाक् । इयमेव शब्दस्य स्थूलं रूपम् । जपकीर्त्तनादिषु जागतिके व्यवहारे वा वैखरी एव साधनरूपा। अस्याः प्रयोगे प्रयत्नस्यापेक्षा भवति । अत्र कर्तृत्वाभिमानः पूर्णरूपेण जागर्ति । इयं पूर्णतो भेदमयी । अत्र शब्दार्थयोः परस्परं भेदः स्पष्टरूपेण प्रतिभाति ।

पूर्वमुक्तं यद् निखिलमपि विश्वं चिच्छक्तेरेव विस्फारः । मालायां सूत्रमिवेयं चिच्छक्तिर्भेदाभेदमये विश्वेऽनुस्यूता । यदाभेदमयदृष्ट्या वयं पश्यामस्तदा शिवः शक्तिश्च परस्परं भिन्नौ तौ पुरुषस्त्रीरूपौ महालिङ्ग—महायोनिपदवाच्यौ भवतः । ताभ्यामेव स्वरव्यञ्जनात्मका वर्णा उत्पन्ना भवन्ति । शिवः स्वररूपः शक्तिश्च व्यञ्जनरूपा । अन्यप्रकारेण शिवो बीजरूपः शक्तिश्च योनिरूपा । यथा स्वरं विना व्यञ्जनं निष्क्रियं तथैव शिवं विना शक्तिरपि ।

अतएव व्यवहाराय सर्वत्र व्यञ्जने स्वरोऽनुस्यूतो भवति, यथा वा बीजं बिना योनिर्निष्प्रयोजना भवति, अत एव सृष्टिकार्याय बीजयोन्योः सम्मेलनं संघट्टो वा आवश्यको भवति, तथैव सर्वत्र भेदमय्या वैखरीवाण्याः परस्परं संघट्ट आवश्यकः । एतेनैव संघट्टेन व्यवहारश्चलति । उक्तञ्च मलिनीविजयतन्त्रे—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"... ... ... बीजं स्वरा मताः ।
कादिभिश्च स्मृता योनिः ... ... ॥
प्रतिवर्णविभेदेन शतार्द्धकिरणोज्ज्वला ।
बीजमन्त्रः शिवः शक्तिर्योनिरित्यभिधीयते' ॥ इति ।

परमेश्वर आत्मानं द्विधा सृजते—शब्दरूपेणार्थरूपेण च । शब्दरूपेण सृजन्नयं वर्णानां सृष्टिं करोति, अर्थरूपेण च तत्त्वानाम् । वर्णाः अकारादि—हकारान्ताः पञ्चाशत्संख्याकाः, तत्त्वान्यपि शिवादि—धरण्यन्तानि पञ्चाशत्संख्याकानि । वर्णानामियं मालिका परमेश्वरस्य परमेश्वर्या वा क्रियाशक्तेर्विजृम्भणम् । तदुक्तं मालिनीविजयवार्तिके—

अकारादिहकारान्तः प्रसरो यः प्रगीयते ।
क्रियाशक्तिविजृम्भेयं समस्ता वर्णमालिका ॥
(मा० वि०-वा० ३५५—५६)

उपरि वर्णिता मध्यमा वाक् तस्यैव परमेश्वरस्य ज्ञानशक्तेर्विजृम्भणम्, पश्यन्ती चेच्छाशक्तेरुल्लासः ।

अस्तु, आदि-हान्तानां पञ्चाशद्वर्णानां मध्ये एकैको वर्ण एकैकस्य तत्त्वस्य बीजभूतः। वर्णितं चैतद् विस्तरेण मालिनीविजयतन्त्रे, अन्येष्वागमग्रन्थेषु च ।

पारमेश्वरी इयं सृष्टिर्द्विधा—१. शुद्धा, २. मलिना च । शिवतत्त्वादारभ्य शुद्धविद्यापर्यन्तं तत्त्वं परमेश्वरः स्वयं सृजति । तस्यायं क्रमः—शिवः शक्तिः सदाशिव ईश्वरः शुद्धविद्या चेति पञ्च तत्त्वानि परमेश्वरसृष्टानि । तदनन्तरं परमेश्वरः स्वांशभूतमनन्तनाथनामकं देवमुत्पादयति । स अनन्तनाथो मायात आरभ्य पृथिवीपर्यन्तं पञ्चचत्वारिंशत् तत्त्वानि सृजति । तत्त्वित्थम् — पृथिव्यादि ५ + तेषां तन्मात्राः ५ + दशेन्द्रियाणि + मनः + अहङ्कारः + बुद्धिः + प्रकृतिः + पुरुषः+कलाविद्यादिसहिता माया ६ + शुद्धविद्या + ईश्वरः + सदाशिवः + शक्तिः + शिवः + कलाः पदानि मन्त्रा भुवनानि च १६, इत्येवं पञ्चाशत् ।

मातृकारहस्यम्

आदि—हान्तरूपेण परिस्फुटाया वैखर्या वाच आकारादारभ्य विसर्गपर्यन्तं स्वरात्मकं रूपं ककाराच्चारभ्य हकारपर्यन्तं व्यञ्जनात्मकं रूपं सर्वत्र प्रसिद्धम् । सर्वत्र सामान्यजनेष्वपि प्रसिद्धोऽयं क्रम आगमेषु 'मातृका' इति शब्देन व्यवह्रियते । स्वरव्यञ्जनयोरपरमपि रूपमुपलभ्यते । तत् 'मालिनी' इति पदेन व्यवह्रियते । अस्य रूपस्य प्रारम्भः 'न' कारेण भवति परिसमाप्तिश्च 'फ'कारेण । अवशिष्टा वर्णा अक्रमेण नियोजिता भवन्ति । तद्यथा— न ऋ ॠ ऌ ॡ थ च ध ई ..... इत्यादि ।

अनयोर्वर्णमालयोर्मातृका अक्षुब्धवर्णमाला मालिनी च क्षुब्धवर्णमाला कथ्यते । मातृकया शिवतत्त्वसमावेशो विलम्बेन भवति मालिन्या च शीघ्रं भवतीत्यनयोरुपयोगभेदः । इत्थमिदं स्पष्टं यद् वैखरीवाक्तत्त्वस्य किं स्वरूपं कश्च उपयोगः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सृष्टेरन्योऽपि क्रम योगिनीहृदयादितान्त्रिकग्रन्थेषूपलभ्यते । तत्र परापश्यन्त्यादिवाचां शान्ता अम्बिका (= परावाक्), वामा (= पश्यन्ती), ज्येष्ठा (मध्यमा), रौद्री (=वैखरी) इति नामभिर्वर्णनमस्ति ।

योगिनीहृदये वर्णितमस्ति – यद् यदा आद्याशक्तिर्विश्वमयरूपमाधातुमिच्छति, तदा तस्यां स्पन्दनं जायते । तस्य स्पन्दनस्य स्फुरताया वा प्रथमः परिणामः 'श्रीचक्रम्' अस्ति । अस्मिन् चक्रे पञ्चमहाभूतादितत्त्वानां प्रतीकरूपास्तत्तद्वर्णाः कल्पिताः ।

न्यासरहस्यम्

प्रश्नः समायाति—वैखरी वाग् या प्रत्यक्षा विश्वविग्रहा विश्वव्यवहारहेतुश्च दृश्यते, तस्या जागतिकव्यवहार एवोपयोगः किम् ? अन्यत्रापि वा ?

अत्र उच्यते—वैखरीवर्णमालाया मुख्योपयोगः साधनक्रियायामस्ति । शास्त्रेषु उक्तम्—''देवो भूत्वा देवं यजेत'' इति । इदं शरीरं शश्वदशुद्धम् । यथोक्तं पतञ्जलिना योगसूत्रभाष्ये—

''स्थानाद् बीजादुपष्टम्भान्निःस्यन्दान्निधनादपि ।
कायमाधेयशौचत्वात् पण्डिता ह्यशुचि विदुः'' ॥

अन्यच्च कुलार्णवतन्त्रे —

''जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् ।
मनो दग्धं परस्त्रीभिः कथं सिद्धिः वरानने' ॥ इति
(कुलार्णवतन्त्रे १५। ७३)

अतो हेतोः अस्मिन्नशुद्धे शरीरे शुद्धता कथमाधेया ? इति प्रश्नः विचार्यः । उत्तरमस्ति–न्यासद्वारा शरीरे शुद्धिं देवत्वाधानं च क्रियते । वर्णमालिकायास्तत्तद्वर्णास्तत्तद् देवानां दिव्यशक्तीनां वा बीजभूताः । यथा—

ऐं इति सरस्वतीदेवतायाः, श्री इति महालक्ष्म्याः, क्रीं इति महाकाल्याबीजभूतो वर्णः। पूजाकाले तत्तदङ्गे बीजाक्षराणां न्यासेन तत्तद् दिव्यशक्तीनामाधानं भवति । यथा— 'ऐं अङ्गुष्ठाभ्यां नमः' इत्यङ्गुष्ठयोः सरस्वतीशक्तेराधानम् ।

शास्त्रेषूक्तं यद् दिव्यन्याससम्पन्नपुरुषो यदि हस्तेन गजं ताडयेद् गजो मृतो जायते । स्थूलतमा वृक्षा पादाघातमात्रेण धराशायिनो भवन्ति ।

अन्यच्च साधकानां कृते दीक्षा आवश्यकविधिः । गुरुर्दीक्षया शिष्यं साधनायोग्यं करोति । सा दीक्षा मन्त्रद्वारा दीयते । मन्त्रा वर्णमयाः । स्तुतौ वर्णा वर्णमयानि च पदानि प्रयुज्यन्त इति वैखरीवर्णानां सार्थक्यम् । देवानां पूजायापि वैखरीवर्णानामुपयोगो भवति । तत्त्वितथम्–देवानां पूजा पञ्चोपचारैः (गन्धपुष्पधूपदीपनैवेद्यैः) क्रियते । क्वचित् कदाचिद् गन्धादिपदार्था नोपलभ्यन्ते चेत् पूजा कथं विधेया इति समस्यायाः समाधानं वर्णा एव भवन्ति । लं इति पृथिवी तत्त्वस्य बीजाक्षरम्, वं इति जलस्य, यं इति वायोः, रं इति वह्नेः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हं आकाशस्य शक्यते । स्थूलवैखरीवाक्तत्त्वस्य स्थूलोपयोग उपरि दर्शितः, किन्त्वेतस्य वास्तविक उपयोगोऽस्ति पूर्णाहन्त्वप्राप्तिः । अकारोऽनुत्तरस्य परमशिवस्य वाचकः, हकारो विसर्गश्च शक्तितत्त्वस्य वाचकाविति अ–हवर्णाभ्यां शिवशक्ती निरूप्येते । शिवांशात् शक्त्यंशाद् वा पृथग्भूतस्य जीवस्य इदमेव लक्ष्यं यत् पुनस्तत्रैव शिवे शक्तौ वा समाविष्टः स्यात् यतो हि शिवत्वलाभं बिना दुःखस्यात्यन्तिकैकान्तिकनिवृत्तिः परमानन्दलाभश्च न सम्भवति । एतत्प्राप्त्यै वाक्तत्त्वस्योपयोगः । आगमेषु सर्वत्र साधनायाः प्राधान्यं वर्णितम्। तत्र बाह्यवर्णानामुपयोगः जपयोगः सुरतयोगो वा स्यात्, इष्टदेवताया नाम्नस्तत्सम्बन्धिमन्त्रस्य वा जपः सुकरोपायः । अतः साधना प्रारम्भाय वाक्तत्त्वस्य आवश्यकता ।

षट्चक्रभेदे — मातृकारहस्यम्

सर्वत्र आगमे षट्चक्रभेदो वर्ण्यते । कुण्डलिनीजागरणं षट्चक्रभेदश्च पूर्णाहन्तावाप्तये द्वारभूते । मन्त्रस्य जपः कुण्डलिनीबोधे सहायकः । षट्चक्राणां क्रमस्त्वित्थम्-अस्मिन् पिण्डदेहे पञ्चमहाभूतानि पृथिव्यादीनि तत्तत्स्थाने स्थितानि । यथा मूलाधारे पृथ्वीतत्त्वम्, नाभेः पार्श्वे जलतत्त्वम्, हृदयसमीपं अग्नि तत्त्वम्, कण्ठादधो वायुः, शिरसि आकाशः । एतानि पञ्चतत्त्वान्यभिलक्ष्य पञ्च चक्राणि कल्पितानि आगमविद्भिः । तानि तु क्रमेण– मूलाधार–स्वाधिष्ठान–मणिपूर–अनाहत–शाकिनी–नामभिर्व्यवह्रियन्ते ।

एतदतिरिक्तमाज्ञाचक्रस्य सहस्रारस्यापि सत्ता स्वीक्रियते । तत्र मूलाधारादारभ्य आज्ञाचक्रपर्यन्तं क्रमशश्चतुर्दल-षड्दल-दशदल-द्वादशदल-षोडशदल-द्विदलकमलानि सन्ति । वस्तुतं इमानि कमलानि न सन्ति;, किन्तु अकारादिहकारान्तैः पञ्चाशद्वर्णै रचितानि विशिष्टप्रकारकाणि यन्त्राणि सन्ति । एते वर्णा पृथक्-पृथक् स्थित्वा परस्परसहयोगेन नाना-विधान् विकल्पान् सृजन्ति । एभिर्विकल्पैः कामक्रोधलोभादिवृत्तयोऽनुप्राणिता भवन्ति ।

साधकस्य इदमेव लक्ष्यं यद् वैखरीवाण्या इमान् वर्णान् विगलितान् कृत्वा मध्यमायां नादाभासरूपे परिणमयेत् । तदनन्तरं पश्यन्त्यां विशुद्धनादमयज्योतीरूपे परिवर्त्तयेत् । पश्यन्त्याः परावाचं प्राप्य यदा शब्दब्रह्मणो भेदो भवति, तदा परमायाः सिद्धेरुदयो भवति । पूर्णाहन्तायाश्च प्राप्तिर्भवति । जीवस्य सहस्रारे गतिर्वस्तुतो जीवांशस्यैव परमशिवाभिमुखं गतिरस्ति । वैखरी-मध्यमा-पश्यन्ती-वाच एव परावाग्रूपे परिणता महाप्रकाशं परमशिवत्वं प्रापयन्ति । तदा देहात्माभिमानोऽपसृतो भवति, अप्राकृत स्वरूपे च जीवस्य स्थितिर्भवति । एनामवस्थामुपलभ्य उत्तीर्यैव वा यथार्थोपासना प्रारभते । अत एवोक्तं–

"नाशिवस्य शिवोपास्तिर्घटते कल्पकोटिभिः" इति ।

एवं यदि शिवस्य उपासना कर्त्तव्याऽस्ति तर्ह्यादौ जीवेन मनुष्येण वा शिवत्व-स्योपलब्धिः कर्त्तव्या । तदनन्तरमेव शिवस्योपासना वास्तविकी भवति । जीवदशायां शिवोपासना वास्तवी उपासना नास्तीति विवेकः ।[१]

---

१. द्रष्टव्यः—'आगमशास्त्रं तत्र वाक्तत्त्वञ्च' । डॉ० राधेश्याम चतुर्वेदी महोदयस्य निबन्धः ।—सरस्वतीसुषमायाः ४९ वर्ष ३–४ अङ्क ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुण्डलिनीयोगे पंचमकाररहस्यम्

अस्ति कौलमार्गस्य परम्पराऽतीव पुरातनी । बहुविध-दार्शनिक-सम्प्रदाय-सङ्कुले ज्ञान-संसारे कौलदर्शनस्य विशिष्टं महत्त्वं विद्यते । इदमस्ति योगशास्त्रस्य पूरक किन्तु कौलदर्शनस्य सिद्धान्तानां रहस्यं योगिनामपि दुर्ज्ञेयं वर्तते ।

आदौ कौलदर्शनस्य ज्ञानधारा आध्यात्मिके सांस्कृतिके च क्षेत्रे क्रान्तिकरं प्रवर्तनं परिवर्तनं चाकरोत्, किन्तु पश्चाद्वर्तिनि कालेऽल्पज्ञा ज्ञानलवदुर्विदग्धा जना एतस्य सिद्धान्तानां रहस्यं ज्ञातुमशक्ताः सन्तः स्वेच्छया वामार्थकारिणो बभूवुः । तस्मादेव कारणात् कौलाचारपरम्परा वामाचारस्वेच्छाचारादिनामभिर्विनिन्दिता लोके समजायत ।

अस्मिन् कौलमार्गे कुमारीपूजनं, प्रमदा पूजनं, चक्रार्चनं, पञ्चमकाराचरणं च गूढरहस्यमयं प्रतीकात्मकं कृत्यं वर्तते । विद्वांसोऽपि एषां गूढतत्त्वं न विदन्ति, प्राकृतपुरुषाणां तु का वार्ता । केचित् धूर्ताः पाखण्डिनश्च पुरुषा एषां शब्दानां बाह्यवस्तुपरकमनुचितमर्थं गृहीत्वा महतीमनर्थपरम्परां जनयामासुः । कौलमार्गस्य पूततमा अपि सिद्धान्ता एभिः कामलोलुपैर्वासनालुब्धैर्जनैः कुत्सिता भोगार्थपरकाश्च कृताः ।

कौलो धर्मः परमगहनो वर्तते। एष धर्मो नाजितेन्द्रियेभ्यो नायतेभ्यो नचाश्रद्दधानेभ्यश्च कदाचिदपि देयः। पूर्णप्रज्ञा वशीकृतात्मानो जितसर्वदोषा व्यवस्थितचित्ता एव पुरुषाः सन्ति कौलाचारस्याधिकारिणः। इमं तत्त्वमेव मनसि निधाय कौलावलीनिर्णयकारो महता गर्वेण ब्रूते

'कौलो धर्मः परमगहनो योगिनामप्यगम्यः ॥'

विदां वरिष्ठो जयरथस्तु कौलधर्मं वेदादपि गरीयान्सं मन्यते—

वेदादिभ्यः परं शैवं शैवाद् वामं च दक्षिणम् ।
दक्षिणाच्च परं कौल कौलात् परतरं नहि ॥ (तन्त्रालोके)

कौलाचारविषये महत्यो भ्रान्तधारणा लोके प्रचलिताः। तन्त्राचारादनभिज्ञानां सुशिक्षितानामपि पुरुषाणां मनस्सु एषाऽवास्तविकी धारणा बद्धमूला विद्यते यत् कौलधर्मे कुत्सिता घृणास्पदाश्च कृत्यविधयोऽङ्गीकृताः । एतस्या अहेलनाया मुख्यं कारणं कौलाचारस्यापर्याप्तं ज्ञानमेव विद्यते । कौलस्य परिभाषा स्वच्छन्दतन्त्रे कृता—

कुलं शक्तिरिति प्रोक्तमकुलं शिव उच्यते ।
कुलेऽकुलस्य सम्बन्धः कौलमित्यभिधीयते ॥

कुण्डलिनीरूपा शक्तिः कुलमिति कथ्यते । शिवतत्त्वमकुलमिति प्रोच्यते तन्त्रशास्त्रेषु। यो योगसाधकोऽभ्यासबलेन जागरितां कुण्डलिनीमभ्युत्थाप्य सहस्रारकमलरूपे ब्रह्मरन्ध्रे स्थितेन शिवतत्त्वेन सह तां युनक्ति स एव कौलो वर्तते ।

कौलस्य व्याख्या विशदतरं प्रस्तुता चूड़ामणितन्त्रे—

कर्दमे चन्दनेऽभिन्नं पुत्रे शत्रौ तथा प्रिये ।
श्मशाने भवने देवि तथैव काञ्चने तृणे ।
न भेदो यस्य देवेशि स कौलः परिकीर्तितः ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नात्र वामाचारो न च स्वेच्छाचारः कुत्रापि । दुर्बोध्यत्वात् रहस्यमयत्वाच्च कौलः पन्था वामाचारपदेनोच्चार्यते ।

अत्र संक्षेपेण पञ्चमकाराणां व्याख्या दिङ्मात्रं विधीयते । पञ्चतत्त्वसाधन-मताव-महत्त्वमादधाति कौलाचारपद्धतौ । इमानि पञ्चतत्त्वानि सन्ति—

१. मद्यं, २. मांसं, ३. मीनं, ४. मुद्रा, ५. मैथुनं च । इमे पञ्चमकारसंज्ञयोच्यन्ते ।

एते मद्यादयः शब्दा आभ्यन्तरोपासना विधीनां सूचकाः । सङ्केतेनैव सूचयन्ति ते योगप्रक्रियाम् । कौलाचारविधिः प्रयत्नेन गोप्या सुधीभिः । गोपनकारणादेव ऋषिभिस्ता योगविधयः प्रतीकशब्दैरभिहिता । एषां शब्दानां यो बाह्यवस्तुपरमर्थं गृह्णाति सोऽस्ति महान् मूढः । तेन तु तन्त्रशास्त्रस्य स्पर्शोऽपि न कृतः ।

१. मद्यम्—मद्यस्यार्थो द्राक्षागोधूमादिभिर्द्रव्यैर्निर्मिता मदकारिणी मदिरा नास्ति, किन्तु ब्रह्मरन्ध्रे विकसितात् सहस्रदलकमलात् क्षरिता आनन्दात्मिका सुधैव मद्यमित्यभिधीयते कौल-शास्त्रे । इयं सुधा खेचरीमुद्रया सिद्धयोगिभिः पीयते । जिह्वां लम्बीकृत्य तां कण्ठकूपमुखे स्थापयति साधकः सैव खेचरीमुद्रा कथ्यते । खे आकाशे ब्रह्मरन्ध्रे चरति योगी अनया मुद्रया तस्मादियं चरीतीति खे भण्यते । गन्धर्वतन्त्रे कथितम्—

व्योमपंकजनिःस्यन्द – सुधापानरतो नरः ।
मधुपायी समः प्रोक्तस्त्वितरेमद्यपायिनः ॥
जिह्वया गल–संयोगात् पिबेत् तदमृतं तदा ।
योगिभिः पीयते तत्तु न मद्यं गौडपैष्टिकम् ॥

२. मांसम्—वामाचारे पशुपक्षिनरादीनां मांसस्य भक्षणं सर्वथा निषिद्धम् । अस्माकं देहे मनसि च पुण्यापुण्य–रूपौ द्वौ पशू नित्यं वसतः । पुण्यापुण्यौ सुखदुःखफलके स्तः । पुण्यापुण्यानां फलभोगार्थमेव जीवात्मा देहं धारयति । देहधारणं सुख दुःख–संभिन्नम् । अतः पुण्यापुण्यौ अनिशमनर्थ परम्परामेव जनयतः । तस्मादुभे त्याज्ये । पुण्यापुण्य पशू निहत्य यो योगी नित्यं निष्कामकर्मयोगे तिष्ठन् सङ्गं त्यक्त्वा चरति लोके स एव मांसाहारी निगद्यते कौलाचारे । कथितं तु कुलार्णवतन्त्रे—

पुण्यापुण्ये पशू हत्त्वा ज्ञानखड्गेन योगवित् ।
परे लयं नयेच्चित्तं मांसाशी स निगद्यते ॥

३. मीनम्—आगमसारे प्रतिपादितम्—

गङ्गायमुनयोर्मध्ये द्वौ मत्स्यौ चरतः सदा ।
तौ मत्स्यौ भक्षयेद् यस्तु स भवेन्मत्स्यसाधकः ॥

गंगायमुने इडापिंगले द्वे नाडीनद्यौ । तयोर्नद्योर्मध्ये श्वासप्रश्वासनामकौ द्वौ मत्स्यौ सदैव भ्रमतः । यः साधकः प्राणायामबलेन तौ प्रगृह्य कुम्भकेन सहस्रार-पुण्डरीके स्थापयति, स एव वस्तुतो मीनभक्षी ।

४. मुद्रा—बन्धनमवरोधो वा मुद्रेत्युच्यते । लोकेऽङ्गुलीयकमपि मुद्रेति व्यवह्रियते। वामाचारे तु सत्सङ्गेनासत्सङ्गनिवृत्तिर्मुद्रेति भाण्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विजयतन्त्रे मुद्राया लक्षणमित्थं प्रतिपादितम् –

सत्सङ्गेन भवेन्मुक्तिरसत्सङ्गेन बन्धनम् ।
असत्सङ्गमुद्रणं यत्तु तन्मुद्रा परिकीर्तिता ॥

५. मैथुनम्—मैथुनं संयोगः । शिवेन सह शक्त्याः प्राणैश्च सुषुम्नायाः संयोगो परमात्मानञ्च यो न पश्यति, परस्त्रीषु यो नित्यं क्लीवः, परनिन्दायां यो वाग्विहीनः, सर्वदा च यो जितेन्द्रियः स एव ब्रह्मनिष्ठो ब्राह्मणोऽत्र वामाचारेऽधिक्रियते । तदेव प्रतिपादितं तन्त्रशास्त्रे— परद्रव्येषु योऽन्धश्च परस्त्रीषु नपुंसकः ।
परापवादे यो मूकः सर्वदा विजितेन्द्रियः ।
तस्यैव ब्रह्मणस्यात्र वामे स्यादधिकारिता ॥

जिज्ञासा मनस्युत्पद्यते यत् यदि मद्यादीनां शब्दानामर्थो विद्यते इयानुदात्तस्तत्किमर्थं तत्कृते लोकार्थसूचकाः शब्दा निर्धारिताः ? कथन्न सोऽर्थोऽभिधायकैः शब्दैः प्रतिपादितः । कस्मात् प्रतीकात्मका एव शब्दाः स्वीकृता आचार्यैः, येन भौतिकार्थ भ्रान्तिर्लोकेषु जाता ?

समाधीयते, तान्त्रिकाचारो वर्तते महान् गोपनीयः । अनधिकारिणी मैनं स्पृशेयुः, तस्मात् तेभ्योऽनधिकारिभ्यो गोपनार्थमेव प्रतीकात्मकाः शब्दास्तन्त्रेषु स्वीकृताः । भगवान् शिवोऽभिदधाति पार्वतीम्— गोपनीयं प्रयत्नेन स्वयोनिवच्च पार्वति ।

मैथुनमिति कथ्यते वामाचारे। सहस्रारपुण्डरीके ब्रह्मरन्ध्रे शिवतत्त्वं स्थितम्, कुण्डलिन्या च शक्तिः प्रतिष्ठिता । तयोः संयोगः प्राण–सुषुम्नयोः संयोगे सत्येव सम्भवति, नान्यथा । स्त्रीसंयोगेन वीर्यपाते कृते सति य आनन्दो जायते तस्य सहस्रकृत्व आनन्दः प्राणसुषुम्नयोः संयोगादनुभूयते साधकेन । विजयतन्त्रे कथितम्—

इडापिङ्गलयोः प्राणान् सुषुम्नायां प्रवर्तयेत् ।
सुषुम्ना शक्तिरुद्दिष्टा जीवोऽयं तु परः शिवः ।
तयोस्तु समे देवैः सुरतं नाम कीर्तितम् ॥

उक्तं तु रुद्रयामले–

अथान्तः पञ्चमकारयजनं शृणु शङ्कर ॥
अन्तर्यजनकाले तु दृढभावेन भावयेत् ।
त्वां मां नाथैकतां ध्यात्वा दिवारात्र्यैकतां यथा ॥
सुराशक्तिः शिवो मांसं तद्भक्तो भैरवः स्वयम् ।
तयोरैक्यसमुत्पन्न आनन्दो मोक्षनिर्णयः ॥
आनन्दं ब्रह्मकिरणं देहमध्ये व्यवस्थितम् ।
तदभिव्यञ्जकैर्द्रव्यैः कुर्याद् ब्रह्मादितर्पणम् ॥
आनन्दं जगतां सारं ब्रह्मरूपं तनुस्थितम् ।
तदभिव्यञ्जकं द्रव्यं योगिभिस्तैः प्रपूजयेत् ॥ (रुद्र० १३०–१३४)

इदं पञ्चतत्त्वसाधनं कौलाचारस्य महत्त्वपूर्णप्रतिपाद्योम् । अस्य वास्तविकमुदात्तं स्वरूपं कालकरालप्रवाहे क्वापि विलिलाय ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्विविधाः कौलाः

तन्त्रशास्त्रेषु द्विविधाः कौला उल्लिखिताः प्राप्यन्ते पूर्वकौला उत्तरकौलाश्च । पूर्वकौला एव कौलाचारस्य सुधियः प्रमातार आसन् । उत्तरकौलाः पञ्चमकाराणां बाह्यविषयपरकमर्थं गृहीत्वा वामाचारपरम्परां कुत्सितामकुर्वन् । कौलमार्गस्याचारसंहिता तु साकल्येन वैदिकी विद्यते । परद्रव्यापहरणं परस्त्रीगमनं परपीडनं चात्र महापातकं संज्ञितम् । रहस्यं तु तन्त्र-शास्त्रस्य जीवनम् । पाखण्डिनो दम्भिनो लम्पटाश्च मैनं ज्ञातुं शक्यते । यतो हि ते दुरुपयोगं कर्तुमस्य शक्नुवन्ति, तस्मादस्य गोपनं परमावश्यकम् । विद्याऽयतेभ्यो गोपनादेव वीर्यवती भवति ।

'असूयकायानृजवेऽयताय मा दा वीर्यवती तथा स्याम्'

इति विद्या स्वयमेवाभिदधाति ।

मन्त्रग्रहणविधिः

यथा कस्यचित् 'देवदत्त' इति नामास्ति तस्य को मन्त्र इष्टः स्यादिति विचारे नामादिवर्णः = द, कालीभुवनेश्वरीतारामहालक्ष्मीसरस्वतीमन्त्राणां क्रमेण मन्त्रादिवर्णाः = क, ह, स, श, ए। एभिः सह दकारस्य विचारः। तत्रादौ–

१. कुलाकुलचक्रं विलोकनीयम् । तत्र दकारः पृथ्वीतत्त्वे वर्तते। तस्य ककारः = वायुतत्वं न हितम् । हकारः आकाशतत्त्वं समम् । सकारः = जलतत्त्वात्मकं मित्रम् । शकारः = आकाशतत्वं समम् ।। एकारोऽग्नितत्त्वं शत्रुः ।

अतः

द	क	ह	स	श	ए
	अ	स	मि	स	श

अस्माच्चक्रात् सर्वापेक्षया तारामन्त्रः शुभः सिद्धः।

२. अथ राशिचक्रे दकारो मकरराशौ, ततः ककारगतकोष्ठसंख्या = १०, हकोष्ठ संख्या = ९, स संख्या = ९, श = ९, ए = ७। अत्र सर्वे मन्त्राः शुभा एव। अत्र ४। ८। १२ एते त्याज्याः । शेषाणि शुभानि । यात्रायां चन्द्रविचारवत् । रिपुवेदाष्टभानुषु' इत्युक्तिरपि तत्र प्रमाणम् ।

३. अथ ताराचक्रे दकारोऽनुराधानक्षत्रम् । ततः क, ह, श, स, वर्णगतकोष्ठानि गणयित्वा नवभिर्भक्त्वा तारामानचक्रम् अत्र सर्वोत्तमौ शकारैकारौ

द	क	ह	श	स	ए
०	१	१	१	१	८

कहसा मध्यमाः । यात्रायां ताराविचारवत् ३। ५। ७ एता अशुभाः १ = मध्यमाः। २। ४। ६। ८। ९ उत्तमा ज्ञेयाः । अत्रैव गणचक्रमपि विचारणीयम् । यथा द = देवः, क = देवः । हः = नरः, श = नरः । स = नरः । अत्र दकारस्य ककारः सर्वोत्तमः । ह स शा उत्तमाः । इति

४. अथ अकडमचक्रे विचारः—द कोष्ठाद्गणिताः क, श, ह, साः क्रमेण क = ८। श = १। ह = ४। स = ३। ए = ३। अत्र 'त्यजेच्छत्रुं मृतिं व्ययम्' इत्युक्त्या ककारो न शुभः । शेषाः शुभाः । अत्र गणना विलोमतो बोध्या । यथा मेषान्मीनं, मीनात्कुम्भं कुम्भा-न्मकरमेवं ज्ञेयम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

५. अथ अकथहचक्रे विचारः—अत्र चत्वारि, चतुष्कानि, तत्रापि चत्वारि चत्वारि कोष्ठानि सन्ति । यथा प्रथमम् १, २, ३, ४ एभिश्चतुर्भिरङ्कितं प्रथमकोष्ठम् । ५। ६। ७। ८ एभिरङ्कितं द्वितीयकोष्ठम् । ९। १०। ११। १२ एभिरङ्कितं तृतीयम् । १३। १४। १५। १६ एभिरङ्कितं चतुर्थकोष्ठम् । तत्र प्रत्येककोष्ठे चत्वारि कोष्ठानि स्पष्टतया दृश्यन्ते । अत्र यावत् यस्मिन् चतुष्के नामादिवर्णः पतितस्तस्मान्मन्त्रादिवर्णकोष्ठं यावद्गणनीयम् । अर्थान्नामादिवर्णचतुष्ककोष्ठं = सिद्धम्, ततो दक्षिणक्रमेण द्वितीयं चतुष्कं साध्यम् । ततस्तृतीयं = सुसिद्धम्, चतुर्थम् = अरिः ।

यथाऽत्र दकारः ५ कोष्ठे, तत्र ५, ६, ७, ८ एतान्यङ्कितकोष्ठानि मिलित्वा यदेकं चतुष्कं, तत्सिद्धम् । ९। १०। ११। १२ एतच्चतुष्कं साध्यम्।१३।१४।१५।१६ एतच्चतुष्कं सुसिद्धम् । १। २। ३। ४ एतच्चतुष्कमरिः । अथ तत्रापि प्रत्येकचतुष्के चत्वारि कोष्ठानि, तत्रापि सिध्यसाध्यसुसिद्धारिक्रमेण गणनीयम् । अर्थादत्र तावद् दकारस्य ककारः कीदृशः ? इति विचारे दकारचतुष्काच्चतुर्थे चतुष्के ककारस्तेनारिः । एवञ्च नामादिवर्णचतुष्कोपरि मन्त्रादिवर्णगतचतुष्कं तथा निवेशनीयम् यथा तत्सजातीयता न नश्यति । अत्र ५। ६। ७। ८ चतुष्कोपरि १। २। ३। ४ चतुष्कं निवेशितम् तदा ५ अस्योपरि १ इदं कोष्ठं, ६ अस्योपरि २ इदं, ७ अस्योपरि ३, ८ अस्योपरि ४ इदं पतितं, तत्र दकोष्ठे एव ककोष्ठं पतितं, तत्रापि सिद्धसाध्यसुसिद्धारिक्रमेण गणने सिद्धमेव सिद्धं पूर्वमरिः । अतोऽरिसिद्धो हि ककारः । हकारोऽपि तथैव सुसिद्धारिः सकारः । सिद्धारिः शकारः । अत्र सर्वत्र अरियुक्तत्वात् सर्वेऽपि मन्त्रा न शुभाः। 'आदावन्ते रिपुर्यस्य भवेत् त्याज्यः स मन्त्रकः'। एकारः सुसिद्ध सुसिद्धम् ।

६. अथ ऋणधनचक्रविचारः—तत्र चक्रोर्ध्वकोष्ठगता नामगतस्वरव्यञ्जनसंख्याः पृथग् विलिख्य योगं कृत्वाऽष्टमिर्भजेत्, तत्रामशेषमनष्टं स्थाप्यम् । एवञ्च चक्राधःकोष्ठगतमन्त्र-स्वरव्यञ्जनसंख्या पृथग् विलिख्य योगं कृत्वाऽष्टभिर्भजेत्, शेषं मन्त्रशेषम्, अनयोर्यदि मन्त्र-शेषोऽधिकाङ्कस्तदा मन्त्रः शुभः । समे समः । अल्पे मन्त्रशेषे स च मन्त्रो न ग्राह्यः । तथोक्तं तन्त्रे—

मन्त्रो यद्यधिकाङ्कः स्यात्तदा मन्त्रं जपेत् सुधीः ।
समेऽपि च जपेन्मन्त्रं न जपेत्तु ऋणाधिके ॥

यथा देवदत्त = द् + ए + व् + अ + द् + अ + त् + त् + अ = १ + २ + १ + २ + १ + २ + ० + ० + २ + = ११ $\frac{११}{८}$ = १ + $\frac{२}{८}$

अत्राष्टभक्तानामङ्कशेषः = ३, अथ 'ए' = + अं = ४ + ० = ४

अत्र मन्त्राङ्कः = ४, योऽधिकः स ऋणी भवेदित्यनेन ऋणी शुभप्रदो मन्त्रः, 'मन्त्रो यद्यधिकाङ्कः स्यात्तदा मन्त्रं जपेत् सुधी' रित्यनेन च देवदत्तस्य 'ऐं' इति मन्त्रः शुभः।

एवम् श्रीं = श् + र् + ई + अं = ० + ३ + ६ + ० = ९। $\frac{९}{८}$, $\frac{९}{८}$ = १ + $\frac{१}{८}$

क्रीं = क् + र् + ई + अं = ६ + ३ + ६ + ० = १५। $\frac{१५}{८}$ = १ + $\frac{७}{८}$

अत्र देवदत्तस्य शकारो न शुभः। दक्षिणकालिकामन्त्रस्याष्टभक्तशेषाङ्काः = ७, एत-दधिका न क्वापि मन्त्रेऽतोऽयं मन्त्रः सर्वेषामिष्ट एवेति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथवा मन्त्राक्षराङ्कयोगो द्विगुणो नामाक्षराङ्कयोगेन युक्तोऽष्टभक्तः सन्मन्त्रशेषाङ्कः। तथा नामाक्षराङ्कयोगो द्विगुणो मन्त्राक्षराङ्कयोगेन युक्तोऽष्टभक्तः सन्नामशेषाङ्कः। तत्रापि मन्त्रशेषाङ्केऽधिके शुभप्रदो मन्त्रोऽन्यथाऽशुभप्रद इति ।

एवं षट्चक्रेषु मन्त्रस्योद्धारं कृत्वा शुभाशुभत्वं विचार्यम् । यदि प्रकृत्या देवविशेषेऽनुरागबाहुल्यं तदा तन्मन्त्रोद्धारावश्यकत्वं नैवेत्युक्तं चिदम्बररहस्ये—

यत्र यस्य भवेद्भक्तिविशेषः स मनूत्तमः ।
वैरिकोष्ठमपि प्राप्तोऽभीष्टदस्तस्य जायते ॥

रुद्रयामलस्यास्मिन् षट्चत्त्वारिंशादि-नवतितमपटलात्मके द्वितीये भागे मुख्यप्रतिपाद्यविषयाः—

रुद्राणीस्तोत्रम्, रुद्राणीरुद्रयोः पूजाप्रकरणम्, मृत्युञ्जयस्तवनम्, लाकिनीस्तवनम्, मणिपूरभेदप्रकाशः (४६–५०)।

मृत्युञ्जयसहितं लाकिनीसहस्रनामस्तोत्रम्, मन्त्रार्थचैतन्यविन्यासः, कालजालादिवारणप्रकारः,पञ्चद्रव्यादिसाधनम्, हठयोगक्रमस्वरूपम्, अनाहतहृत्कमलभेदनम्, काकिनीश्वरपार्श्वचरयजनम्, अष्टसिद्धिमाहात्म्ये काकिनीसाधनम्, काकिनीस्तोत्रम्, ईश्वरस्तोत्रम् (५१-६०)।

काकिन्यष्टोत्तरसहस्रनामस्तोत्रम्, ईश्वरस्तोत्रविन्यासः, अनाहतेश्वरसम्मोहनकवचम्, कण्ठपद्मभेदविज्ञानविन्यासः, शाकिनीसदाशिवार्चनम्, शाकिनीयजनम्, शाकिनीस्तोत्रविन्यासः, विशुद्धवर्णध्यानकथनम्, शाकिनीसदाशिवस्तवनमङ्गलाष्टोत्तरसहस्रनामविन्यासः, सदाशिवशाकिनीफलादेशकथनम् (६१–७०)।

श्रीबटुकनाथस्य पूजाविधानम्, कालीस्तवनम्, वाणीगीतम्, प्रासादमन्त्रकवचं तस्य माहात्म्यञ्च, अकालमृत्युहरणसभावर्णनम्, काकिनीकवचम्, योगार्थसञ्चयनम्, कण्ठाम्भोजभेदप्रकाशः, शाकिनीमन्त्रोद्देशः, हाकिनीकूटमन्त्रः (७१–८०)।

हाकिन्याः मन्त्रोद्धारः साधनं पूजनञ्च,हाकिनीपरशिवपूजनम्, हाकिनीस्तोत्रम्, हाकिनीशक्तिकवचम्, परनाथमहाकवचविधानम्, हाकिन्याः अष्टोत्तरसहस्रनामस्तोत्रम्, परनाथाष्टोत्तरसहस्रनामानि, पराशक्तिनिर्मूलस्थाननिर्णयः, वाराणसीपीठनाथन्तर्यजनम्, वाराणसीपञ्चपीठपद्धतिः (८१–९०) ।

शरण्यं वरेण्यं महाकामधन्यं
महादेवदेवं त्रिकालादिजन्यम् ।
श्मशानोग्रधूलिप्रियाङ्गानुलेपं
सदा स्तौमि संसारसारं निषेकम् ॥

बी ३१/२१ लंका
वाराणसी – २२१००५

विद्वद्वशंवदः
डा० सुधाकर मालवीयः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Foreword

"A philosophical, rather mystico-esoteric, study of the various Tāntrik modes of Sādhanā will naturally form part of a regular history of Tāntrik culture in this country.[1] When that comes to be written in a systematic manner with all the attention it deserves, much of the obscurity which hangs round the subject owing to ignorance and misinterpretation will disappear, and the true significance of most of the rites, however unintelligible or even fantastic any of them may seem to us at present, will appear clearly in the light of the proper perspective then revealed.

The first principles of these practices may then be found to be much more ancient and wide than they seem to be known, perhaps even more scientific and rational. Practices and beliefs corresponding to those of the so-called Śākta Tantras, exist in a more or less explicit form in numerous other religious sects of India, both ancient and mediaeval (and even modern), including the Buddhistic and the Jain. The essentials of the cult may perhaps be traced to the Vedic times [Cf. the Mahāvrata rite].

Every religious sect suffers from the stigma brought upon its fair name by the wilful abuses and malpractices of its unworthy and perverted followers. Its merit or intrinsic worth is not to be judged by these aberrations, but by the high ideal which it consciously sets up before itself and which is realised in practical life by some of its faithful adherents.

The philosophy of Kāmakalā is a study by itself. How the Transcendent Divine, the Ineffable Unity of the Supreme Being, brings forth as it were out of Itself and within Its own Nature the germ of the Cosmos lying hidden so long in Its

---

1. The view of M.M. Gopinath Kaviraj about the Supreme unification of Śiva and Śakti is quoted here from the Foreword of Sarvollasa Tantra written in1940.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

undifferentiated unity is a problem to which the intellect of man finds no convincing reply. The Tāntriks however aver that the transition from *Anuttara* (Transcendent) to *Ānanda* (Divine Joy) , and from *Ānanda* to *Ichchhā* (Divine Will), if a transition it could be called where time-sequence or even logical sequence is meaningless, entails a corresponding transition back from *Ichchhā* to *Ānanda* and from *Ānanda* to *Anuttara, Ichchhā* represents the Divine Will involved in the mechanism of *kāmakalā* it presupposes the play of *Ānanda* on a higher level. *Ānanda* is the expression of the eternally self-aware Supreme Being acting upon Itself and looking into Itself as into a mirror. It does not belong to the Transcendent or to *Anuttara* as such nor to the Supreme Will either, which is at the apex of creation and is a descent from self-contained Existence. It represents the intermediate link as it were between, to use a Christian term , the Father Divine and the Son Divine. It is the Prajñāpāramitā of the Neo-Buddhists and Mahāśakti of the Tāntriks.

The relation of the Transcendent with this is that of the self with its own nature. The युगलरूप or युगनद्धरूप or यामलरूप of the mystics indicates this peculiar character. The Supreme Unity cannot be reached from the level of Will (इच्छा) except through the manifestation of *Ānanda* or Śakti. This Śakti, as a counterpart of *Śiva,* has to function properly so as to induce the state of Supreme fusion in which both would be lost in the unity of Brahma,

In other words, the awakening of Kuṇḍalinī from a dormant state into the form of a Conscious Power and the consequent transmutation of Jīva into Śiva, followed by their joyous unification in the Self-delight of Brahma, are duly recognised in the Tantras. For does not the *Vīra Sādhaka,* who has risen above the limitation of the disciplined moral life of a *Paśu,* find access to the transcendental glories and freedom of the *Divya* stage through a process of sublimation accompanied by assimilation of Pure Śakti ?"

Banaras
5. 12. 1940

M.M. Gopinath Kaviraj, M.A.
Retd. Principal, Queen's College, Banaras

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Introduction

या राकिणी त्रिजगतामुदयाय चेष्टा
संज्ञामयी कुलवती कुलवल्लभस्था ।
विश्वेश्वरी स्मरहरप्रियकर्मनिष्ठा
कृष्णप्रिया मम सुखं परिपातु देवी ॥

The Rākiṇī, which is in the root of the flourish of all the three lokās; infuses consciousness in all the objects; which is dearest to the Kulavatī & Kula (= Śākta school); that which is Supreme Power of the universe; that which is dearest to Lord Sadāśiva; that which is devoted to duty, the same Goddess Rākiṇī dearest to Lord kṛṣṇa may happily protect us.

— Rudrayāmalam 41. 20

According to different Tāntrik schools, there are 64 Tantras. Rudrayāmala is one of them. Some of the commentator has given the list of these Tantras, which are as follows :

1. The Saundarya Laharī of Śankarāchārya refers indeed to 64 Tantras but does not name them. Latter on the commentator Lakṣmīdhara has named and described them.

2. A complete list has been compiled by the Vāmakeśvara Tantra.[1]

3. Another list of 64 Tantras is found in the so-called Bhairava Āgama (= Jaidrathayāmal), mentioned by Jayaratha in his commentary on the Tantrāloka. The last list can be distinguished from the rest of the two lists. The works of the last list, which are devoted to the teaching of monastic doctrines, are said to have come from the Southern Mouth (योगिनीवक्त्र) of Śiva, which is emblematic of the Supreme

1. There are different readings in this list also. Cf. the different version in Yajñeśvara Śāstrī's Āryavidyāsudhākara and in Aufrecht's Oxford Catalogue. The third version is given by the late Sir R. G. Bhaṇḍārkar in his Report on the Search for Sanskrit Manuskripts in the Bombay Presidency, 1883-84 (p. 87 and Appendix III, HHH. No. 236, p. 375).

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

unification of Śiva and Śakti. On the other hand, the works of the rest list have come from the remaining mouths of Śiva (उत्तराम्नाय, ऊर्ध्वाम्नाय etc.).

The subject matter of this second part is as follows—

The Rudrāṇī Stotra, The Mantras of Rudra and Rudrāṇī, Worship of Rudra and Rudrāṇī, Fiftyone names of Rudra, Names of Rudrāṇī, Ṛiṣī-nyāsa etc., Śrikaṇṭha-nyāsa, Pañca-mūrti-nyāsa, Kalā-nyāsa, Pañcamantra-nyāsa, Mṛtyuñjaya-vidhi, Pīṭha-nyāsa, Riṣyādi-nyāsa of Mṛtyuñjaya, Karāṅga-nyāsa, Mṛtyuñjaya Sādhanā and Worship, The Mṛtyuñjaya Stotra, The Lākinī Stotra, Reference to the various Siddhis, Pañcāsava-vidhāna, and Śodhan with a special description of purification of *Vijayā*. (46-50)

The Lākinī Mahāmṛtyuñjaya Stotra, Quantity-differentiation in the purification of the Āsavas and variant Mantras for it, Stotrās for purification of Āsava, The activation of Mantra in the Maṇipūr cakra and the Dhyāna of the Devatā of the Maṇipūra Cakra, The Amrapaṅcaka-sādhan, and the acts of *Neti, Dhauti, Nevali* and *Danti, Nādi-cālana, Snāna,* and the rituals of *Sandhyā-vandana* etc.. The method for the purification of the Pañcāsavas, and Amaraśodhan, The method of Kāya-vaśyam, The Heart lotus, its Dhyāna and the Anāhata Lotus, The worship of Kākinī, The Dhyāna of Kākinī, Kākinī Stotra, Science of the movement of the Kuṇḍalinī, Sciences of piercing the lotuses situated in the Throat, Dhyāna of the letters of the lotus situated in the throat and fixation of the Bindu, The Dhyāna of Śākinī and Her Mantras, The worship of Śākinī, Dhyāna of Śākinī, Bhūta-śuddhi, Prāṇa-pratiṣṭha, Beginning of worship, Salutation and circumambulation, The mysteries of the Sādhan (51-60).

The Sahasranāma of Kākinīśvara, Stava of Kākinīśvara, Kavaca of Kākinīśvara, Iśvara-Sammohan-Kavaca, Method of controlling the various sense-organs; Kaṇṭhasañcāra-vidhi; Rākṣasīcīna-Sādhanā, Method of worship of Kuladevī; Worship of Śākinī Sadāśiva; Śākinī-pūjā and Stotra; Dhyāna of the letters (Mātrikās); One thousand and eight names also known as Bhuvanmaṅgala Stotra and its glory; Śri Śākinī-Mahāśiva-Kāmanā-Mahākavaca (61-70).

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

Dhyāna of Sadāśiva; Worship of Baṭuka; Kalistava; Prasādamantra, Kavaca and its glory; Nature of the Siddha-sādhnā; Kākinī-Kavaca; Order of the Kulacakra of Sadāśiva; Order of the Siddhakula-cakra;, Benefits of the Kāmanāsiddhi; Kūtamantra of Hākinī. (71-80)

Mantra, Sādhana and Worship of Hākinī; Worship of Hākinī-Para-Śiva; Kavaca of Paranātha; Stotra of one thousand names of Hākinī; Stotra of one thousand names of Paranāth; Determination of the Mūlasthāna of the Parā-Śakti; worship of the Lord of the Vārāṇasīpīṭha; and the method of Vārāṇasī-pañca-pīṭha.(81-90).

The best effort has been made for the first time in rendering Rudrayāmal from Sanskrit text to Hindi but it is not claimed by the Editor, that it will be free from mistakes and errors.

The editor shall feel immense pleasure if learned Scholars indicate specific errors in this work, the same will be corrected and will help further improvement in this work.

Deepawali 1999 — **Sudhakar Malaviya**

Dept. of Sanskrit, Arts Faculty,
Banaras Hindu University
Varanasi - 221005

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भूमिका

अज्ञानतिमिरध्वंसी संसारार्णवतारकम् ।
आनन्दबीजमवतादतर्क्यं त्रैपुरं महः ॥

इस संसार में जितने प्रकार के साधन हैं, उनमें चार प्रकार के साधन ही श्रेष्ठ हैं। प्रथम वेदविहित साधनचतुष्टय; द्वितीय सांख्यप्रदर्शित साधनत्रय; तृतीय योग-शास्त्रोक्त साधन की रीति तथा चतुर्थ तन्त्रशास्त्रोक्त साधन प्रणाली । परन्तु कलिकाल में केवल तन्त्रशास्त्रोक्त साधन ही प्रशस्त और सिद्धिप्रद हैं । यही शास्त्र की उक्ति है । महानिर्वाणतन्त्र में कहा गया है—

तपः स्वाध्यायहीनानां नृणामल्पायुषामपि ।
क्लेशप्रयासाशक्तानां कुतो देहपरिश्रमः ॥
गृहस्थस्य क्रियाः सर्वा आगमोक्ताः कलौ शिवे ।
नान्यमार्गैः क्रियासिद्धिः कदापि गृहमेधिनाम् ॥

कलिकाल में मनुष्य तप से हीन, वेदपाठ से रहित और अल्पायु होंगे; वे दुर्बलता के कारण उस प्रकार के क्लेश और परिश्रम के सहने में समर्थ न होंगे । अतएव उनसे दैहिक परिश्रम किस प्रकार सम्भव हो सकता है ? कलिकाल में गृहस्थ लोग केवल आगमोक्त विधानों के अनुसार ही कर्मानुष्ठान करेंगे । हे शिव ! दूसरे प्रकार की विधियों से अर्थात् वैदिक, पौराणिक और स्मार्त्तसम्मत विधियों का अवलम्बन करके क्रियानुष्ठान करने से कदापि सिद्धिलाभ करने में समर्थ न होंगे ।

तान्त्रिक साधन का माहात्म्य

तान्त्रिक साधना दो प्रकार की है—बहिर्याग और अन्तर्याग । बहिर्याग में गन्ध, पुष्प, धूप, दीप, तुलसी, बिल्वपत्र और नैवेद्यादि के द्वारा पूजा की जाती है । अन्तर्याग में इन सब बाह्य वस्तुओं की आवश्यकता नहीं होती । मानसोपचार के उपकरण स्वतन्त्र होते हैं, इसमें पञ्चभूतों के द्वारा उपचार-कल्पना करनी पड़ती है । यथा—

पृथिव्यात्मकगन्धः स्यादाकाशात्मकपुष्पकम् ।
धूपो वाय्वात्मकः प्रोक्तो दीपो वह्न्यात्मकः परः ॥
रसात्मकं च नैवेद्यं पूजा पञ्चोपचारिका ।

पृथ्वी तत्त्व को गन्ध, आकाश तत्त्व को पुष्प, वायु तत्त्व को धूप, तेजस्तत्त्व को दीप, रसात्मक जलतत्त्व को नैवेद्य के रूप में कल्पना करके इस पञ्चोपचारद्वारा पूजा करनी पड़ती है । इसी का नाम अन्तर्याग है । षट्चक्रों का भेद ही इस अन्तर्याग का प्रधान अङ्ग है ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(१.) षट्चक्रभेद

षट्चक्रों का अभ्यास हुए बिना आत्मज्ञान नहीं होता; क्योंकि किसी वस्तु के प्रत्यक्ष हुए बिना मन का सन्देह नहीं छूटता, अतएव वास्तविक ज्ञान नहीं होता। दार्शनिक विचारों के द्वारा केवल मौखिक ज्ञान होता है, यथार्थ ज्ञान नहीं होता। इसके प्रत्यक्ष होने का उपाय है षट्चक्र-साधन।

षट्चक्र क्या हैं ?

इडापिङ्गलयोर्मध्ये सुषुम्णा या भवेत्खलु।
षट्स्थानेषु च षट्शक्तिं षट्पद्मं योगिनो विदुः॥

इडा और पिङ्गलानामक दो नाडियों के मध्य में जो सुषुम्णानामक नाडी है, उसकी छः ग्रन्थियों में पद्माकार रूप से छः चक्र संलग्न हैं। गुह्यस्थान में, लिङ्गमूल में, नाभिदेश में, हृदय में, कण्ठ में और दोनों भ्रू के बीच में—इन छः स्थानों में छः चक्र विद्यमान हैं। ये छः चक्र सुषुम्णा-नाल की छः ग्रन्थियों के रूप में प्रसिद्ध हैं। इन छः ग्रन्थियों का भेद करके जीवात्मा का परमात्मा के साथ संयोग करना पड़ता है। इसी को प्रकृत योग कहते हैं। यथा —

न योगो नभसः पृष्ठे न भूमौ न रसातले।
ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः॥ (देवीभागवत)

'योगविशारद लोग जीवात्मा के साथ परमात्मा की एकता साधन करने को ही योग के नाम से निर्देश करते हैं' और योग की क्रिया-सिद्धि के अंश का नाम साधन है।

अब किस स्थान में कौन सा चक्र है ? इसे क्रमशः स्पष्ट किया जाता है—

(१) गुह्यस्थल में मूलाधारचक्र चतुर्दलयुक्त है, उसके ऊपर लिङ्गमूल में स्वाधिष्ठानचक्र षड्दलयुक्त है, नाभिमण्डल में मणिपूरचक्र दशदलयुक्त है, हृदय में अनाहतचक्र द्वादश दलयुक्त है, कण्ठदेश में विशुद्धचक्र षोडशदलयुक्त है और भ्रूमध्य में आज्ञाचक्र द्विदलयुक्त है। ये षट्चक्र सुषुम्णा-नाडी में ग्रथित हैं।

मानव शरीर में तीन लाख पचास हजार नाडियाँ हैं। इन नाडियों में चौदह नाडियाँ प्रधान हैं— १. सुषुम्णा, २. इडा, ३. पिङ्गला, ४. गान्धारी, ५. हस्तिजिह्वा, ६. कुहू, ७. सरस्वती, ८. पूषा, ९. शङ्खिनी, १०. पयस्विनी, ११. वारुणी, १२. अलम्बुषा, १३. विश्वोदरी और १४. यशस्विनी। इनमें भी इडा, पिङ्गला और सुषुम्णा—ये तीन नाडियाँ प्रधान हैं। पुनः इन तीनों में सुषुम्णा नाडी सर्वप्रधान है और योगसाधन में उपयोगिनी है। अन्यान्य समस्त नाडियाँ इसी सुषुम्णा नाडी के आश्रय से रहती हैं। इस सुषुम्णा नाडी के मध्यगत चित्रा नाडी के मध्य सूक्ष्म से भी सूक्ष्मतर ब्रह्मरन्ध्र है। यह ब्रह्मरन्ध्र ही दिव्यमार्ग है, यह अमृतदायक और आनन्दकारक है। कुलकुण्डलिनीशक्ति इसी ब्रह्मरन्ध्र के द्वारा मूलाधार से सहस्रार में गमन करती है और परम शिव में मिल जाती है, इसी कारण इस ब्रह्मरन्ध्र को 'दिव्यमार्ग' कहा जाता है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हे २४ प्रकार के क्रोध और २४ प्रकार के तत्त्वों में निवास करने वाली ! हे आकाश स्थित चन्द्र समूह के समान उज्ज्वल वर्ण वाली ! हे कीलक में निवास करने वाली ! आप प्रचण्ड सूर्य के समान तेजस्विनी हैं अतः सदैव मेरी रक्षा कीजिए, क्योंकि एकमात्र आप ही परब्रह्मरूप से जगत् में सिद्ध (समर्थ) हैं ॥ ३७ ॥

शुभं कामधेनुस्वरूपं स्वदेहं
सदा दर्शने[५] श्रद्धया चारुवर्णा ।
हिमांशुप्रभाकोटिवर्णेऽ[६]त्वपूर्णे
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३८ ॥

कल्याणकारिणी कामधेनु स्वरूप आपके अपने विग्रह का दर्शन करने में श्रद्धा से परिपूर्ण हमारा मन संलग्न रहे । आपके शरीर की कान्ति अत्यन्त सुन्दर है, हे करोड़ों चन्द्रमा

---

१. नादोलनत्वादिति—क०, संख्यासतीनामिति—क० ।
महच्चेतनादानकात्वमेकाहयसंख्यामतीनां मनोयोगमुखेनेति—ख० ।

२. रिपुपापाहत्या (हन्या)—क० ।

३. वियत्खण्डचण्डाकुले धोलसंस्थेति—ग० ।

४. प्रधानार्कवर्णेति—ग० । अस्मिन् पाठे प्रधानो योऽर्कवर्णः श्वेतो गुणः, सोऽस्ति यस्यामिति बहुव्रीहिः । मूलपाठे तु प्रचण्डः अर्कवर्णा उष्णत्वयुक्तः श्वेतोऽस्ति यस्या इति विग्रहः ।

५. सदानन्ददा—ग० ।

६. वर्णात्वपूर्णे—क० । वर्णाहयपूर्णा—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

के समान वर्ण वाली ! हे अत्व (वासुदेव) से पूर्ण होने वाली, आप ही एक परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ३८ ॥

महाकामबीजान्विता खण्डयन्ती
महादोषजालं शनैरावहन्ती ।
शिवाभद्रकाली स्थिरानन्दमाला
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३९ ॥

हे देवि ! आप महाकामबीज (क्रीं) से युक्त हैं, महादोष जाल (समूह) का खण्डन करने वाली हैं, शिवा हैं, भद्रकाली हैं, स्थिरा एवं आनन्दमाला हैं और एकमात्र आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ३९ ॥

महाकालकूटाशिनं तीक्ष्णनेत्रं
सदा पाहि शम्भुं भयार्द्रातिवेलम् ।
भवापालनत्वादसंख्यानिवासा
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४० ॥

हे अम्बे ! महाकालकूट नामक विष का भक्षण करने वाले, तीखे नेत्रों वाले, भय से क्लिन्न, मर्यादा का अतिक्रमण करने वाले सदाशिव की रक्षा कीजिए । आप भवा हैं तथा पालन करने के कारण असंख्य प्राणियों की निवास भूमि हैं, मात्र एक आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ४० ॥

हरन्ती विषाढ्यं[१] वहन्ती कलाद्यं
रटन्ती[२] नटन्ती विशाला भ्रमन्ती ।
श्रियः[३] पालनी पालिका बालिकात्वात्
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४१ ॥

हे अम्बे ! आप विष की ज्वाला शान्त करने वाली हैं, ६४ कलाओं को धारण करने वाली हैं, रटन (परिभाषण) करने वाली हैं, नृत्य करने वाली हैं विशाला एवं भ्रमण करने वाली हैं, बालिका होने के कारण श्री का पालन करने वाली पालिका हैं अतः आप ही एकमात्र परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ४१ ॥

भवानन्दहेतोः[४] सदा श्रद्धया वा
पदाम्भोजमध्ये मनोयोगकाले ।

---

१. विषान्नमिति—ख०, विषाद्यमिति—ग० । विषेणाढ्यं सम्पन्नं किमपि भक्ष्यम् । अथवा विषान्नमिति पाठे विषमिश्रितमन्नमिति मध्यमपदलोपिसमासः । यदि भक्तेन विषान्नमपि भक्षितं स्यात्तदा तदीयं मारकदोषं हरन्ती भगवती इत्यर्थः ।

२. रटन्ती विलोला भ्रमन्ती जपन्ती—ग० ।

३. श्रियः पालिनी पालिके कालिके वा—क० ।

४. तवानन्दहेतोरिति—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परासंख्यते कामसंक्षालनत्वात्[१]
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४२ ॥

हे भगवति ! मैं आपके पदाम्भोज के मध्य में अपना मनोयोग करते समय सांसारिक आनन्द के लिए सर्वदा श्रद्धा से लगा रहूँ । काम का संक्षालन करने के कारण मैं आपके अन्वेषण में लगा हूँ, क्योंकि एकमात्र आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ४२ ॥

क्षितिक्षोभ[२]नाशाय सिद्धादिविद्या
कुलाढ्याखिलाढ्यानना सूक्ष्ममध्या[३] ।
प्रयत्नं करोषि क्षयानन्ददाना
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४३ ॥

हे माता ! आप पृथ्वी में उत्पन्न होने वाले क्षोभ (उपद्रव) के विनाश के लिए (स्वयं) सिद्धा हैं । आदिविद्या हैं और कुल को बढ़ाने वाली हैं । आपका मुख (कान्ति से) समृद्ध है और मध्य भाग अत्यन्त क्षीण है । आप क्षय (अपचय) एवं आनन्द देने वाली हैं और इसके लिए आप निरन्तर प्रयत्न करती रहती हैं, अतः मात्र एक आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ४३ ॥

महाधैर्यमाहृत्यजं जप्यते यैस्-
तवाद्याभिधानानि कालिप्रभाते ।
तदैवापि काले ददासीह सिद्धिं
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४४ ॥

हे कालि ! जो महान् धैर्य का आश्रय ले कर आपका आद्य अभिधान (नामों) का जप प्रभात काल में करते हैं उन्हें भी आप उसी समय सिद्धि प्रदान कर देती हैं, क्योंकि एकमात्र आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ४४ ॥

चिरं स्थापयन्ती चिरं भासयन्ती[४]
त्वमाख्या गुरूणां[५] कुलानन्दविद्ये ।
स्वधाकारतुष्टा[६] कलावह्निजाया
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४५ ॥

हे कुलानन्दविद्ये ! आप गुरुजनों की आख्या को चिर कालपर्यन्त स्थापित करने वाली

---

१. कामसंख्याननत्वादिति क० ।
२. क्षितिक्षोभनायेति—क०, सिद्ध्यादि विद्येति च—क० ।
३. शिलामध्यमध्येति—क० ।
४. भावयन्ती—ग० ।
५. गुणानन्दविधे क० ।
६. सुधाकामतुष्टेति—क० । सुधायाः काम इच्छा, तेन तुष्टा । 'स्वधाकारतुष्टा' इति मूलपाठे तु स्वधाकारेण तुष्टा इत्यर्थो बोध्यः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तथा उसको भासित करने वाली हैं । आप स्वधाकार से संतुष्ट रहने वाली हैं, कला हैं, वह्निजाया (स्वाहा) हैं और एकमात्र परब्रह्मस्वरूप से जगत् में प्रसिद्ध हैं ॥ ४५ ॥

सुरानन्दकाले फलोद्भूतचिन्हा
चितामध्यदेशे महासिद्धिदात्रि ।
त्रिभिन्ना[1]विभिन्ना महारुद्रविद्ये
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४६ ॥

सुरा से उत्पन्न आनन्द काल में आपका फल का चिन्ह उद्भूत होता है । हे चिता के मध्य स्थान में रहने वालों को महासिद्धि प्रदान करने वाली भगवति ! हे महारुद्रविद्ये, आप तीन भिन्न रूपों वाली हैं, अथवा भिन्नता से रहित (एक स्वरूप) रूप वाली हैं, मात्र एक आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ४६ ॥

महापूर्वि[2] कात्यायनि क्रोधमूले
विवेकादिकं धर्ममादौ ददासि ।
त्रयाणां सुराणां मुदारक्षणाय
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४७ ॥

हे महापूर्वि ! हे कात्यायनि ! हे क्रोध के मूल में रहने वाली आप सर्वप्रथम धर्म एवं विवेकादिक प्रदान करती हैं और ब्रह्मा, विष्णु एवं सदाशिव इन तीनों देवों की प्रसन्नतापूर्वक रक्षा के लिए मात्र एक आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ४७ ॥

विशुद्धस्फुटत्त्वान्महाकौतुकत्वा-
त्तनुध्यान[3]मोहादनन्ते[4] कृतत्त्वात् ।
कुलारक्षणात्मा[5] महालक्षणात्मा
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४८ ॥

विशुद्ध रूप से स्फुटीभूत होने के कारण, महाकौतुक में संलग्न होने के कारण, सूक्ष्म ध्यान में मोहित होने के कारण, अनन्त में पर्याप्त होने के कारण कुलरक्षणात्मा एवं महालक्षणात्मा हैं और मात्र एक ही आप परब्रह्मरूप से सिद्ध (समर्थ) हैं ॥ ४८ ॥

दहन्ती रिपूणां [6]कुलञ्चात्मदेशं
क्षणादेव[7] सूक्ष्मासुसूक्ष्मा सती सा ।

---

१. त्रिभिन्नाधिभन्ना—ग० ।
२. महापुष्टि .... क० ।
३. ध्यानसत्वात्—क० ।
४. असन्तैकतत्त्वात्—क० ।
५. कुलारक्षणत्वात्, महालक्षणत्वात्—क० ।
६. कुलच्छत्रदेशं ग० ।
७. सदाज्ञानगम्याखिलानां जनानाम्—ख० । कुलच्छत्रदेशं कुलं देवसूक्ष्मा मतीनाम् —इति ग० पुस्तके पाठः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ममानन्ददेशं सदा पालय श्री[१]
त्त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४९ ॥

हे माता! आप शत्रुओं के कुल एवं उनके अपने देशों को दहन करने वाली हैं। वही सती आप सूक्ष्म हैं और सूक्ष्म से भी सुसूक्ष्म हैं। आप श्री हैं अतः मेरे आनन्द प्रदेश का सदा पालन कीजिए क्योंकि मात्र एक आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ४९ ॥

चतुर्थाश्रमस्थाश्रमं पाहि रुद्रे
महोग्रप्रतापे महारौद्रि भद्रे ।
महापातकादिक्षयत्वामृतत्त्वा-[२]
त्त्वमेका परब्रह्मरूपेण सिद्धा ॥ ५० ॥

हे रुद्रे ! आप चतुर्थ आश्रम में निवास करने वाली हैं, अतः आप मेरे इस आश्रम की रक्षा कीजिए। हे अपने उग्र महातापों वाली हे महारौद्रस्वरूपे ! हे भद्रे ! आप ब्रह्महत्यादि महापातकों का क्षय करने के कारण तथा अमर रहने के कारण अकेली ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ५० ॥

महावायुरम्ये[३] महाज्ञानगम्ये
महामन्त्र[४]जाप्यादिसिद्धिप्रसिद्धे ।
लयं[५] देहि बाह्यानिलाघातनत्वा-
त्त्वमेका परब्रह्मरूपेण सिद्धा ॥ ५१ ॥

हे महावायु में रमण करने वाली ! हे महाज्ञान से जानी जाने वाली ! महामन्त्र (ॐ नमः शिवाय) के जाप करने वालों को सर्वप्रथम सिद्धि देने के लिए प्रसिद्ध रहने वाली देवि ! आप बाहरी वायु का विघात कर मुझे अपने में लय प्रदान कीजिए क्योंकि एकमात्र आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ५१ ॥

न जानामि किं वामरो वापि विष्णु-
र्महाकौलिको वा न जानाति पूजाम् ।
कुलाद्यासनन्ते[६] सुरेन्द्रादिपाठे
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ५२ ॥

---

१. पालयश्रीस्त्व मेका—ख० ।
२. क्षयत्वानृतत्वं क० ।
३. महावायुवश्ये महाज्ञानवश्ये—ग० ।
४. तन्त्र—ग० । महामन्त्रस्य जाप्येन आदिसिद्धिः प्रमुखसिद्धिः, तया प्रसिद्धा, तत्सम्बोधने एतद्रूपम् । अथवा—महामन्त्रजाप्यमादिर्यस्य तेन सिद्धिः प्रसिद्धा यस्या इति । तन्त्रशब्दघटिते पाठे तु मन्त्रस्य स्थाने तन्त्रशब्दः पठनीयः ।
५. नयम्—क० ।
६. कुलसेवनान्तस्तवेन्द्रादिपाठम्—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मैं नहीं जानता कि देवता क्या हैं, विष्णु क्या हैं अथवा वह महाकौलिक (शाक्त उपासक) भी आपकी पूजा नहीं जानता, आपके कुलादि (समयाचार) को अथवा आसन को भी नहीं जानता। हे विष्णु, ब्रह्मा, रुद्र और सदाशिव रूप (चार पादवाले) पीठ पर रहने वाली ! मात्र आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ५२ ॥

मदीयं[१] प्रलोभ्यं महाभद्रकालि
प्रकाशेन कर्त्तुं समर्था भव त्वम् ।
पदाब्जे च [२]हन्तुं महापापसर्गे
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ५३ ॥

हे महान् भद्रकालि ! मेरा अभीष्ट अपने प्रकाश से पूर्ण करने में तथा महापाप के सर्ग (सृष्टि) को अपने दोनों पादकमल से नष्ट करने के लिए आप समर्थ हैं। यतः एकमात्र आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ५३ ॥

वहन्ती कपालं स्खलन्तीमपार्थं
महाहेममाला [३]महाकाशयन्ती ।
शिवो[४] मङ्गलं मे तु वैश्वानरीशे
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ५४ ॥

आप कपाल धारण करने वाली हैं, अपार्थ स्खलित होने वाली महान् हेममाला को अत्यन्त प्रकाशित करती हैं। हे वैश्वानरीशे ! आपकी कृपा से मेरा कल्याण है, मेरा मङ्गल होए क्योंकि एकमात्र आप ही परब्रह्मस्वरूप से सिद्ध (समर्थ) हैं ॥ ५४ ॥

प्रचण्डा प्रसन्ना भवक्षोभहेतो-
र्विवादादिघाताय शान्तिः प्रतुष्टिः ।
कियत्कालसंस्था प्रसन्नान्तरात्मा
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ५५ ॥

आप संसार में क्षोभ (उपद्रव) होने पर प्रचण्ड हो जाती हैं अन्यथा प्रसन्न रहने वाली हैं। विवादादि के विनाश के लिए शान्ति एवं संतुष्टि स्वरूपा हैं। अनन्त काल में स्थित रहने वाली हैं, आप अन्तरात्मा से प्रसन्न रहने वाला हैं और परब्रह्मस्वरूप से एकमात्र आप ही सिद्ध (समर्थ) हैं ॥ ५५ ॥

महावायुपाना[५] क्रियामोक्षकाले
कुलज्ञान[६]दाना दिवारूपिणी त्वम् ।

---

१. यदीयं प्रलोभं .... प्रकर्षेण कर्तुम्—क० । २. हर्तुम् इति—क० ।
३. मनाकालयन्ती—क०, मलाकाशपात्री—ख० ।
४. शिरोऽसत्त्ववैश्यानरीशे—ग०, शिवात्वरूपा च वैश्यानरीशे ।
५. दानक्रिया मोक्षकाले ।
६. कुलज्ञानदानार्थिनी त्वम्—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रभुत्वं विधेहि[१] क्षमे कामकर्त्री
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ५६ ॥

आप क्रिया के त्याग काल में महावायु को पी जाने वाली हैं, आप कुल (शाक्त सम्प्रदाय) के ज्ञान का दान करने वाली हैं, दिवा स्वरूपा हैं और आप ही काम उत्पन्न करने वाली हैं। हे क्षमा करने वाली ! मुझ में प्रभुत्व प्रदान कीजिए। यतः एकमात्र आप ही परब्रह्मरूप से सिद्ध (समर्थ) हैं ॥ ५६ ॥

यदि श्रीवराद्ये ममाख्या[२] ससिद्धिं
विदेहीति[३] चित्ते समाधाय भक्तः ।
समाप्नोति शीघ्रं सदा प्रार्थ्यते यैः[४]
सदा पठ्यते[५] वा मुदा वारमेकम् ॥ ५७ ॥

फलश्रुति—हे श्री एवं वर की आदिभूते माता ! यदि भक्त अपने चित्त में 'सिद्धि के सहित मुझे यश दो' ऐसी धारणा कर आप से प्रार्थना करे, अथवा इस स्तोत्र का एक बार प्रसन्नतापूर्वक पाठ भी करे तो वह अपना वाञ्छित शीघ्र प्राप्त कर लेता है ॥ ५७ ॥

महाकालशम्भो महाज्ञानसिद्धः
सदा[६] कालवश्ये[७] पठेदेकचित्तः ।
महाभक्तिभावं [८]लभेद् वेद मुक्तिं
महादेवभक्तिं त्रिकालेन योगम् ॥ ५८ ॥

हे महाकालशम्भो ! हे कालवश्ये ! जो ज्ञानसिद्ध साधक एकाग्रचित्त होकर सर्वदा इस स्तोत्र का पाठ करता है वह महाभक्ति भाव प्राप्त कर लेता है। वह त्रिकाल में होने वाली मुक्ति, तथा महादेव में भक्ति को तथा योग को जान लेता है ॥ ५८ ॥

मणेः पीठमध्ये महा[९]रुद्रकान्तां
महालाकिनीं कुण्डलीं[१०] भावयन्ती ।
महापुण्यलाभं[११]स्तवं ब्रह्मसारं
महाकान्तलाभाय पुण्याय सिद्ध्यै ॥ ५९ ॥

---

१. विदेहि । 'विदेहि' इति पाठे विशेषेण देहि इत्यर्थः, अथवा विगतो देहो देहभानं यस्याः सा विदेही तत्सम्बोधने हे विदेहि ! इत्यर्थो बोध्यः ।

२. अभ्याससिद्धिम्—क० । ३. विदेहापि चित्ते—क० ।

४. वै—क० । ५. पाठयते । ६. यदा—क० ।

७. कालवश्यः—ख० । 'कालवश्ये' इति पाठे कालो वश्यो यस्याः सा, तत्सम्बोधने इदं रूपम् । पूर्व निपातस्यानित्यत्वाद् वश्यशब्दस्य परनिपातः ।

८. लभस्वाढ्यभक्तिं—ख०, लभस्वेदमुक्ति—ग० ।

९. महाब्रह्मकान्तां—ग० । महारुद्रस्य कान्ता, अथवा महती चासौ रुद्रकान्ता च । 'महाब्रह्मकान्तेति' पाठे महती ब्रह्मकान्ता, माया इति ।

१०. कुण्डलम् । ११. महापुण्यभावं—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मणिपूर नामक पीठ में महारुद्र की कान्ता महालाकिनी कुण्डलिनी का जो लोग ध्यान करते हैं उन्हें महापुण्य का लाभ होता है । ब्रह्मसार नामक यह स्तोत्र मनसेप्सित लाभ के लिए पुण्य के लिए और समस्त सिद्धि के लिए विहित है ॥ ५९ ॥

महाकालि रुद्राणि भद्राणि कृष्णे[१]
भवानन्दमूर्त्तिप्रकाशाय कुर्यात् ।
किलानन्दमाकृत्य सम्पूज्यते यै-
र्महादेवि चण्डे तव ध्याननिष्ठा[२] ॥ ६० ॥
महामोक्षभाव[३] समाप्नोति शीघ्रं ।
महाशुद्धता कामहा कालरूपी[४] ॥ ६१ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे षट्चक्रप्रकाशे मणिपूरभेदनक्रमे भैरवीभैरवसंवादे रुद्रशक्तिलाकिनीस्तोत्रं नाम षट्चत्वारिंशः[५] पटलः ॥ ४६ ॥

हे महाकालि! हे रुद्राणि ! हे भद्रे ! हे कृष्णे ! आप इस भवानन्द की मूर्ति के प्रकाश के लिए मुझे नियुक्त कीजिए । हे महादेवि ! हे चण्डे ! जो लोग महानन्द का अनुभव करते हुए आपका पूजन करते हैं उनमें आपकी ध्याननिष्ठा उत्पन्न हो जाती है । वह शीघ्र ही महा मोक्ष भाव को प्राप्त कर लेते हैं तथा महाशुद्ध एवं कामहा और कालरूपी हो जाते हैं ॥ ६०-६१ ॥

॥ श्री रुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन में सिद्धमन्त्र प्रकरण में षट्चक्र के महाप्रकाश में मणिपूर के भेदन क्रम में भैरवी भैरव संवाद में रुद्रशक्ति लाकिनी स्तोत्र नामक छियालिसवें पटल की डा० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ४६ ॥



---

१. पूज्ये—ख० अधिकः पाठः । २. निष्ठः—ग० ।

३. मोक्षे महेति विशेषणेन लेशाविद्याकृतप्रभावस्यापि समाप्तिः सोसूच्यते । यथा ब्रह्मणो मानसपुत्रेषु सनक-सनन्दनादिष्वपि लेशाविद्यायाः प्रभाव आसीदेव, अत एव जयविजययोर्भगवत्पार्षदयोः जन्मत्रितयकृते दैत्ययोनौ जन्मविषयकः शापस्तैः प्रदत्तः । एवं च स्थूलाविद्याकृतबन्धनान्निवृत्तौ सत्यामपि लेशाविद्याजनितः प्रभावो यदा समाप्यते, तदैव महामोक्षावाप्तिः संमन्तव्या ।

४. (क) कालरूप इत्यपि पाठः प्रतिभाति ।
(ख) प्रकाशाय पङ्केरुहातां जनास्ते महायोगिनो भूतनाथा भवन्ति—क० अधिकः पाठः।

५. सप्तचत्वारिंशत्तमः पटलः—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ सप्तचत्वारिंशः पटलः

श्रीआनन्दभैरवी उवाच

शृणु कैलासनाथाब्ज[१] चक्रमण्डलसंस्थितिम् ।
षट्चक्रभेदमाहात्म्यं सावधानावधारय ॥ १ ॥
अप्रकाश्यमिदं मन्त्रं[२] मणिपूरविभेदनम् ।
अष्टैश्वर्यसाधनाय जीवन्मुक्तिप्रदाय[३] च ॥ २ ॥

श्रीआनन्दभैरवी ने कहा—हे कैलासनाथ ! पद्मचक्रमण्डल की संस्थिति तथा षट्चक्रों के भेदन का माहात्म्य सावधान होकर सुनिए । मणिपूर चक्र के भेदन के इस मन्त्र को कहीं प्रकाशित नहीं करना चाहिए । क्योंकि यह आठों प्रकार के ऐश्वर्य की साधना के लिए तथा जीवन्मुक्ति प्रदान के लिए है ॥ १-२ ॥

कथयामि महाकाल यज्ज्ञात्वा योगिनोऽमराः।
क्रियासाधनमात्रेण केन योगेन एव हि ॥ ३ ॥
साधनादेव सर्वज्ञः सर्वार्थज्ञानवान् भवेत् ।
रुद्राणीसहितं रुद्रं ध्यात्वा सम्पूज्य सञ्जपेत् ॥ ४ ॥

हे महाकाल ! अब उसे कहती हूँ, जिसे जान कर योगी जन अमर हो जाते हैं । भला क्रिया साधन मात्र से कौन योगी नहीं बन जाता । साधना से ही साधक सर्वज्ञ एवं सर्वार्थ ज्ञानवान् हो जाता है । इस की साधना के लिए रुद्राणी सहित रुद्र का ध्यान कर पूजा करनी चाहिए । फिर जप प्रारम्भ करना चाहिए ॥ ३-४ ॥

अथ वक्ष्ये महामन्त्रं पूजाप्रकरणं तथा ।
मणिपूरे स्थितो मन्त्री रुद्राणीयजनं चरेत् ॥ ५ ॥
सम्प्रति[४]मन्त्रस्योद्धारं करोमि कालकूटप[५] ।
प्रणवं पूर्वमुच्चार्य नमः शब्दं ततो वदेत् ॥ ६ ॥
ते शब्दान्ते समुद्धृत्य रुद्रशब्दं ततः परम् ।
रूपिण्यै[६] पदमुच्चार्य रुद्राणी मन्त्रमीरितम् ॥ ७ ॥

---

१. नाथाद्य—ख० । २. वक्तुं—क०, मन्त्रं—ख० । ३. प्रियाय—क० ।
४. दम्पत्यो मन्त्रमुद्धारम्—ख०, सम्पात्यामन्त्रमुद्धारम्—ख० ।
५. कलाकूर्ट पिबति, कालकूटात् पाति, इति वा, कालकूटपः, तत्सम्बोधने हे कालकूटप ! इति भगवता शिवेन विषपानं कृतम् ततश्च देवा रक्षिता इति ।
६. रूपिणे—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रुद्राणी मन्त्र—अब मैं उस महामन्त्र को तथा पूजा के प्रकरण को कहती हूँ—मणिपूर में पहुँचकर मन्त्रज्ञ साधक प्रथम रुद्राणी का यजन करे । हे कालकूट पीने वाले ! अब मैं रुद्राणी मन्त्र का उद्धार कहती हूँ । प्रथम 'प्रणव' (ॐ) का उच्चारण करे इसके बाद 'नमस्ते' शब्द कहे, इसके बाद 'रुद्र' शब्द, फिर 'रूपिण्यै' पद का उच्चारण करे (ॐ नमस्ते रुद्ररूपिण्यै) । यहाँ तक रुद्राणी मन्त्र का उद्धार कहा गया ॥ ५-७ ॥

ततो महारुद्रमन्त्रं वक्ष्यामि तत्त्वतः शृणु ।
प्रणवान्ते नमस्शब्दं[1] ते महाशब्दमुच्चरेत् ॥ ८ ॥
रुद्राय [2]पदमुद्धृत्य महारुद्रमनुः स्मृतः ।
ततोऽन्यत्कालरूपेश [3] रुद्राणीमन्त्रमाशृणु ॥ ९ ॥

महारुद्र मन्त्र—अब हे शङ्कर ! महारुद्रमन्त्र को कहती हूँ उसे सुनिए । आदि प्रणव (ॐ) के अन्त में 'नमस्' शब्द का उच्चारण करे, तत्पश्चात् 'ते महा', फिर 'रुद्राय' पद का उच्चारण करे । 'ॐ नमस्ते महारुद्राय'—यही महारुद्र का मन्त्र है । हे कालरूप ईश्वर! इसके अतिरिक्त और रुद्राणी मन्त्र को सुनिए ॥ ८-९ ॥

डादिफान्तैः सर्ववर्णैराद्यन्ते पुटितं मनोः ।
सर्वशेषे वह्निजाया महामन्त्रोत्तमोत्तमः ॥ १० ॥

रुद्राणी का मन्त्र 'सर्ववर्णैः' के आदि में डं तथा अन्त में फं इस प्रकार के सम्पुट से बनता है अथवा 'सर्वशेष' के बाद वह्निजाया (स्वाहा) यह भी सभी मन्त्रों में उत्तम मन्त्र हैं।

विमर्श—डं ढं णं तं थं दं धं नं पं फं ॐ नमस्ते रुद्ररूपिण्यै स्वाहा ॥ १० ॥

अस्य जापनमात्रेण षट्पद्म [4]साधने जयी ।
एवं प्रकारं रुद्रस्य चाथवान्यप्रकारकम् ॥ ११ ॥

इस मन्त्र के जप मात्र से षट्चक्र रूप पद्म के साधन में साधक विजय प्राप्त कर लेता है, इस प्रकार रुद्र का मन्त्र कह दिया गया । अब उस रुद्र मन्त्र के अन्य प्रकार को सुनिए ।

रुद्राणां विविधं मन्त्रं कोटितन्त्रे विनिर्णयम् ।
मणिपूरे सदा ध्यायेद् योगसाधनहेतुना ॥ १२ ॥

रुद्र के अनेक मन्त्र कोटितन्त्र में निर्णीत कर कहे गए हैं । अतः साधक योगसाधना की सिद्धि के लिए मणिपूर चक्र में उनका ध्यान अवश्य करे ॥ १२ ॥

सर्वत्र मानसं कार्यं ध्यानपूजाविधानकम् ।
प्रमोदाख्यातिमनुभिर्मृत्युञ्जयादिभिस्तथा ॥ १३ ॥
चैतन्यं कारयेत् शीघ्रं मणिपूरस्थदेवयोः ।

---

१. शब्दः—ग० । मन्त्रस्य स्वरूपं निःसारणीयम् ।
२. मुचार्य—क० । ३. अन्य—ग० ।
४. जापने—ग० ।—षट्पद्मसाधने जयति तच्छीलः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'प्रमोद' नामक मन्त्रों (द्र०. ४७, १५) से तथा मृत्युञ्जयादि मन्त्रों से इन देवद्वय का ध्यान तथा पूजाविधान मानस ही करे। इन मन्त्रों से मणिपूरस्थ (रुद्र एवं रुद्राणी इन) दोनों देवों को शीघ्र प्रबुद्ध करे ॥ १३-१४ ॥

अथ[१] वक्ष्ये महेशस्य [२]रुद्रस्य परमात्मनः ॥ १४ ॥
प्रासादाख्यं महामन्त्रं त्रैलोक्यफलसिद्धिदम् ।
सान्तमोङ्कार[३]संयुक्तं नादबिन्दुविभूषितम् ॥ १५ ॥

अब परमात्मा महेश्वर रुद्र के त्रैलोक्य फल की सिद्धि देने वाले प्रासाद नामक महामन्त्र को कहती हूँ। नाद बिन्दु से समन्वित स (सं) अन्त में तथा आदि में प्रणव का उच्चारण करे (ॐ सं) ॥ १४-१५ ॥

प्रासादाख्ये मनुः प्रोक्तो भजतां कामदो[४]मणिः।
प्रणवं पूर्वमुच्चार्य स्वाहान्तं जपते यदि ॥ १६ ॥

यही प्रासाद नामक महामन्त्र हमने कहा जो जप करने वालों को अभीष्ट प्रदान करने वाली महामणि है, अथवा प्रथम प्रणव (ॐ) का उच्चारण कर उसके अन्त में स्वाहा लगा कर जप करे (ॐ सं स्वाहा) ॥ १६ ॥

स्तम्भनादीनि कर्माणि स करोति न संशयः ।
अथवा मृत्युजेतारं महामन्त्रं [५]महामनुम् ॥ १७ ॥

ऐसा साधक स्तम्भनादि समस्त कार्य करने में समर्थ हो जाता है इसमें संशय नहीं है, अथवा मृत्यु पर विजय प्राप्त करने वाला महामृत्युञ्जय महामन्त्र का जप करे ॥ १७ ॥

जपेन्मानसजापेन [६] यज्जाप्यं प्राणरक्षकम् ।
तारं स्थिरा[७] सकर्णेन्दुर्भृगुः सर्गसमन्वितः ॥ १८ ॥
त्र्यक्षरात्मा निगदितो मन्त्रो मृत्युञ्जयात्मकः ।
अथवान्यप्रकारेण जपेन्मृत्युञ्जयात्मकम् ॥ १९ ॥

इस मन्त्र का मानस जप करें, इस प्रकार का जाप प्राणों की रक्षा करता है। तार (ॐ) सकर्ण इन्दु के साथ स्थिरा (जूँ) सर्ग (विसर्ग) सहित भृगु (स) अर्थात् सः (ॐ जूँ

---

१. तत्त्वं—ग० ।

२. परमात्मानमीश्वरम्—ग० । यदरोदीत् तद् रुद्रस्य रुद्रत्वम् । रुदिर् अश्रुविमोचने इति धातोरक्प्रत्ययः, कित्त्वाद् गुणाभावः ।

३. हान्तमोकार—क०, सान्तमोकार—ग० । ४. मनु—क० ।

५. मुनिः—क० ।—महामुनिः मृत्युजेतारं महामन्त्रं जपेत् । अनेन रूपेणान्वये कृते सति अर्थसङ्गत्याऽयमेव पाठो युक्तः प्रतिभाति । महामनुमिति पाठे मनुशब्दस्य मन्त्रार्थकत्वात् पौनरुक्त्यदोष आपतति । मणिः—ग० ।

६. जपन्—क० । ७. स्थिराम्—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सः) इन तीन अक्षरों वाला मृत्युञ्जय मन्त्र कहा गया है अथवा अन्य प्रकार वाले मृत्युञ्जयात्मक मन्त्र का जप करे ॥ १८-१९ ॥

मृत्युञ्जयं समुद्धृत्य पालय द्वितयं ततः ।
मृत्युञ्जयं समुद्धृत्य पुनरेव[1] विलोमतः ॥ २० ॥
द्वादशाक्षरमन्त्रोऽयं मृत्युञ्जयाभिधोऽपरः ।
ध्यानं (पूजां) तथा न्यासं शृणु वक्ष्यामि शङ्कर ॥ २१ ॥

पहले 'मृत्युञ्जय' पद इसके बाद दो बार पालय (पालय पालय) शब्द, फिर मृत्युञ्जय का विलोम 'जय मृत्यु' (मृत्युञ्जय पालय पालय जय मृत्युम्) यह १२ अक्षरों का दूसरे प्रकार का मृत्युञ्जय मन्त्र है । अब हे शङ्कर ध्यान, पूजा तथा न्यास कहती हूँ, उसे सुनिए ॥ २०-२१ ॥

रुद्रमन्त्रेण पुटितं योजयेन्मृत्युहारणम् ।
तथा हि रुद्रकान्ताया मन्त्रेण पुटितं शिवम् ॥ २२ ॥
जपित्वा पूजयित्वा च नरो गोप्ता भवेद्वशी ।
प्रातःकृत्यादिकं कृत्वा हविष्याशी जितेन्द्रियः ॥ २३ ॥
अतिसावधानपरो[2] विधिसेवापरायणः ।
स्नानसन्ध्यादिकं कृत्वा आसनादिकमाश्रयेत् ॥ २४ ॥
समाप्य आसनं सर्वं पीतवस्त्रे पिधाय च ।
अथवा शुक्लवस्त्रे द्वे परिधाय मनोहरे ॥ २५ ॥

मृत्युञ्जय मन्त्र को रुद्रमन्त्र से सम्पुटित करे । इसी प्रकार रुद्राणी के मन्त्र से शिव मन्त्र को सम्पुटित करे । इस मन्त्र के जप से और पूजा से मनुष्य वशी (जितेन्द्रिय) बन जाता है तथा अपनी रक्षा भी कर लेता है । हविष्य भोजन करने वाला जितेन्द्रिय साधक सर्वप्रथम अपना प्रातःकृत्य सम्पादन करे । फिर अत्यन्त सावधान हो कर विधिपूर्वक सेवा में संलग्न हो जावे । नित्य प्रातःकृत्य के बाद स्नान सन्ध्यादि कार्य कर आसन करे । तदनन्तर सभी आसन कर पीतवस्त्र धारण करे, अथवा अत्यन्त मनोहर दो शुक्ल वस्त्र धारण करे ॥ २२-२५ ॥

कोमलाद्यासने गत्वा प्रक्षाल्यपादयुग्मकम ।
द्विराचम्य विधानेन पूजायां स्वस्तिकासने ॥ २६ ॥
वीरासने तथा पद्मासनयोन्यासने तथा ।
उपविश्य निर्मलात्मा पूजामार्गपरो भवेत् ॥ २७ ॥
सर्वाणि द्रव्यभोज्यानि मनसा कल्पितानि च ।
तदलाभे सलाभे वा मनःकल्पितशोधनम् ॥ २८ ॥

---

१. एवम्—क० ।
२. सावधानपरो भूत्वा—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

करणीयं सर्वदैव निजबाह्येऽपि[१] चालयेत् ।
यथा लभ्यानि द्रव्याणि संशोध्य[२] तत्र योजयेत् ॥ २९ ॥

फिर अपने दोनों पैरों का प्रक्षालन कर कोमलासन पर बैठ कर दो बार आचमन करे । पूजा में स्वस्तिकासन से बैठने का विधान है, अथवा वीरासन से, अथवा पद्मासन से, अथवा योन्यासन से बैठकर साधक निर्मल हो कर पूजा कार्य में तत्पर हो जावे । पूजा के सभी द्रव्य तथा भोज्य मानस रूप से कल्पित करे चाहे वे प्राप्त हो चाहे प्राप्त न हों, मन से उनको एकत्रीकरण करना यही ठीक मार्ग है । ऐसा सर्वदा करना चाहिए । यदि बाह्य पूजा करनी हो तो जो वस्तुयें प्राप्त हों उन्हीं को एकत्रित कर पूजा करे ॥ २६-२९ ॥

ततः कुर्याद् विशेषेण प्राणायामं मनोरमम् ।
चतुःषष्टिमात्रया वा तथा षोडशमात्रया ॥ ३० ॥
तद्द्वादशमात्रया वा संख्यया[३] वायुमाश्रयेत् ।
प्राणायामं समाप्याथ रुद्रन्यासं समाचरेत् ॥ ३१ ॥

पूजासंभार एकत्रित कर लेने के बाद ६४ मात्रा वाला, अथवा १६ मात्रा वाला अथवा १२ मात्रा में वायु का आश्रय ले कर सरल प्राणायाम करे । प्राणायाम समाप्त कर लेने के बाद रुद्रन्यास करना चाहिए ॥ ३०-३१ ॥

श्रीकण्ठादिमहावीरन्यासं कुर्यात् प्रयत्नतः ।
रुद्रन्यासं प्रवक्ष्यामि [४]मनुयोगादिसिद्धये ॥ ३२ ॥
एतन्न्यासाभिकरणे नरो रुद्रसमो भवेत् ।
सदा कुर्यान्महान्यासं सर्वसिद्धिप्रकाशनात् ॥ ३३ ॥

रुद्रन्यास में श्रीकण्ठादि महावीर न्यास प्रयत्नपूर्वक करना चाहिए । अब मन्त्र योग की सिद्धि के लिए रुद्रन्यास कहती हूँ । इस न्यास के करने से साधक पुरुष रुद्र के समान हो जाता है । अतः सर्व सिद्धियों के प्रकाश से पूर्व सदैव महान्यास करना चाहिए ॥ ३२-३३ ॥

शक्तिहीनं शक्तियुक्तं महान्यासं प्रकीर्तितम् ।
शक्तियुक्तं समाकृत्य महाशक्तो भवेद् बली ॥ ३४ ॥
शक्तिहीनं तथा कार्यं सर्वविघ्नविनाशनात् ।
मातृकापद्मचक्रे तु मातृका[५]वर्गसंयुतम् ॥ ३५ ॥
मातृकापुटितं मन्त्रं किं वा मन्त्रेण संपुटम् ।
कृत्वा मन्त्री न्यासजालं सावधानेन कारयेत् ॥ ३६ ॥

---

१. स्वाजे राजे वा—क० ।
२. सन्तोष्य—ग० । 'संशोध्य' इति पाठः साधीयान् । द्रव्यस्य पुष्पधूपादेः संशोधनं भवति, न तु सन्तोषणम् । अचेतनत्वात् । यदि द्रव्यं पश्वादिकम्, तदा 'सन्तोष्य' इति पाठो युक्त एव ।
३. संख्यया—क० ।
४. महा—क० ।
५. वर्ण चक्रे—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रुद्रमहान्यास दो प्रकार का होता है—एक शक्तियुक्त न्यास तथा दूसरा शक्ति से रहित न्यास। शक्तियुक्त न्यास कर साधक महान् शक्तिमान् तथा बलवान् बन जाता है। सभी विघ्नों के विनाश के लिए शक्ति रहित न्यास करना चाहिए। मातृका पद्मचक्र पर मातृकावर्णों से संयुक्त न्यास करना चाहिए। मातृका सम्पुटित मन्त्र से अथवा उक्त मन्त्र से सम्पुटित मन्त्र द्वारा न्यास कर साधक मन्त्रज्ञ को सावधानी से अनेक अन्य न्यास समूहों को करना चाहिए ॥ ३४-३६ ॥

विक्रमी सिंहतुल्यः स्यात्तं दृष्ट्वा यान्ति शत्रवः।
मौनी भूत्वा समाकृत्य कुलचक्रस्य भेदनम्[१] ॥ ३७ ॥
मणिपूरे स्थिरो[२] भूत्वा महातेजोमयो भवेत्।

इस प्रकार के न्यासों के करने से साधक सिंह के समान पराक्रमी हो जाता है। शत्रुगण उसे देखते ही भाग जाते हैं। मौन हो कर कुलचक्र का भेदन कर मणिपूर में स्थिर होकर साधक महान् तेजस्वी हो जाता है ॥ ३७-३८ ॥

तेषां नाम प्रवक्ष्यामि पञ्चाशदेकसंख्यया ॥ ३८ ॥
पञ्चाशदेकशक्तीनां तथा नाम शृणु प्रभो।
सर्वेषामभिधानान्ते[३] ईशाय नम उच्चरेत् ॥ ३९ ॥

अब उन रुद्रों का नाम तथा उनकी ५१ शक्तियों का नाम कहती हूँ, उन्हें सुनिए। न्यास काल में सभी नामों के अन्तमें 'ईशाय नमः' इस पद का उच्चारण करे ॥ ३८-३९ ॥

एकैकं मातृकावर्णं नाम्न आद्ये नियोजयेत्।
शक्तियुक्तं सदा[४] नाम ईशान्तं सन्त्यजेत् तथा ॥ ४० ॥

नाम के आदि में एक एक मातृकावर्ण का उच्चारण करे। जब शक्ति से संयुक्त नाम द्वारा न्यास करना हो तो 'ईशाय नमः' इस पद का परित्याग कर देवे ॥ ४० ॥

भेदने शक्तियुक्तस्तु न्यासं कुर्यान्महायतिः।
कुशासने सिद्धिहेतोश्चैलाजिनकुशोत्तरम् ॥ ४१ ॥
बद्धैकमासनं योगी न्यासजालं समाचरेत्।
अथवा द्वीपिचर्मादि कोमलाद्यासनेऽपि वा ॥ ४२ ॥

साधक महा यति मणिपूर के भेदन में शक्तियुक्त न्यास करे। सिद्धि के लिए कुशासन के ऊपर अजिन उसके ऊपर वस्त्र बिछाकर न्यास करे। एक आसन से बैठकर योगी समस्त न्यासों को करे, अथवा व्याघ्र के आसन पर अथवा अन्य किसी कोमल आसन पर बैठना चाहिए ॥ ४१-४२ ॥

---

१. भेदनात्—क०। २. स्थितो—ग०।
३. अभिधानार्थम्—ख०।—एकपञ्चाशत्संख्याकशक्तीनां नामानि उच्चार्य 'ईशाय नमः, इत्युच्चरेत्, इति तात्पर्यम्। अभिधानन्तु—ग०।
४. यदा ..... तदा—ग०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

योगाभ्यासी न्यासजालं कृत्वा[१]सावभयो भवेत् ।
भद्रकाली गृहे स्थित्वा ये कुर्वन्ति निरन्तरम् ॥ ४३ ॥
महान्यासं महादेव तत्क्षणादमरो भवेत् ।
आयुरारोग्यसम्पत्तिं [२]सम्प्राप्नोति महाश्रियम् ॥ ४४ ॥

योगाभ्यासी समस्त न्यास समूहों को कर के अभय हो जाता है । जो लोग भद्रकाली के मन्दिर में निवास कर निरन्तर इस महान्यास का अभ्यास करते हैं, हे महादेव ! वे तत्क्षण अमर हो जाते हैं । वे आयु आरोग्य रूप महासम्पत्ति तथा महान् श्री (समृद्धि) शीघ्र प्राप्त कर लेते हैं ॥ ४३-४४ ॥

समायाति मम स्थाने न्यासयोगप्रसादतः ।
न्यासधारणयोगेन मणिपूरे [३]ह्रदो भवेत् ॥ ४५ ॥

इस न्यासयोग की कृपा के फल स्वरूप वे शीघ्र ही हमारे लोक में पहुँच जाते हैं । न्यास धारण योग से मणिपूर में एक (आनन्द का) सरोवर बन जाता है ॥ ४५ ॥

आदौ [४]तन्नाम वक्तव्यं पश्चात् [५]शक्त्याभिधानकम् ।
श्रीकण्ठश्चाप्यनन्तश्च सूक्ष्मा त्रिमूर्तिरेव च ॥ ४६ ॥
अमरेश्वरश्चार्धीशो भावभूतिस्ततः [६]परम् ।
अतिथीशस्थाण्वीशो हरो झिण्टीश [७]एव च ॥ ४७ ॥
भौतिकः सद्योजातश्चाप्यनुग्रहेश्वरस्तथा ।
अक्रूरोऽपि महासेनो [८]निर्जरादिश्च षोडश ॥ ४८ ॥
एते देवा महारुद्र षोडशस्वरविग्रहाः ।
क्रोधीशश्चापि चण्डेशः पञ्चान्तकः शिवोत्तमः ॥ ४९ ॥

प्रथम रुद्रों के नाम तदनन्तर शक्तियों के नाम का उच्चारण कर न्यास करें । १. श्री कण्ठ, २. अनन्त, ३. सूक्ष्म, ४. त्रिमूर्ति, ५. अमरेश्वर, ६. अर्धीश, इसके बाद ७. भावभूति, ८. अतिथीश, ९. स्थाण्वीश, १०. हर, ११. झिण्टीश, १२. भौतिक, १३. सद्योजात, १४. अनुग्रहेश्वर, १५. अक्रूर और १६. महासेन—इतने निर्जरादि रुद्र कहे गए हैं । हे महारुद्र ! जो १६ स्वरों के साक्षात् स्वरूप हैं ॥ ४६-४९ ॥

एकरुद्रस्तथा कूर्म [९]एकनेत्रेश्वरस्ततः ।
चतुराननोऽजेशश्च सर्वः सोमेश एव च ॥ ५० ॥
लाङ्गलीशो[१०] दारुकेशोऽर्द्धनारीश्वर एव च ।

---

१. सारमयो—ग० । २. समाप्नोति—क० । ३. अपि भो—ग० ।
४. तत्त्वान्तम्—ग० । ५. यथा—ख० । अधिक पाठः ।
६. तथा परः—क० । ७. कोटीश—क० ।
८. निजस्वरादि षोडशः—क० । ९. तथा—क० ।
१०. उमाकान्तेश आषाढिः डिण्डीशोऽत्रीश एव च । मीनेशश्चापि मेषेशो लोहितेशः शिखीश्वरः ॥ छगलण्डे द्विरण्डेशो महाकालेश्वरस्ततः । अधिकः पाठः—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(उमाकान्तेश आषाढिः डिण्डीशोऽत्रीश एव च ।
मीनेशश्चापि मेषेशो लोहितेशः शिखीश्वरः ।
छगलण्डे द्विरण्डेशो महाकालेश्वरस्ततः ।)
वाणीशश्च भुजङ्गेशः पिनाकीशस्ततः परम् ॥ ५१ ॥
खड्गीश[1]श्चरकेशश्च श्येनो भृग्वीश एव च ।
नकुलीशः शिवेशश्च संवर्त्तकेश एव च ॥ ५२ ॥
एते रुद्राः समाख्याताः सर्वकाले कुलेश्वराः[2] ।
यस्य नाम्नश्चान्तभाते ईशशब्दो न विद्यते ॥ ५३ ॥
केशान्तं नाम संस्कृत्य न्यासं मौलीशमाचरेत् ।

१७. क्रोधीश, १८. चण्डेश, १९. पञ्चान्तक, २०. शिवोत्तम, २१. एकरुद्र, २२. कूर्म, इसके बाद २३. एकनेत्रेश्वर, २४. चतुरानन, २५. अजेश, २६. सर्व, २७. सोमेश, २८. लाङ्गलीश, २९. दारुकेश, ३०. अर्द्धनारीश्वर, ३१. उमाकान्त, ३२. आषाढीश, ३३. चण्डीश, ३४. अन्त्रीश, ३५. मीनेश, ३६. मेषेश, ३७. लोहितेश, ३८. शिखीश, ३९. छगलण्डेश, ४०. द्विरण्डेश, ४१. महाकालेश्वर, ४२. वागीश, ४३. भुजङ्गेश, उसके बाद ४४. पिनाकीश, ४५. खड्गीश, ४६. चरकेश, ४७. श्येन, ४८. भृग्वीश, ४९. नकुलीश, ५०. शिवेश और ५१. संवर्तकेश—सर्वकाल में इतने कुलेश्वर रुद्र कहे गए हैं । जिन रुद्र के नाम के अन्त में 'ईश' शब्द नहीं आया है। उन नामों के अन्त में 'ईश' शब्द लगाकर तब न्यास करना चाहिए ॥ ५०-५४ ॥

विमर्श—यहाँ पर कुछ नाम छूट गए हैं । क्योंकि कुल ५१ वर्ण हैं, जिसमें १६ स्वरों के अधीश्वर रुद्र पहले कह चुके हैं शेष ३५ व्यञ्जनों के ३५ रुद्रों के नाम आने चाहिए, मूल श्लोक में मात्र २५ नामों का उल्लेख है ।

मन्त्रमहोदधि (२१. ८६-९९) में ८. तिथीश, ७. भारभूति, २९. दारकेश, ३० अर्धनारीश, ४२. बालीश, ४६. बकेश, और ४७. श्वेतेश पाठ है । यहाँ रुद्रयामल में ३१-४१ के मध्य जिन ११ नामों की छूट है वह हिन्दी में जोड़ा गया है ॥ ५०-५४ ॥

कामं मोहादिनाशार्थं यः करोति निरन्तरम् ॥ ५४ ॥
मातृकावर्णघटितं मातृकास्थलके न्यसेत् ।
शक्तियुक्तं[3] यदा न्यासं तत्कालेऽपीशयोजनम् ।
अथवा रुद्रशक्त्या[4] च तथा रुद्रेण सम्पुटम् ॥ ५५ ॥

काम तथा मोहादि के विनाश के लिए जो निरन्तर रुद्र न्यास करता है (वह साधक सिद्धि प्राप्त करता है) । प्रत्येक मातृका स्थल में रुद्र के नामों के पहले मातृकावर्ण लगाना

लाङ्गलमस्ति यस्य स लाङ्गली, तस्येशः, स चासौ ईशः, स ईशो यस्येति वा त्रिविधः समासः ।

१. खड्गीशः सुरकेश—ग० ।
२. कुलेश्वर ग० ।
३. यदा न्यासं प्रकुर्वीत—ग० ।
४. रुद्रशक्त्या चेति—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चाहिए । जब शक्तियुक्त न्यास करना हो तब भी रुद्र के नामों में जहाँ ईश पद नहीं है वहाँ ईश पद जोड़कर तब न्यास करना चाहिए, अथवा रुद्र शक्ति के मन्त्र से सम्पुट अथवा रुद्र के साथ सम्पुटित वर्णों द्वारा न्यास करना उचित है ॥ ५४-५५ ॥

निजमन्त्रेण वा नाथ पुटितं मातृकास्थले ।
शक्त्या च [1]ग्रथनं कृत्वा संसारं सन्तरेत् क्षणात् ॥ ५६ ॥

अथवा हे नाथ ! मातृका स्थल में निजमन्त्र से सम्पुटित न्यास करना चाहिए । शक्ति के साथ वर्णों को जोड़कर न्यास करने से साधक संसार सागर से पार हो जाता है ॥ ५६ ॥

रुद्राणीनामानि

तत्प्रकारं शृणु प्राणनाथ शङ्कर वल्लभ ।
पूर्णोदरी च गिरिजा शाल्मली तदनन्तरम् ॥ ५७ ॥
लोलाक्षी वर्त्तुलाक्षी च दीर्घघोणा ततः परम् ।
सुदीर्घमुखि[2]गोमुख्यौ दीर्घजिह्वा ततः परम् ॥ ५८ ॥
कुण्डोदरी चोद्ध्र्वमुखी तथा विकृतमुख्यपि ।
ज्वालामुखी वह्निमुखी[3] लोलजिह्वा ततः परम् ॥ ५९ ॥
विद्यामुखी तथा नाथ एताश्च स्वरशक्तयः ।

हे प्राणनाथ ! हे शङ्कर ! हे वल्लभ ! उन शक्तियों का नाम श्रवण कीजिए । १. पूर्णोदरी, २. गिरिजा, ३. शाल्मली, इसके बाद ४. लोलाक्षी, ५. वर्त्तुलाक्षी, ६. दीर्घघोणा, इसके बाद ७. सुदीर्घमुखी, ८. गोमुखी, ९. दीर्घजिह्वा, इसके बाद १०. कुण्डोदरी, ११. ऊर्ध्वमुखी, १२. विकृतमुखी, १३. ज्वालामुखी, १४. वह्निमुखी, १५. लोलाजिह्वा, इसके बाद १६. विद्यामुखी । हे नाथ ! इतनी १६ स्वरों की शक्तियाँ हैं ॥ ५७-६० ॥

काद्यार्णशक्तिविद्याश्च वक्ष्यामि पार्वतीश्वर ॥ ६० ॥
महाकालीसरस्वत्योर्महालक्ष्म्यास्ततः परम् ।
द्राविणी नागरी भूयः खेचरी चापि मञ्जरी ॥ ६१ ॥
रूपिणी बिम्बिनी[4] पश्चात् काकोदरी च पूतना ।
भद्रकाली योगिनी च शङ्खिनी गर्ज्जिनी तथा ॥ ६२ ॥
कालरात्रिः कुब्जिका च कपर्द्दिनी ततः परम् ।
वज्रा जया [5]ततो नाथ सुमुखेश्वर्यपि प्रभो ॥ ६३ ॥
रेवती माधवी चैव वारुणी वायवी तथा ।

---

१. प्रथममिति—ग० । २. सुदीर्घमुखी गोमुख्या—ग० ।
३. चोल्कामुखी सुश्रीमुखी ततः परम्—क० । वह्निरिव प्रकाशमानं मुखं यस्याः सा । अथवा वह्निर्मुखे यस्या इति व्यधिकरणबहुव्रीहिः समासः ।
४. विरली—ख० । ५. तथा—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वक्षोविदारिणी चैव सहजालक्ष्म्यथ प्रभो ॥ ६४ ॥
व्यापिनी चैव माया च रुद्राङ्कपीठदेवताः ।

हे पार्वतीश्वर ! अब ककार से लेकर समस्त व्यञ्जन वर्णों की शक्तियों को कहती हूँ । १७. महाकाली, १८. महासरस्वती, १९. महालक्ष्मी, २०. द्राविणी, २१. नागरी, इसके बाद २२. खेचरी, २३. मञ्जरी, २४. रूपिणी, २५. बिम्बिनी, २६. काकोदरी, २७. पूतना, २८. भद्रकाली, २९. योगिनी, ३०. शंखिनी, ३१. गर्जिनी, ३२. कालरात्रि, ३३. कुब्जिका, ३४. कपर्दिनी, ३५. वज्रा, ३६. जया, इसके बाद हे नाथ ! ३७. सुमुखेश्वरी, ३८. रेवती ३९. माधवी, ४०. वारुणी, ४१. वायवी, ४२. वक्षोविदारिणी, ४३. सहजा, ४४. लक्ष्मी, ४५. व्यापिनी एवं ४६. माया, हे रुद्र ! हे प्रभो ! इतने वर्णों की अधिष्ठात्री देवता हैं ॥ ६०-६५ ॥

विमर्श—मन्त्रमहोदधि (२१. ८६-९९) में २. विरजा, ७. दीर्घमुखी, १०. कुम्भोदरी, ११. ऊर्ध्वकेशी, १४. उल्कामुखी, १५. श्रीमुखी, १९. सर्वसिद्धिगौरी, २०. त्रैलोक्यविद्या, २१. मन्त्रशक्ति, २२. आत्मशक्ति, २३. भूतमातृ, २४. लम्बोदरी, २५. वीरिणी, ३२. तर्जनी, ३३. कुब्जिनी और ४२. रजोविदारिणी पाठ है । ४३. 'सुमहा' रुद्रयामल में अपपाठ है । अतः यहाँ पर मन्त्रमहोदधि के आधार पर 'सहजा' पाठ दिया गया है ॥ ५७-६५ ॥

सर्वाभरणसंयुक्ता सिन्दूरारुणविग्रहाः ॥ ६५ ॥
धृतशूलकपालादि[१] बाणशक्तिप्रखेटकाः ।
वराभयकरा नित्याः सर्पवाहनवाहनाः[२] ॥ ६६ ॥
श्रीकण्ठाद्या[३] महारुद्रा धृतशूलकपालकाः ।
खड्गखेटकशक्तीषु गदामूसलधारकाः ॥ ६७ ॥

ये सभी शक्तियाँ आभरणों से भूषित, सिन्दूर से अलंकृत तथा अरुण वर्ण के विग्रह से युक्त हैं । शूल एवं कपालादि आयुधों को धारण करने वाली तथा बाण शक्ति, खेटक, वर तथा अभय मुद्रा अपने हाथों में लिए हैं, ये सभी नित्या हैं तथा सर्प के वाहन पर आसीन रहने वाली हैं । श्री कण्ठादि महारुद्र शूल, कपाल, खड्ग, खेटक, शक्ति, बाण, गदा और मुसल आयुध लिए हुए हैं ॥ ६५-६७ ॥

नानास्त्रधारका नित्या बन्धूककोटिसुन्दराः ।
रक्तचन्दनदिग्धाङ्गाः पञ्चचूडधराः पराः ॥ ६८ ॥
रक्तोत्पलमहामाला[४]लङ्कारकरपङ्कजाः ।

ये सभी अनेक प्रकार के अस्त्रों को धारण किए हैं एवं नित्य हैं तथा बन्धूक पुष्प के समान सुन्दर हैं । सभी के शरीर में रक्त चन्दन का अनुलेप है तथा सभी पञ्चचूड़ा से युक्त

---

१. कपालासि—क० । २. सर्वस्ववाहनाः—ग० ।
३. कण्ठास्या—ग० ।
४. भाला—क० । रक्तानि उत्पलानि (कमलानि) तेषां माला तद्रूपोऽलंकारः करपङ्कजे यस्याः सा । व्यधिकरणबहुव्रीहिः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हैं । सभी लाल वर्ण के कमलों की माला का अलङ्कार धारण किए हुए तथा हाथ में कमल लिए हुए हैं ॥ ६८-६९ ॥

पीठन्यासं ततः कुर्यात् मम तन्त्रानुसारतः ॥ ६९ ॥
सर्वत्रमूलपुटितमथवा वर्णसम्पुटम् ।
कृत्वा पीठन्यासकार्यं विधानेन वदामि तत् ॥ ७० ॥

इसके बाद हे नाथ ! हमारे तन्त्र के अनुसार साधक पीठ न्यास करे । सभी पीठन्यास में प्रथम मूल मन्त्र से सम्पुटित अथवा वर्ण सम्पुट करने के पश्चात् साधक विधानपूर्वक पीठन्यास करे । अब उसे मैं कहती हूँ ॥ ६९-७० ॥

ॐ अनन्ताय[१] नमश्च नमो हृदि ततः परम् ।
ॐ पद्माय नमः शब्दं हृदये च ततः परम् ॥ ७१ ॥
ॐ सूर्यमण्डलाय [२]द्वादशान्ते कलात्मने ।
ॐ नमः पदं समुच्चार्य चान्ते च हृदये प्रभो ॥ ७२ ॥
ॐ उं सोममण्डलाय षोडशकलात्मने नमः ।
सर्वत्र हृदये कार्यं पीठन्यासं मनोलयम् ॥ ७३ ॥

'ॐ अनन्ताय नमः', इसके बाद 'नमो हृदि' पद, फिर 'ॐ पद्माय नमः', इसके बाद 'हृदये' कहिए । फिर 'सूर्यमण्डलाय द्वादशकलात्मने', फिर 'नमः' पद का उच्चारण कर हे प्रभो ! 'हृदये' कहिए । इसके बाद ॐ 'सोममण्डलाय षोडश कलात्मने नमः' हृदये इस प्रकार सर्वत्र हृदय में पीठन्यास कर मनोलय करना चाहिए ॥ ७१-७३ ॥

ॐ मं वह्निमण्डलाय दशकलात्मने नमः ।
ॐ सं सत्त्वाय नमश्च ॐ रं रजसे नमः ॥ ७४ ॥
ॐ तं तमसे नमश्च पूर्वादिकेशरेषु च ।
ॐ [३]तं आत्मने नमश्च ॐ सर्वव्यापिने नमः ॥ ७५ ॥
ॐ [४]अं अन्तरात्मने च ॐ मनोन्मन्यै नमश्च ।
तदुपरि ततो वदेत् नमोऽन्ते शून्यवासिने ॥ ७६ ॥
ॐ [५]पं परमात्मने च नमोऽन्ते कालरूपिणे ।
ॐ ह्रीं ज्ञानात्मने चान्ते नमोऽन्ते वर्णवासिने ॥ ७७ ॥

फिर 'ॐ मं वह्निमण्डलाय दशकलात्मने नमः', 'ॐ सं सत्त्वाय नमः', 'ॐ रं रजसे नमः', 'ॐ तं तमसे नमः'—इन मन्त्रों से पीठन्यांस करे ।

इसके बाद पूर्वादि दिशाओं के ८ केशरों पर—१. ॐ तं आत्मने नमः, २. ॐ सर्वव्यापिने नमः, ३. ॐ अं अन्तरात्मने नमः, ४. ॐ मनोन्मन्यै नमः, इसके बाद ५.

---

१. अं श्रं न्यन्ताय—ग० ।
२. द्वादशकलात्मने तत—ग० ।
३. आम्—क० ।
४. आम्—क० ।
५. पं० नास्ति—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शून्यवासिने नमः, ६. ॐ पं परमात्मने कालरूपिणे नमः, ७. ॐ ह्रीं ज्ञानात्मने नमः एवं ८. ॐ वर्णवासिने नमः—इन मन्त्रों से न्यास करे ॥ ७४-७७ ॥

पीठशक्तेस्ततो न्यासं कुर्यात् साधकयोगिराट् ।
हृत्पद्मस्यापि पूर्वादि केशरेषु च संन्यसेत् ॥ ७८ ॥
ॐ वामायै नमश्चान्ते ॐ ज्येष्ठायै[1] नमो वदेत् ।
ॐ सर्वभूतदमन्यै[2] नमः शब्दं समुच्चरेत् ॥ ७९ ॥
(ॐ रौद्रायै नमश्चान्ते ॐ काल्यै च नमो वदेत् ।
ॐ कलविकरिण्यै नमः शब्दं ततो वदेत् ।
ॐ बलप्रमथन्यै नमो व भोऽन्ते च पुनर्वदेत् ।)

पीठन्यास के बाद योगिराज साधक पीठ शक्तियों का न्यास करे । यह न्यास हृदयकमल के पूर्वादि केशरों पर करना चाहिए । पूर्वादि दिशाओं में तथा मध्य में 'ॐ वामायै नमः', इसके बाद 'ॐ ज्येष्ठायै नमः', फिर 'ॐ सर्वभूतदमन्यै नमः' से न्यास करे।

विमर्श—यहाँ पर भी आठ केशरों में और मध्य में ९ नाम होना चाहिए । तीन ही दिशा में न्यास कहा है । एक दिशा छूट है । फिर 'ॐ रौद्रायै नमः', 'ॐ काल्यै नमः', 'ॐ कलविकरिण्यै नमः', 'ॐ बलविकरिण्यै नमः', 'ॐ बलप्रमथन्यै नमः', (द्र० ६४. ४५; ४७. ९५-९७) ॥ ७८-७९ ॥

एता विन्यस्य देवेश मध्ये विन्यासमाचरेत् ।
हृत्पद्मस्य कर्णिकायां कृत्वा भावनमाचरेत् ॥ ८० ॥
ॐ मनोन्मन्यै नमश्च तदुपरि ततो वदेत् ।
ॐ नमो भगवतेऽन्ते च सकलपदमुच्चरेत् ।
गुणाय[3] शक्तियुक्ताय अनन्ताय पदं ततः ॥ ८१ ॥
(योगपीठात्मने चान्ते नमः शब्दं समुच्चरेत् ।
ततः कुर्यान्महादेव ऋष्यादिन्यासमेव च ।
रुद्रशक्त्या ऋषेर्विष्णुस्तथा मृत्युञ्जयस्य च ।)

हे देवेश ! इन शक्तियों द्वारा न्यास कर हृत्पद्म की कर्णिका के मध्य में विन्यास करे । फिर उन शक्तियों का ध्यान करे । ध्यान करने के पश्चात् 'ॐ मनोन्मन्यै नमः' पद कहे । फिर साधक को 'ॐ नमो भगवते सकलगुणाय शक्तियुक्ताय अनन्ताय' पद का उच्चारण करना चाहिए ॥ ८०-८१ ॥

---

१. नमः शब्दं पुनर्वदेदिति—ग० ।
२. ॐ रौद्रायै नमश्चान्ते ॐ काल्यै च नमो वदेत्—क० ।
ॐ कलविकरिण्यै नमः शब्दं ततो वदेत् ।
ॐ बलप्रमथन्यै नमो व भोऽन्ते च पुनर्वदेत्—क० अधि० ।
३. गुणार्थ—क० । शक्तियुक्ताय अनन्ताय गुणाय इत्यादिरूपेणान्वयः करणीयः । गुणपदमर्श आद्यजन्ततया गुणिपरतया बोध्यम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विमर्श—इसके बाद 'योगपीठात्मने नमः' इतना कहे, फिर हे महादेव ! ऋष्यादि न्यास करे । वस्तुतः रुद्र की शक्ति, ऋषि विष्णु और मृत्युञ्जय का पूजन करना चाहिए ।

कहोड[१]मुनिपुत्रश्च ऋषिरस्य प्रकीर्तितः ।
महेश्वरमुखाज्ज्ञात्वा यः साक्षात्तपसा मनुम् ॥ ८२ ॥
संसाधयति शुद्धात्मा स तस्य ऋषिरीरितः ।
गुरुत्वान्मस्तके चास्य न्यासस्तु[२] परिकीर्तितः ॥ ८३ ॥

रुद्र शक्तियों के ऋषि—इन रुद्र शक्तियों के कहोड मुनिपुत्र ऋषि कहे गए हैं । जिन शुद्धात्मा महर्षि ने महेश्वर के मुख से मन्त्र पाकर अपनी तपस्या द्वारा इसे सिद्ध किया, इसलिए वे ही इसके ऋषि कहे गए हैं । सर्वश्रेष्ठ होने के कारण ऋषि नाम के चतुर्थ्यन्त पद से मस्तक पर न्यास करना चाहिए ॥ ८२-८३ ॥

सर्वेषां [३]मन्त्रतत्त्वानां छादनाद् छन्द उच्यते ।
अक्षरात्वात्पदत्वाच्च मुखे च्छन्दः समीरितम् ॥ ८४ ॥
सर्वेषामेव जन्तूनां प्रेषणात्प्रेरणात्तथा[४] ।
हृदयाम्भोजमध्यस्था देवता [५]तत्र तां न्यसेत् ॥ ८५ ॥

रुद्र शक्तियों के छन्द—सभी मन्त्रों के तत्त्वों को आच्छादित करने के कारण उन शब्दों की 'छन्द' संज्ञा है । जो अक्षर तथा पद स्वरूप हैं इसलिए छन्द के चतुर्थ्यन्त पद से मुख पर न्यास करना चाहिए । यतः देवता हृदय स्थल पर निवास कर सभी जीव को प्रेरणा प्रदान करते हैं तथा कार्य करने के लिए विवश करते हैं, अतः मन्त्र के देवता के चतुर्थ्यन्त पद से हृदयस्थल पर न्यास करना चाहिए ॥ ८४-८५ ॥

ऋषिच्छन्दोऽपरिज्ञानान्न मन्त्रः फलभाग्भवेत् ।
दौर्बल्यं याति मन्त्राणां विनियोगमजानताम् ॥ ८६ ॥
न्यसेन्मूर्ध्नि ऋषिन्यासं छन्दोन्यासं मुखाम्बुजे ।
देवतान्यासमाकुर्यात् हृदयाम्भोरुहे सुधीः ॥ ८७ ॥

ऋषि तथा छन्द का परिचय जाने बिना मन्त्र फलप्रद नहीं होता । अतः जो ऋषि, छन्द तथा देवता रूप विनियोग किए बिना मन्त्र का जप करता है, उसका मन्त्र फलदान में दुर्बल रहता है । इसलिए सुधी साधक ऋषि से शिर पर, छन्द से मुख पर तथा देवता से हृदय कमल पर न्यास करे ॥ ८६-८७ ॥

---

१. योगपीठात्मने चान्ते नमः शब्दं समुच्चरेत् ।
ततः कुर्यान्महादेव ऋष्यादिन्यासमेव च ।
रुद्रशक्त्या ऋषेर्विष्णुस्तथा मृत्युञ्जयस्य च ॥
२. समस्तः परिकीर्तितः—ग० ।
३. सर्वेषां मन्त्रतत्त्वानां छादनाद् वृन्द उच्यते—ग० ।
४. भाषणात्प्रबलात्तथा—ग० । ५. देवतातत्त्वतां न्यसेदिति—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मूके गुह्ये बीजन्यासं शक्तिन्यासं तु पादयोः ।
सर्वाङ्गे कीलकन्यासमाचरेत्[१] यत्नतः सुधीः ॥ ८८ ॥
शिवशक्त्यात्मकन्यासं [२]शिरस्येव समाचरेत् ।
शिरसि प्राणरक्षायै महाविष्णुऋषये नमः ॥ ८९ ॥
मुखे पङ्क्तिच्छन्दसे वै नमःशब्दं समुच्चरेत् ।
हृदि महारुद्राय शक्तियुक्ताय संवदेत् ॥ ९० ॥
देवतायै नमः शब्दं करन्यासं ततश्चरेत् ।

बीज का स्थान गुह्य में होने के कारण तथा मौन रहने के कारण मन्त्र के बीज से गुह्य (लिङ्ग) पर तथा शक्ति से पैर में न्यास करना चाहिए । इसी प्रकार सुधी साधक कीलक से प्रयत्नपूर्वक सर्वाङ्ग न्यास करे । 'शिवशक्त्यात्मक' न्यास केवल शिरःप्रदेश में ही करे । शिर में प्राण रक्षा के लिए 'महाविष्णु ऋषये नमः' इस मन्त्र से न्यास करे । पंक्तिश्छन्दसे नमः' उच्चारण कर मुख पर न्यास करे । 'महारुद्राय शक्तियुक्ताय देवतायै नमः' ऐसा उच्चारण कर हृदय पर न्यास करे । तदनन्तर करन्यास करे ॥ ८८-९१ ॥

ततोऽङ्गन्यासमाकृत्य ध्यानं कुर्यात् प्रयत्नतः ॥ ९१ ॥
वह्निना दीर्घबीजेन मन्त्रस्याङ्गक्रियां चरेत् ।
रुद्रध्यानं प्रवक्ष्यामि ध्यानाद् भवति भूपतिः ॥ ९२ ॥

फिर षडङ्गन्यास कर प्रयत्नपूर्वक मन्त्र देवता का ध्यान करे । वह्नि (र) से इसका दीर्घ बीज 'रां रीं रूं रैं रौं रः' इससे मन्त्रपूर्वक अङ्गन्यास की क्रिया करे । अब रुद्र का ध्यान कहती हूँ, क्योंकि ध्यान से साधक राजा हो जाता है ॥ ९१-९२ ॥

रौद्रं रौद्रात्मकं तं प्रकृतिपुरुषं गंभीरगीताभिधानं
शूलं खड्गं दधानं वरमभयकरं पद्ममेकं प्रचण्डम् ।
सञ्चारं रश्मिजालं शशिशतकिरणं कामधेनुस्वरूपं
ध्यायेद्रौद्रीं स्वशक्तिं [३]प्रलयमयतनुं सूर्यकोटिप्रकाशम् ॥ ९३ ॥

रुद्र का ध्यान—रौद्र, रौद्रात्मक, प्रकृतिपुरुष स्वरूप, गम्भीर गीतों एवं स्तुतियों से जिनका अभिधान किया जाता है, जिन्होंने अपने हाथ में शूल, खड्ग, वर, अभय तथा एक पद्म धारण किया है, जो प्रचण्ड हैं, जिनके संचरण का रश्मि जाल सैकड़ों चन्द्रमा के समान दिशाओं में फैल रहा है, जिनकी अपनी रौद्री शक्ति प्रलयमय शरीर वाली है तथा जिनके शरीर का प्रकाश करोड़ों सूर्यों के समान कान्तिमान् है उस रुद्र का ध्यान करना चाहिए ॥ ९३ ॥

एवं ध्यात्वा [४]सुमनसैश्च सम्पूज्यार्घ्यं विधिञ्चरेत् ।
कृत्वार्घ्यं रुद्रमन्त्रेण पीठपूजां समाचरेत् ॥ ९४ ॥

---

१. कीलकन्यासं शिवन्यासं समाचरेत्—क० ।
२. शिवषोढा समाचरेत्—क० ।—शिवश्च शक्तिश्च आत्मा यस्य, तादृशं न्यासं शिरस्येव समाचरेत् । ३. प्रणय—ग० । ४. मानसैश्चेति—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इस प्रकार फूल लेकर ध्यान करने के पश्चात् पूजन कर अर्घ्य प्रदान करे । यह अर्घ्य प्रदान रुद्रमन्त्र से करे, तदनन्तर पीठपूजा करे ॥ ९४ ॥

वामा ज्येष्ठा तथा रौद्री काली[१]कलपदादिका ।
विकरण्याक्षरा[२] प्रोक्ता बलादिविकरण्यथ ॥ ९५ ॥
बलप्रमथनी पश्चात् सर्वभूतदमन्यथ ।
मनोन्मनीति[३] सम्प्रोक्ताः शिवस्य पीठशक्तयः ॥ ९६ ॥

१. वामा, २. ज्येष्ठा, ३. रौद्री, ४. काली, ५. कलविकरिणी, ६. बलविकरिणी, ७. बलप्रमथनी, ८. सर्वभूतदमनी एवं ९. मनोन्मनी—ये रुद्र की पीठशक्तियाँ हैं ॥ ९५-९६ ॥

पूजयेद्[४] गन्धपुष्पाद्यैः पीठशक्तिः क्रमेण तु ।
प्रणवादि नमोऽन्तेन पूजा कार्या विधानतः ॥ ९७ ॥

इन पीठ शक्तियों की गन्ध एवं पुष्पादि से क्रमशः पूजा करनी चाहए । आदि में प्रणव, तदनन्तर सबके अन्त में नमः (यथा ॐ वामायै नमः) पद का उच्चारण कर विधान पूर्वक पूजा करनी चाहिए ॥ ९७ ॥

पुनर्ध्यात्वा च पाद्यार्घ्यैरावाह्य परिपूजयेत् ।
पाद्यमर्घ्यमाचमनीयं स्नानीयं पुनराचमनम् ॥ ९८ ॥
गन्धपुष्पबिल्वदलैः[५] पूर्वावरणमर्चयेत् ।
वं[६] हृदयाय नम इत्यादिषडङ्गपूजनम्[७] ॥ ९९ ॥

इसके बाद पुनः ध्यान कर एवं उनका आवाहन कर पाद्य एवं अर्घ्य आदि उपचारों से पूजन करे । पाद्य, अर्घ्य, आचमनीय, स्नान, पुनराचमन, गन्ध, पुष्प, बिल्वपत्रों से पूर्वावरण का पूजन करे । फिर 'वं हृदयाय नमः' से षडङ्गपूजन करे ॥ ९८-९९ ॥

मध्ये चतुर्दिक्षु चैवं शेषे वारद्वयं वदेत्[८] ।
इन्द्रादीन् लोकपालांश्च पूजयित्वा ततोऽर्चयेत् ॥ १०० ॥
वज्रादींश्च महाकाल धूपदीपैर्निवेदयेत् ।
नैवेद्यं [९]बहु कृत्वा (च) पानार्थं जलदानकम् ॥ १०१ ॥
शरीरशोधनं कृत्वा प्राणायामं ततश्चरेत् ।
जपेत् शतत्रयं मन्त्री विशुद्धः शुद्धचेतसा ॥ १०२ ॥

---

१. कलपदादिका—ग० ।
२. विकरण्यान्तया प्रोक्ताबलादिविकरण्यथा—क० ।
३. मन्मयीति स ..... क० ।
४. पूजयेन्नन्दपुष्टाद्यैरिति—ख० । पूजयेन्नन्दपुष्पाद्यैरिति—ग० ।
५. गन्धञ्च त्रपुषं च बिल्वदलानि चेति द्वन्द्वः ।
६. वां—क० ।
७. पूजम्बरेदिति—क० ।
८. भवेदिति—क० ।
९. वन्दनमिति—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अष्टोत्तरं योजयित्वा गजान्तकसहस्रकम् ।
अथवाष्टोत्तरशतं जप्त्वा समर्पणं चरेत् ॥ १०३ ॥

मध्य में, चारो दिशाओं में तथा शेष चारों आग्नेयादि कोणों में दो बार उच्चारण कर न्यास करे । इसके बाद इन्द्रादि लोकपालों का पूजन कर अर्चन करे । फिर हे महाकाल ! इन्द्रादि दिक्पालों के वज्रादि आयुधों को भी धूप दीपादि निवेदन करे । अनेक प्रकार के बहुत से नैवेद्य प्रदान कर पीने के लिए जल देवे । इसके बाद शरीर शुद्ध कर प्राणायाम करे, फिर चित्त शुद्ध कर विशुद्ध साधक तीन सौ जप करे । फिर गजान्तक (सदाशिव) के १००८ मन्त्र का जप करे अथवा मात्र १०८ संख्या में जप कर उसे देवता को समर्पण कर देवे ॥ १००-१०३ ॥

प्राणायामत्रयं कुर्यान्निजमन्त्र [१]प्रसिद्धये ।
ततः प्रणाममाकुर्यात् शक्तिचैतन्यहेतुना ॥ १०४ ॥

फिर अपने मन्त्र की विशेष सिद्धि के लिए तीन प्राणायाम करे, फिर शक्ति को चैतन्य करने के लिए रुद्र को इस प्रकार प्रणाम करे ॥ १०४ ॥

नमो रुद्राय देवाय कोटिसूर्येन्दुमूर्त्तये ।
सर्वाय ज्ञानदानाय नमस्ते शूलधारिणे ॥ १०५ ॥
नमस्ते कालरुद्राय कालाय वेदरूपिणे ।
वेद[२]मार्गप्रदर्शाय शत्रुसंक्षयकारिणे ॥ १०६ ॥
रौद्राय [३] शक्तियुक्ताय शङ्कराय नमो नमः ।
चतुर्भुजाय वेदाय महाकाशस्वरूपिणे ॥ १०७ ॥

करोड़ों सूर्य तथा करोड़ों चन्द्रमा की मूर्ति वाले रुद्र देव को नमस्कार है, सर्वस्वरूप, ज्ञानदाता, त्रिशूलधारी रुद्र को नमस्कार है, कालरुद्र को नमस्कार है, काल तथा वेदस्वरूप रुद्र को नमस्कार है, वेदमार्ग का प्रदर्शन करने वाले तथा शत्रुओं का विनाश करने वाले रुद्रदेव को नमस्कार है । रौद्र शक्ति से युक्त सदाशिव को बारम्बार नमस्कार है । चतुर्भुज वेद महाकाशस्वरूप रुद्रदेव को नमस्कार है ॥ १०५-१०७ ॥

वरपद्मशूलखड्गधारिणे [४]ब्रह्मणे नमः .... ।
रुद्रशक्त्यर्चनं कृत्वा महारुद्रेण संयुतम् ॥ १०८ ॥
मणिपूरे दृढो[५] याति सत्यं सत्यं कुलेश्वर ।
शक्त्यर्च्चनविधिं वक्ष्ये मूलमन्त्रेण पूजनम् ॥ १०९ ॥

वर, पद्म, शूल एवं खड्ग धारण करने वाले ब्रह्मस्वरूप रुद्र के लिए नमस्कार है ।

---

१. प्रवृद्धये—क० ।
२. प्रज्ञानायेति—ग० । वेदैरुक्तो मार्गः, वेदमार्गः, तस्य प्रदर्शाय (दर्शकाय) इति षष्ठीतत्पुरुषसमासः ।
३. विद्रायेति—ग० ।
४. धारिणेयनमोनमः—ग० ।
५. दृढा—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महारुद्र के साथ रुद्रशक्ति की अर्चना कर, हे कुलेश्वर ! साधक मणिपूर नामक चक्र में शीघ्रता से प्रवेश कर जाता है ।

अब मैं **रुद्र शक्तियों की अर्चना का प्रकार** कहती हूँ । प्रथम शक्ति का मूलमन्त्र से पूजन करे ॥ १०८-१०९ ॥

सर्वत्र कारयेन्मन्त्री अष्टैश्वर्यजयाय च ।
आदौ ऋषिन्यासकार्यं वक्ष्यामि शृणु तत्त्वतः ॥ ११० ॥

मन्त्रज्ञ साधक अष्टैश्वर्यों पर विजय प्राप्त करने के लिए सर्वत्र न्यास करे । हे शङ्कर ! सर्वप्रथम **ऋषिन्यास-कर्म** को कहती हूँ उसे सुनिए ॥ ११० ॥

शिरसीह रुद्रशक्तिर्महाविष्णुपदं ततः ।
ऋषये नम उच्चार्य मुखे हस्तं नियोजयेत् ॥ १११ ॥
पङ्क्तिछन्दसे नमश्च हृदि हस्तं नियोजयेत् ।
महारुद्राणीति पदं लाकिनीपदमेव च ॥ ११२ ॥
त्रिशक्त्यन्ते महाविद्या देवतायै नमस्ततः ।
गुह्ये ॐ पदमुच्चार्य निजबीजाय ते नमः ॥ ११३ ॥
सर्वाङ्गे सकलायैव वज्राय कीलकाय च ।
नमः पदं समुच्चार्य ऋष्यादिन्यासमेव च ॥ ११४ ॥

रुद्रशक्ति महाविष्णुऋषये नमः शिरसि, पंक्तिश्छन्दसे नमः मुखे, महारुद्राणी लाकिनी त्रिशक्ति महाविद्यादेवतायै नमः हृदि, ॐ निजबीजाय ते नमः गुह्ये, सकलाय वज्राय कीलकाय नमः सर्वाङ्गे । इस प्रकार से मन्त्रों का उच्चारण कर ऋष्यादिन्यास करे ॥ १११-११४ ॥

रुद्रवत्सकलं कार्यं कराङ्गन्यासकर्मणि ।
आदा[1]वृष्यादिकन्यासः करशुद्धिस्ततः परम् ॥ ११५ ॥

करन्यास में तथा अङ्गन्यास में रुद्रन्यास के समान सारी क्रिया करे । प्रथम ऋष्यादिन्यास कर उसके बाद कर की शुद्धि करे ॥ ११५ ॥

अङ्गुलिव्यापकन्यासो हृदादिन्यास एव च ।
रुद्रशक्तिमहाषोढान्यासञ्च तदनन्तरम् ॥ ११६ ॥
मन्त्रन्यासं ततः कृत्वा व्यापकन्यासमाचरेत् ।
तालत्रयञ्च दिग्बन्धः प्राणायामस्ततः परम् ॥ ११७ ॥
ध्यानं कुर्याद्विशेषेण रुद्रशक्त्या महाप्रभो ॥ ११८ ॥

अंगुलिन्यास, व्यापकन्यास, हृदादिन्यास, रुद्रशक्तिन्यास इसके अनन्तर महाषोढान्यास, फिर मन्त्र न्यास कर व्यापक न्यास करे । इसके बाद हे महाप्रभो ! तीन बार ताली बजाकर प्राणायाम कर, रुद्रशक्ति का विशेष रूप से ध्यान करे ॥ ११६-११८ ॥

---

१. आदावङ्गादिन्यासः—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रुद्राणीं रुद्रकान्तां नवरसजडितां कुङ्कुमाशक्तगात्रां[१]
लोकेशीं षड्भुजान्तां [२]त्रिभुवनयजितां कोटिसौदामिनीभाम्।
पद्मस्थां पद्महस्तां वरभयकरां खड्गशक्तिं दधानां
ध्यायेद् रौद्रीं [३]त्रिनेत्रां शवदमनशशिश्रेणिभूषामलाङ्गीम्[४]॥ ११९ ॥

रुद्राणी का ध्यान—जिनका शरीर कुंकुम से विभूषित है, नवों रसों से जो परिपूर्ण हैं, रुद्रकान्ता होने से रुद्राणी हैं, जिन लोकेशी की ६ भुजाएं हैं, तीनों लोकों के द्वारा जिनका यजन किया जाता है, जिनके शरीर की आभा करोड़ों विद्युत् के समान है, कमल पर स्थित रहने वाली, हाथ में कमल, वर, अभय, खड्ग तथा शक्ति धारण किए हुए हैं ऐसी त्रिनेत्र शव को दबा कर स्थित रहने वाली, चन्द्रमा के समान स्वच्छ भूषण धारण किए हुए रुद्र की शक्ति रौद्री का ध्यान करना चाहिए ॥ ११९ ॥

रुद्रवत् पूजनं कार्यं रुद्रशक्त्याश्च[५] शङ्कर ।
दशोपचारैः पूजा वा तथा पञ्चोपचारकैः ॥ १२० ॥
अष्टादशोपचारैर्वा षोडशाद्युपचारकैः ।
अलाभे तु प्रकर्त्तव्यं मानसेन निवेदयेत् ॥ १२१ ॥

हे शङ्कर ! रुद्रशक्ति का पूजन रुद्र पूजन के समान ही करना चाहिए । यह पूजा चाहे दश उपचारों से, चाहे पाँच उपचारों से, अथवा अष्टादश उपचारों से, अथवा षोडश उपचारों से करनी चाहिए । यदि कोई उपचार उपलब्ध न हो तो साधक मात्र मानसोपचारों से ही निवेदन कर पूजन करे ॥ १२०-१२१ ॥

सर्वत्र मानसं कार्यं कोटि कोटिगुणं भवेत् ।
पूजां समाप्य विधिना जलं दत्वा जपादिके ॥ १२२ ॥
प्राणायामत्रयं कृत्वा जप्त्वाष्टोत्तरकं शतम् ।
सहस्रं वा मुहुर्जप्त्वा अष्टोत्तरसमन्वितम् ॥ १२३ ॥
जपं समर्पयेद्विद्वान् गुह्यातिगुह्यमन्त्रकैः ।
प्राणायामत्रयं पश्चात् कुर्यात् साधकसत्तमः ॥ १२४ ॥

अथवा सर्वत्र मानसोपचार से ही पूजन करे । क्योंकि मानसोपचार के पूजन से करोड़ों गुना फल प्राप्त होता है, इस प्रकार विधानपूर्वक पूजा समाप्त कर जपादि के अन्त में जल देकर तीन प्राणायाम कर १०८ की संख्या में अथवा १००८ की संख्या में जपकर विद्वान् साधक भगवती के हाथ में 'गुह्याति गुह्यगोत्विं' इस मन्त्र से जप समर्पण कर देवे । फिर साधकोत्तम तीन प्राणायाम करे ॥ १२२-१२४ ॥

---

१. कुङ्कुमेनासक्तं गात्रं यस्याः सा । २. महितामिति—ख० ।
३. शरदमल—क० ।
४. अनङ्गामिति—क० । शवानां दमनी, शशिनां श्रेणयो भूषा यस्याः सा, अमलानि अङ्गानि यस्याः सा । त्रयाणां कर्मधारयद्वयम् । ५. रुद्रशक्त्या चेति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वन्दनं भक्तियुक्तेन कुर्याद् योगादिसिद्धये ।
महारौद्र नमस्तेऽस्तु लाकिन्यै ते नमो नमः ॥ १२५ ॥
शान्त्यै तुष्ट्यै नमो नित्यं दुर्गायै[१] ते नमो नमः ।
रुद्रशक्त्यै नमो नित्यं मणिपूरनिवासिनी ॥ १२६ ॥
अष्टसिद्धिं योगसिद्धिं [२]देहि तुभ्यं नमो नमः ।
सर्वग्रन्थिछेदिकायै परब्रह्मस्वरूपिणी[३] ॥ १२७ ॥
मां रक्ष पालय त्वं हि मणिपूरे नमो नमः ।
प्रणम्य विधिनानेन पूजासमापनञ्चरेत् ॥ १२८ ॥

योग की सिद्धि के लिए भक्ति के साथ महारुद्र तथा लाकिनी की इस प्रकार वन्दना करे । महारुद्र आपको नमस्कार है, लाकिनी आपको बारम्बार नमस्कार है । शान्ति तथा तुष्टि आपको नित्य नमस्कार है, दुर्गा आपको बारम्बार नमस्कार है, मणिपूर में निवास करने वाली रुद्रशक्ति को नित्य नमस्कार है । हमें अष्टसिद्धि तथा योगसिद्धि प्रदान कीजिए । आपको बारम्बार नमस्कार है । परब्रह्मस्वरूपिणी, सर्व ग्रन्थियों की छेदिका देवी आपको नमस्कार है ।

हे देवि ! आप मेरी रक्षा कीजिए, मेरा पालन कीजिए, मणिपूर में आपको नमस्कार है, इस प्रकार महारौद्र ... ... मणिपूरे नमो नमः पर्यन्त श्लोक पढकर अन्त में प्रणाम कर पूजा समाप्त करना चाहिए ॥ १२८ ॥

पुनस्तत्र पूजयेद् वै प्रासादाख्यं महाप्रभुम् ।
तथा मृत्युञ्जयं[४] देवं मणिपूरे प्रपूजयेत् ॥ १२९ ॥
प्राणायामादिकं कृत्वा श्रीकण्ठन्यासमाचरेत् ।
पूर्णोदर्यादिसहितं[५] कृत्वा पीठं न्यसेत्सुधीः ॥ १३० ॥
पीठमनुं प्रविन्यस्य ऋष्यादिन्यासमाचरेत् ।
ऋषिरस्य [६]वासुदेवः पङ्क्तिश्छन्द उदाहृतम् ॥ १३१ ॥

इसके बाद पुनः प्रासाद नामक महाप्रभु की तथा मृत्युञ्जय देव की मणिपूर में पूजा करे । फिर प्राणायाम कर पूर्णोदरी आदि शक्तियों के सहित श्री कण्ठादि न्यास करे । तदनन्तर सुधी साधक पीठन्यास करे, (द्र० ४७, ७०-७३) । पीठ न्यास के पश्चात् ऋष्यादिन्यास करे । वासुदेव इसके ऋषि हैं तथा पंक्ति छन्द है ॥ १२९-१३१ ॥

सदाशिवो देवता च अङ्गुलिन्यासमाचरेत् ।
हामङ्गुष्ठाभ्यां नमः पश्चात् ह्रीं तर्जनीभ्यां[७] ततः परम् ।
खां नमः पदमन्ते च षड्दीर्घभाजयान्वितम् ॥ १३२ ॥

---

१. श्रद्धायै इति—ख० । २. तस्यै इति—ख० ।
३. परं च तद् बह्म चेति परबह्म तस्य स्वरूपम् तदस्ति यस्यां सा ।
४. मृत्युं जयति, इति पूर्वपदस्य मुमागमः । ५. पूर्णादिव्यादिसहितमिति—ख० ।
६. वामदेव—ख० । ७. तर्जनीपदं ततः—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इसके सदाशिव देवता हैं । इसके बाद अंगुलिन्यास इस प्रकार करे । 'हां अंगुष्ठाभ्यां नमः, ह्रीं तर्जनीभ्यां नमः' इसके बाद 'खां नमः' से सभी अंगुलियों पर न्यास करे । अन्त में ६ दीर्घ युक्त (खां खीं खूं खैं खौं खः) से न्यास करे ॥ १३२ ॥

एवं करन्यासमाकार्यं विधानेन समाचरेत् ।
शूद्रस्तु एतत्पर्यन्तं कार्यं होमादिकं च यत् ॥ १३३ ॥

इस प्रकार विधानपूर्वक करन्यास करे । शूद्र को मात्र इतना ही करना चाहिए, होमादि न करे । इसी प्रकार हे नाथ ! स्त्री वर्गों के लिए भी होम कार्य वर्जित है ॥ १३३ ॥

न कुर्यात् पार्वतीनाथ तथा [1]स्त्रीलोक इत्यपि ।
यदि ज्ञानी भवेद् देव स देवो न तु मानुषः ॥ १३४ ॥
चाण्डालादीनि वा जातौ [2]स्थितो ब्राह्मणोत्तमः ।
ज्ञानवान् [3]वादसंवादे वर्जितो न्यासमाचरेत् ॥ १३५ ॥
न्यासस्तन्मयता बुद्धिः सोऽहंभावेन पूजयेत् ।
स एव ज्ञानी परमो वेदशास्त्रविशारदः ॥ १३६ ॥

हे देव ! साधक यदि ज्ञानी हो जावे तो वह देवता ही है, मनुष्य नहीं । वह चाण्डाल कुल में उत्पन्न होकर भी ब्राह्मणोत्तम है, ज्ञानवान् साधक विवाद संवाद न करके न्यास करे । न्यास करने वाला साधक 'सोऽहं' इस प्रकार की तन्मय बुद्धि वाला होना चाहिए । वही परमज्ञानी तथा वेदशास्त्र का विशारद है ॥ १३४-१३६ ॥

न्यासपूजादिकं तस्य सर्वदा नात्र संशयः ।
यावद्देहे ह्यहंबुद्धिस्तावन्मरणधारकः[4] ॥ १३७ ॥
तद्वर्जितो [5]मृत्युजेता न्यासपूजादिकं कृतः ।
षड्दीर्घभाजा बीजेन [6]हकारेण सबिन्दुना ॥ १३८ ॥
करयोरंगुलिद्वन्द्वं [7]विन्यसेत् संक्रमेण तु ।
ईशानाद्याः पञ्चमूर्त्तीर्विन्यसेत् साधकोत्तमः ॥ १३९ ॥

उसका न्यास तथा पूजादि सर्वदा चलता है इसमें संशय नहीं । जब तक देह में अहं बुद्धि है तब तक मरण का भय बना हुआ है । जिसने अहं भाव से वर्जित हो कर सोऽहंभाव से न्यासपूजादि क्रिया की है वह मृत्यु को जीतने वाला है । षड्दीर्घ से तथा बिन्दु से युक्त हकार बीज (हां ह्रीं हूं हैं हौं हः) से दोनों हाथों की दो दो अंगुलियों से क्रमशः उत्तम साधक ईशानादि पाँच मूर्तियों का न्यास करे ॥ १३७-१३९ ॥

---

१. तथास्त्रिलोक इत्यपि—ख० । २. स्थिरो वेति—ख० ।
३. रायसंवाद—ग० ।
४. धारण—ग० । मरणं धरतीति, मरणधारकः । यावद्देहे अहंबुद्धिस्तावद् जननं मरणं च।
५. चेता—ग० । ६. हःकारेण—ख० ।
७. दग्ध ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततः कुर्यान्महादेव ऊर्द्ध्वः प्राग्दक्षिणोत्तरे ।
मुखेषु विन्यसेन्मन्त्री चाङ्गुलिभिः परस्परम् ॥ १४० ॥

हे महादेव ! ऊपर पूर्व दक्षिण तथा उत्तर वाले मुखों पर परस्पर अंगुलियों द्वारा प्रयत्नपूर्वक उन-उन बीजों से इस प्रकार न्यास करे ॥ १४० ॥

तत्तद्बीजैः प्रयत्नेन तत्तन्मूर्त्तीः प्रविन्यसेत् ।
अङ्गुष्ठयोः शेषभागे हौँ ईशानाय ॐ नमः ॥ १४१ ॥
षड्दीर्घभाजाबीजेन हकारेण सबिन्दुना ।
तत्पुरुषमघोरञ्च वामदेवं ततः परम् ॥ १४२ ॥
सद्योजातं क्रमेणैव अङ्गुली[१] द्वे ततः परम् ।
विन्यसेत्साधकश्रेष्ठो नमोऽन्तं परमेश्वर ॥ १४३ ॥

छः दीर्घयुक्त बिन्दु के सहित हकार बीज से (हां हीं हूँ हैं हौं हः) 'हौं ईशानाय ॐ नमः' से दोनों अंगुष्ठ रखकर शिरोभाग में न्यास करे । इसी प्रकार तत्पुरुष अघोर तथा वामदेव, इसके बाद सद्योजात मुखों पर भी दो दो अंगुलियाँ रखकर नमोन्त पद से हे परमेश्वर ! साधक श्रेष्ठ न्यास करे । यथा 'हां हीं हूं हैं हौं हः हौं तत्पुरुषाय ॐ नमः' शिरसि इत्यादि ॥ १४१-१४३ ॥

शिरोवदनहृद्गुह्यपादेषु[२] विन्यसेत्सुधीः ।
तत्तदङ्गुलिभिश्चैव[३] तत्क्रमेण प्रविन्यसेत् ॥ १४४ ॥

यह न्यास क्रमशः मूर्तियों के शिर, मुख, हृदय, गुह्य तथा पाद स्थान में उन-उन दो दो अंगुलियों से एक एक स्थान के क्रम से साधक श्रेष्ठ करे ॥ १४४ ॥

पञ्चमूर्त्तीर्न्यसेन्नाथ तत्प्रकारं शृणुष्व तत् ।
ईशानादिस्वबीजं तु प्रकारेण प्रविन्यसेत् ॥ १४५ ॥

हे नाथ ! अब जिस प्रकार पञ्चमूर्ति का न्यास करना चाहिए उस प्रकार को सुनिए । ईशानादि मूर्तियों में उनके बीज से न्यास करना चाहिए ॥ १४५ ॥

शूद्रः कुर्यान्न्यासजालमेतत्[४] पर्यन्तमेव हि ।
तत ऊर्ध्वप्राग्दक्षिणपश्चिमोत्तरसंमुखे ॥ १४६ ॥
ईशानस्य पञ्चकला ब्रह्मऋग्[५] वेदसंयुताः ।
पञ्चपादादिका नाथ प्रणवादिनमोऽन्तिकाः ॥ १४७ ॥

शूद्र मात्र इतने ही पर्यन्त न्यास करे । इसके बाद रुद्र के ऊर्ध्व, पूर्व, दक्षिण, पश्चिम

---

१. अङ्गुलिषु परस्परम्—ग० ।
२. शिरसि वदने हृदि गुह्ये पादे इति इतरेतरयोगद्वन्द्वसमासः ।
३. एतत्पद्यार्ध—ख० पुस्तके नास्ति ।
४. एतत्पद्मान्तमेवहीति—ख० ।
५. नित्यमृग्वेदसंयुताः—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तथा उत्तर वाले मुख पर न्यास करना चाहिए। (१) **ईशान की पाँच कलायें** हैं, जो ऋग्वेद की ऋचाओं से संयुक्त हैं। हे नाथ ! उसमें पाँच पद हैं तथा उसके आदि में प्रणव एवं अन्त में 'नमः' पद है ॥ १४६-१४७ ॥

ईशानं सर्वविद्यानां ॐ नलिन्यै[१] ततः परम् ।
कलायै नम एवापि सर्वत्रैवं क्रमेण तु ॥ १४८ ॥
ईश्वरः सर्वभूतानां [२]तदङ्गं पदकं ततः ।
दयायै कलायै नमश्चापि ब्रह्मादिपदं ततः ॥ १४९ ॥
ॐ ब्रह्मेष्टदायै चान्ते कलायै नम इत्यपि ।
ततः शिवोऽस्तु [३]मे पदं ॐ सावित्र्यै पदं वदेत् ॥ १५० ॥
कलायै नम एवं हि सदाशिवो[४] पदन्ततः ।
ओमन्ते चांशुमालिन्यै[५] कलायै पद इत्यपि ॥ १५१ ॥
दिङ्मुखे स न्यसेन्मन्त्री पूर्वादिक्रमयोगतः ।
तत्पुरुषस्य चतस्रः कला न्यसेत् सदा वशी ॥ १५२ ॥

१. ईशानः सर्व विद्यानां ॐ नालिन्यै नमः, इसके बाद २. कलायै नमः । सर्वत्र इसी क्रम से अर्थात् ईशानः सर्वविद्यानां कलायै नमः, फिर ३. ईश्वरः सर्वभूतानां दयायै नमः, इसी प्रकार ईश्वरः ४. सर्वभूतानां कलायै नमः से उनके अङ्ग तथा पद पर न्यास करे। इसके बाद ब्रह्मादि पद का उच्चारण इस प्रकार करे। 'ॐ ब्रह्मेष्टदायै कलायै नमः' इसके बाद शिवोऽस्तु मे 'सावित्र्यै कलायै नमः' फिर 'सदाशिवः ॐ' इसके अन्त में 'अंशुमालिन्यै कलायै' इतना कह कर दिशाओं के मुख में पूर्वादि दिशाओं के क्रम से न्यास करे। (२) तदनन्तर **तत्पुरुष की चार कला** से मन्त्रज्ञ साधक इस प्रकार न्यास करे ॥ १४८-१५२ ॥

ॐ तत्पुरुषायपदं विद्महे तदनन्तरम् ।
ॐ शान्त्यै पदस्यान्ते कलायै नम इत्यपि ॥ १५३ ॥
महादेवाय शब्दान्ते धीमहीति ततः पदम् ।
ॐ विद्यायै पदस्यान्ते कलायै नम इत्यपि ॥ १५४ ॥

पहले 'ॐ तत्पुरुषाय' पद इसके बाद 'विद्महे' पद, इसके बाद 'शान्त्यै कलायै नमः', फिर 'महादेवाय धीमहि', 'ॐ विद्यायै कलायै नमः' कहे ॥ १५१-१५२ ॥

तन्नो रुद्रः पदं पश्चात् ॐ प्रतिष्ठायै पदं लिखेत् ।
श्री[६] दुर्गायै कलायै नमश्चाथ प्रचोदयात् ॥ १५५ ॥
ॐ[७] निवृत्यै कलायै च नमः पदं समुच्चरेत् ।

---

१. शशिन्यै—ख० । २. ओमङ्गं पदकं ततः—ख० ।
३. ततः शिरोमेष्तु पदं नमोवीर्ये पदं वदेत्—ख० । सवित्रे पदं ततः—क० ।
४. सदाशिवपदं ततः—ख० । ५. चान्तमालिन्यै—ग० ।
६. ॐ कलायै नमः पश्चात् प्रचोदयात् पदं वदेत्—ख० । ७. ॐ निचुत्यै ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततोऽष्टस्थानमध्ये तु अघोराष्टकला न्यसेत् ॥ १५६ ॥

इसके बाद 'तन्नो रुद्रः ॐ प्रतिष्ठायै श्री दुर्गायै कलायै नमः', फिर 'प्रचोदयात्' कहे, फिर 'ॐ निवृत्यै कलायै नमः' इस पद का उच्चारण करे । (३) इसके बाद आठ स्थान में **अघोर की कला** का न्यास करे ॥ १५५-१५६ ॥

हृद्ग्रीवां[१] मध्यगतलं तथा नाभिषु पृष्ठके ।
तथा वक्षसि चाघोरा अष्टौ कला न्यसेत् सुधीः ॥ १५७ ॥

हृदय, ग्रीवा, नाभि, दोनों कुक्षि तथा दोनों पृष्ठभाग और वक्षस्थल ये आठ स्थान हैं, जहाँ विद्वान् साधक को अघोर की आठ कलाओं का न्यास करना चाहिए ॥ १५७ ॥

अघोरेभ्य[२] उमान्ते वै उमायै पदमुच्चरेत् ।
कलायै नम एवाथ अघोरेभ्यः पदं वदेत् ॥ १५८ ॥
ॐ मोहायै पदस्यान्ते कलायै नम इत्यपि ।
अघोरपदमुच्चार्य क्षमायै शब्दमुच्चरेत् ॥ १५९ ॥
कलायै नम[३] एवाथ घोरतरेभ्य एव च ।
ॐ निद्रायै पदस्यान्ते कलायै नम इत्यपि ॥ १६० ॥

'अघोरेभ्यः ॐ उमायै कलायै नमः', फिर 'अघोरेभ्यः ॐ मोहायै कलायै नमः', फिर 'अघोरेभ्यः' पद का उच्चारण कर 'ॐ क्षमायै' शब्द कह कर 'कलायै नमः' ('अघोरेभ्यः ॐ क्षमायै कलायै नमः') कहे । फिर 'घोरतरेभ्यः' पद के बाद 'ॐ निद्रायै' तत्पश्चात् 'कलायै नमः' ऐसा कहे ॥ १५८-१६० ॥

सर्वतः सर्वं ॐ अन्ते व्याधये शब्दमुच्चरेत् ।
कलायै नम एवाथ सर्वेभ्यः पदमुच्चरेत् ॥ १६१ ॥
ॐ मृत्यवे पदस्यान्ते कलायै नम इत्यपि ।
नमस्तेऽस्तु पदस्यान्ते ओम् क्षुधायै पदं वदेत् ॥ १६२ ॥
कलायै [४]नम एवाथ रुद्ररूपेऽथ एव च ।
ओम् कृष्णायै पदस्यान्ते कलायै नम इत्यपि ॥ १६३ ॥

फिर 'सर्वतः सर्वं ॐ व्याधये कलायै नमः' ऐसा कहे । तदनन्तर 'सर्वेभ्यः' पद कहकर 'ॐ मृत्यवे' पद के अन्त में 'कलायै नमः' का उच्चारण करे । फिर 'नमस्तेऽस्तु' पद के अन्त में 'ओम् क्षुधायै' पद कहकर 'कलायै नमः' पद का उच्चारण करे । फिर 'रुद्ररूपे' कहकर 'ओम् कृष्णायै' पद के अन्त में 'कलायै नमः' कहे ॥ १६१-१६३ ॥

---

१. अघोरा चासौ अष्टकला चेति कर्मधारयः, ततो द्वितीया, न्यसनक्रियाकर्मत । अष्टौ कला यस्यां सा ।
२. चिह्नितं श्लोकयुग्मं—ख० ।
३. मनस एवाद्योरतरेभ्य एव चेति—ख० ।
४. मनसा एव रुद्ररूपेभ्य एव चेति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वामदेवस्य देवस्य[१] त्रयोदश कला न्यसेत् ।
एतेषु स्थानपद्मेषु तत्प्रकारं शृणु प्रभो ॥ १६४ ॥
गुह्येऽण्ड[२]शेषमध्ये तु ऊरुयुग्मे ततः पदम् ।
जानुद्वये तथा जङ्घायुगले स्फिग्द्वये[३] तथा ॥ १६५ ॥
कट्यां[४] पार्श्वयुगे चैव क्रमेण भावको न्यसेत् ।

हे प्रभो ! इसके अनन्तर (४) वामदेव की १३ कलाओं का इतने स्थानों में न्यास करे। उनका स्थान इस प्रकार है—१. गुह्य, २. अण्डकोश के मध्य, ३, ४. दोनों ऊरु, ५, ६. दोंनों जानु, ७, ८. दोनों जंघा, ९, १०. दोनों स्फिग् (नितम्ब भाग), ११. कटि, १२, १३. दोनों पार्श्व भाग, भावुक साधक इतने स्थानों में न्यास करे ॥ १६४-१६६ ॥

आदौ प्रणवमुच्चार्य ततो मन्त्रं स्मरेत्सुधीः ॥ १६६ ॥
वामदेवाय शब्दान्ते नमो ज्येष्ठायशब्दतः ॥ १६७ ॥
नमो रुद्राय शब्दान्ते नमः शब्दं समुच्चरेत् ।
कालाय नम एवान्ते कलविकरणाय च ॥ १६८ ॥
नमो बलविकरणाय बलप्रमथनाय च ।

इसके बाद प्रणव का उच्चारण कर बुद्धिमान् साधक मन्त्रोच्चारण इस प्रकार करे। वामदेवाय' के बाद 'ज्येष्ठाय', फिर 'नमो रुद्राय', फिर नमः कालाय, फिर नमः कलविकरणाय, नमः बलविकरणाय और नमः बलप्रमथनाय कहे ॥ १६६-१६९ ॥

ओम् वामदेवाय नमः ओम् वज्राय ततः परम् ॥ १६९ ॥
कलायै नम एवाथ ज्येष्ठाय नम इत्यपि ।
ओम् रक्षायै पदस्यान्ते कलायै नम इत्यपि ॥ १७० ॥
रुद्राय नम ओम् रत्यै कलायै नम इत्यपि ।
कालाय नम इत्यन्ते पालिन्यै शब्दमुच्चरेत् ॥ १७१ ॥
कलायै नम इत्यन्ते पालिन्यै शब्दमुच्चरेत् ।
कामायै[५] शब्दमुच्चार्य कलायै नम एव हि ॥ १७२ ॥
विकरणाय नमोन्ते प्रणवञ्चोच्चरेद्बुधः ।
संयमिन्यै पदान्ते च कलायै नम इत्यपि ॥ १७३ ॥
बल ओम् शब्दमुच्चार्य क्रोधायैपदमुच्चरेत् ।
कलायै नम एवाथ विकलायै[६] नमस्ततः ॥ १७४ ॥

---

१. देवेश—क० । २. गुह्येऽण्डकोशमध्ये तु—ख ।
३. स्फीग्द्वय—ख० । जंघयोर्युगले, स्फिचोर्द्वयोः षष्ठीतत्पुरुषौ । नितम्बस्याधोभागः स्फिच्पदेनोच्यते । ४. कोट्याः—ग० ।
५. मायायै—ख० ।
६. विकरणाय—ख० । कस्मिन् पदे उच्चारिते किं पदमुच्चारणीयमिति व्यवस्था विहिता एषु पद्येषु ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ॐ वृद्ध्यै पदकस्यान्ते कलायै नम इत्यपि ।
बल ॐ शब्दमुच्चार्य स्थिरायै शब्दमुच्चरेत् ॥ १७५ ॥
कलायै नम एवाथ प्रमथनाय नमस्ततः ।
ॐ रौद्रपदस्यान्ते कलायै नम इत्यथ ॥ १७६ ॥
सर्वभूतदमनाय नम ॐ पदमुच्चरेत् ।
भ्रामिन्यै पदकस्यान्ते कलायै नम इत्यपि ॥ १७७ ॥
नम ॐ शब्दमुच्चार्य मोहिन्यै पदकं स्मरेत् ।
कलायै नम एवाथ उन्मनाय नमस्ततः ॥ १७८ ॥
ॐ जयायै पदस्यान्ते कलायै नम उच्चरेत् ।

'ॐ वामदेवाय नमः' ॐ वजाय कलायै १ नमः । ज्येष्ठाय नमः ॐ रक्षायै कलायै २ नमः, रुद्राय नमः ॐ रत्यै कलायै ३ नमः' फिर कालाय नमः ॐ पालिन्यै ४ कलायै नमः, ॐ कलः ॐ कामायै कलायै ५ नमः, फिर ॐ विकरणाय नमः ॐ संयमिन्यै ६ कलायै नमः' फिर ॐ बलः ॐ क्रोधायै कलायै ७ नमः, फिर ॐ विकरणाय नमः ॐ वृद्ध्यै ८ कलायै नमः । फिर ॐ बलः ॐ स्थिरायै ९ कलायै नमः । फिर ॐ प्रमथनाय नमः ॐ रौद्रयै कलायै १० नमः । फिर ॐ सर्वभूतदमनाय नमः ॐ भ्रामिन्यै ११ कलायै नमः । फिर ॐ नमः ॐ मोहिन्यै कलायै १२ नमः । तदनन्तर ॐ उन्मनाय नमः ॐ जयायै कलायै १३ नमः ॥ १६९-१७९ ॥

विमर्श—वामदेव की १३ कलाओं का न्यास इस प्रकार करना चाहिए—

१. ॐ वामदेवाय नमः ॐ वज्राय कलायै नमः, इति गुह्ये ।
२. ॐ ज्येष्ठाय नमः ॐ रक्षायै कलायै नमः, इति लिङ्गे ।
३. ॐ रुद्राय नमः ॐ रत्यै कलायै नमः, इति दक्षिणोरुमूले ।
४. ॐ कालाय नमः ॐ पालिन्यै कलायै नमः, इति वामोरुमूले ।
५. ॐ कलः नमः ॐ कामायै कलायै नमः, इति दक्षिणजानुनि ।
६. ॐ विकरणाय नमः ॐ संयमिन्यै कलायै नमः, इति वामजानुनि ।
७. ॐ बलः नमः ॐ क्रोधायै कलायै नमः, इति दक्षिणजानुवृत्ते ।
८. ॐ विकरणाय नमः ॐ वृद्ध्यै कलायै नमः, इति वामजानुवृत्ते ।
९. ॐ बलः नमः ॐ स्थिरायै कलायै नमः, इति दक्षिणस्फिग्मध्ये ।
१०. ॐ प्रमथनाय नमः ॐ रौद्रायै कलायै नमः, इति वामस्फिग्मध्ये ।
११. ॐ सर्वभूतदमनाय नमः ॐ भ्रमिन्यै कलायै नमः, इति कट्याम् ।
१२. ॐ नमः ॐ मोहिन्यै कलायै नमः, इति दक्षिणपार्श्वे ।
१३. ॐ उन्मनाय नमः ॐ जयायै कलायै नमः, इति वामपार्श्वे ।

मूल मन्त्र इस प्रकार है—ॐ वामदेवाय नमो ज्येष्ठाय नमः रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमः बलप्रमथनाय नमः सर्वभूतदमनाय नमः उन्मनाय नमः ॥ १६९-१७९ ॥

ततो न्यासं महाकाल सद्योजातस्य ताः कलाः ॥ १७९ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इसके बाद (५) हे महाकाल । 'सद्योजात' की ८ कलाओं से न्यास करे ॥ १७९ ॥

सद्योजातं[१] प्रपद्यामि ओम् वृद्ध्यै पदमुच्चरेत् ।
कलायै नम एवाथ सद्योजाताय वै नमः ॥ १८० ॥
ओम्[२] वृद्ध्यै पदकस्यान्ते कलायै नम इत्यपि ।
भवे पदे ततः पश्चाद् ओम् सद्यः पदमुच्चरेत् ॥ १८१ ॥

'सद्योजातं प्रपद्यामि ॐ वृद्ध्यै कलायै नमः', फिर 'सद्योजाताय वै नमः ॐ वृद्ध्यै कलायै नमः', फिर 'भवे' पद, उसके बाद 'ॐ सद्यः' पद का उच्चारण करे ॥ १८०-१८१ ॥

कलायै नम एवाथ अभवे ओम् ततः परम् ।
ओम् मेधायै पदस्यान्ते कलायै नम उच्यते ॥ १८२ ॥

फिर 'कलायै नमः', फिर 'अभवे ॐ ॐ मेधायै कलायै नमः कलायै नमः' कहना चाहिए ॥ १८२ ॥

ततो भजस्व मां शब्दं ओम् प्रज्ञायै पदं वदेत् ।
कलायै नम एवाथ भव ओम् शब्दमुच्चरेत ॥ १८३ ॥
प्रभायै पदमुच्चार्य कलायै नम इत्यपि ।
तद्भवाय नमः पश्चात् ओम् सुधायै नमस्ततः ॥ १८४ ॥
कलायै नम उच्चार्य न्ससेदष्टौ कलाः प्रभोः[३] ।

इसके बाद 'भजस्व मां ॐ प्रज्ञायै कलायै नमः' ऐसा कहे, फिर 'ॐ प्रभायै कलायै नमः', फिर 'तद्भवाय नमः ॐ सुधायै नमः', फिर 'कलायै नमः' कहकर सद्योजात की आठों कलाओं का न्यास करे ॥ १८३-१८५ ॥

—यहाँ तक ईशान, तत्पुरुष, अघोर, वामदेव तथा सद्योजात इन पाँच मुखों का न्यास कहा गया)

ईशानाख्यास्ततो[४] नाथ भक्तः पञ्च ऋचो न्यसेत् ॥ १८५ ॥
पञ्चाङ्गुलिषु योगेश[५] क्रमशः कामनाशनात् ।
प्रणवं पूर्वमुच्चार्य ततो मन्त्रं स्मरेत्सुधीः ॥ १८६ ॥

इसके बाद, हे नाथ ! काम के नाश करने के लिए ईशानादि पाँच ऋचाओं द्वारा पाँचों अंगुलियों पर न्यास करना चाहिए । प्रथम प्रणव का उच्चारण करे, इसके बाद सुधी साधक मन्त्रोच्चारण करे ॥ १८५-१८६ ॥

---

१. चिह्नितं पदत्रयं—ख० पुस्तके नास्ति । किन्तु ॐ वामदेवाय नमः, ॐ वज्रायै ततः परम् । कलायै नम एवाय अष्टाटा नम इत्यपि, इति पाठभेदेन सह अधिकः पाठः ।

२. ॐ रक्षायै पदस्यान्ते—ख० ।

३. प्रभा—ग० ।

४. ईशानाद्यास्ततो नाथ—क० । ४. योगेन—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ईशानः सर्वविद्यानां ईश्वरस्तदनन्तरम् ।
उच्चरेत्सर्वभूतानां ब्रह्माधिपतिरित्यपि[१] ॥ १८७ ॥
ब्रह्मणोधिपतिः पश्चात् शिवो मेऽस्तु सदाशिवः ।
प्रणवं पूर्वमुच्चार्य ततस्तत्पुरुषाय च ॥ १८८ ॥
विद्महे पदतः पश्चात् महादेवाय धीमहि ।
ततो रुद्रः पदस्यान्ते प्रचोदयात्पुनर्वदेत् ॥ १८९ ॥
प्रणवं पूर्वमुद्धृत्य ततो मन्त्रं स्मरेत् सुधीः ।
अघोरेभ्योऽथ घोरेभ्यो घोरशब्दं समुच्चरेत् ॥ १९० ॥
घोरतरेभ्य एवान्ते सर्वतः सर्वशब्दकम् ।
सर्वेभ्योऽन्ते नमस्तेऽस्तु रुद्ररूपेभ्य एव च ॥ १९१ ॥

ऋचायें इस प्रकार हैं—'ईशानः सर्वविद्यानां' के बाद 'ईश्वरः' फिर 'सर्वभूतानां ब्रह्माधिपति ब्रह्मणोधिपतिः शिवो मेऽस्तु सदाशिवोम्' (१) । इसके बाद प्रणव का उच्चारण कर तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् (२) । प्रणव का उच्चारण कर फिर इस प्रकार मन्त्रोच्चारण करे—अघोरेभ्योऽथ घोरघोरतरेभ्यः सर्वतः सर्व सर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः (३) ॥ १८७-१९१ ॥

अष्टौ स्थानेषु चैतेषु सर्वपापनिवृत्तये ।
पार्श्वयोर्हस्तयोश्चैव[२] नासिकायाञ्च मस्तके ॥ १९२ ॥
बाहुयुग्मे महावीर मणिपूरविभेदकः ।
तत्प्रकारं प्रवक्ष्येऽहं सावधानोऽवधारय ॥ १९३ ॥

इसके बाद हे महाकाल ! 'सद्योजात' की उन-उन कलाओं से सर्वपापों की निवृत्ति के लिए दोनों पार्श्व दोनों हाथ नासिका मस्तक तथा दोनों बाहुओं इन आठ स्थानों में न्यास करें, तब मणिपूर चक्र का भेदन होता है उसका प्रकार मैं कहती हूँ, सावधान हो कर सुनिए ॥ १९०-१९३ ॥

बलप्रमथनाय नमोऽन्ते च सर्वभूतपदं वदेत् ।
दमनाय नमोऽन्ते तु नमः शब्दं समुच्चरेत् ॥ १९४ ॥
उन्मनाय नमः पश्चात् पुनः प्रणवमुद्धरेत् ।
सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ॥ १९५ ॥
भवे भवेनादिभवे भजस्व मां ततः परम् ।
भवोद्भवाय शब्दान्ते नमो मन्त्रं मुदा न्यसेत् ॥ १९६ ॥
अङ्गुलीभ्यां समाहृत्य पञ्च ऋचानया प्रभो ।

---

१. अनेन क्रमेण मन्त्रस्य स्वरूपं संकेतितमस्ति ।
२. स्तनयोश्चैवेति—ख० । अस्मिन्नपि पत्रे पूर्ववदेव मन्त्रपूर्तये क्रमिकत्वव्यवस्था विहिताऽस्ति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं क्रमेण सन्नयासं कुर्यादिषु स्थलेषु च ॥ १९७ ॥
मूर्ध्निहृद्गुह्यपादेषु न्यसेदेता ऋचो मुदा ।
ततः कुर्यान्महाकाल चाङ्गन्यासान्तरं शुभम् ॥ १९८ ॥

फिर 'बलप्रमथनाय नमः' के बाद 'सर्वभूतदमनाय नमः', फिर 'नमः' शब्द का उच्चारण कर 'उन्मनाय नमः', इसके बाद प्रणव का उच्चारण कर 'सद्योजातं प्रपद्यामि सद्योजाताय वै नमः भवे भवे नादिभवे भजस्व मां भवोद्भवाय नमः' मन्त्र से दोनों अंगुलियों से उक्त इन पञ्च ऋचाओं से शिर, हृदय, गुह्यस्थान तथा दोनों पैरों में न्यास करे । इसके बाद हे महाकाल ! कल्याणकारी अङ्गन्यास इस प्रकार करे ॥ १९४-१९८ ॥

तत्प्रकारं प्रवक्ष्यामि सावधानोऽवधारय ।
वाग्भवं पूर्वमुच्चार्य कामबीजं ततः परम् ॥ १९९ ॥

अब मैं अङ्गन्यास का प्रकार कहती हूँ, सावधान होकर सुनिए । पहले वाग्भव (ऐं) उच्चारण करे, फिर कामबीज (क्लीं) का उच्चारण करे ॥ १९९ ॥

वकारं शत्रुसंयुक्तं दक्षकार्णेन्दुसंयुतम् ।
चन्द्रबीजं [1]वामनेत्रथान्तवह्निविधून्तम् ॥ २०० ॥
केवलं चन्द्रबीजं तु सविसर्गमनुं ततः ।
सर्वज्ञाय पदस्यान्ते हृदयाय नमः पदम् ॥ २०१ ॥

दक्षकर्ण (उकार), इन्दु (अनुस्वार) तथा शत्रु (?) से संयुक्त वकार, फिर चन्द्रबीज (?) वामनेत्र (ईकार) थान्त (त?) वह्नि (र) से युक्त इसके बाद केवल चन्द्रबीज (?), फिर सविसर्ग मनु (?) सर्वज्ञाय नमः, हृदयाय नमः से हृदय में न्यास करे ॥ २००-२०१ ॥

अमृते[2] पदमुच्चार्य कामबीजं ततः पदम् ।
तेजोज्वालापदं मालिनेऽन्ते च [3]क्लृप्ताय ब्रह्मणेऽपि वसेत्ततः ॥ २०२ ॥
स्वाहान्तं तत एवाथ [4]ज्वलितशिखिशब्दकम् ।
शिखायानादिबोधाय शिखायै[5] वषडित्यथ ॥ २०३ ॥
वज्रिणे वज्रहस्ताय स्वतन्त्राय पदं वदेत् ।
कवचाय तारशब्दं ततोऽन्यद् बीजमुच्चरेत् ॥ २०४ ॥
नाकारं बिन्दुसंयुक्तं वामनेत्रं सबिन्दुकम् ।
पशुशब्दं[6] तारमन्त्रं अनन्तशक्तये पदम् ॥ २०५ ॥

---

१. खान्त—ख० ।
२. अमृतं पदमुच्चार्य तेजोज्वाला पदं ततः ।
मानिनेऽन्ते च तृप्ताय ब्राह्मणः शिवमेततः ॥ ख० ।
३. तृप्ताय ब्रह्मणो शिरसे ततः—क० ।
४. जनित शिखि—ख० । ५. शिवायै षट् इत्यपि—ख० ।
६. शकारं बिन्दुसंयुक्तमधरेददलसमन्वितम् । चकारञ्च हकारञ्च दीर्घप्रणवसंयुतम् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इसके बाद 'अमृते' पद का उच्चाराण कर फिर 'तेजोजवालापद' का उच्चारण करे। 'मालिने क्लृप्ताय ब्रह्मणः शिरसे स्वाहा' से शिर का न्यास करे। 'ज्वलित शिखि शिखया नादिबोधाय शिखायै वषट्' से शिखा का, फिर 'वज्रिणे वज्रहस्ताय स्वतन्त्राय' पद का उच्चारण कर 'कवचाय हुम्' कह कर दोनों हाथों में, फिर बिन्दु दन्त समन्वित शकार सं क्षं, तदनन्तर दीर्घप्रणव (आँ) से संयुक्त चकार और हकार, इसके बाद 'पशु' शब्द, फिर 'अनन्त शक्तये' पद, इसके बाद 'नेत्रत्रयाय वौषट्' शब्द का उच्चारण कर नेत्रों में न्यास करे ॥ २०२-२०५ ॥

अस्त्राय फडिति प्रोच्य एवं विन्यस्य योगिराट् ।
मणिपूरे मनो योज्य [१]ध्यायेच्चैतन्यमुत्तमम् ॥ २०६ ॥

फिर 'अस्त्राय फट्' कहकर अस्त्रन्यास कर, योगिराज मणिपूर में मन लगाकर उत्तम चैतन्य का ध्यान करे ॥ २०६ ॥

ओम् मुक्तापीतपयोदमौक्तिकजवावर्णैर्मुखैःपञ्चभिः
त्र्यक्षै[२]रञ्चितमीशमिन्दुमुकुटं पूर्णेन्दुकोटिप्रभम् ।
शूलं टङ्ककृपाणवज्रदहनान्नागेन्द्रघण्टाङ्कुशान्
पाशं भीतिहरं दधान[३]ममिताकल्पोज्ज्वलाङ्गं भजे ॥ २०७ ॥

मोती के समान, पीतवर्ण वाला, पयोद के समान मौक्तिक के समान तथा जवा के समान लाल वर्ण वाले, पाँच मुखों से तथा तीन नेत्रों से सुशोभित, शिर पर चन्द्रमा का मुकुट धारण किए हुए, करोड़ों पूर्ण चन्द्रमा के समान प्रभा बिखेरते हुए, बाण, शूल, टङ्क, कृपाण, वज्र, अग्नि, सर्पराज, घण्टा, अंकुश, पाश तथा अभय मुद्रा को हाथों में धारण किए हुए, अनेक प्रकार के आभूषणों से विभूषित अङ्ग वाले महारुद्र का भजन करता हूँ ॥ २०७ ॥

एवं ध्यात्वा मानसोपचारैः सम्पूज्य पूजकः ।
अर्घ्यस्थापनमाकुर्यान्निज[४]मन्त्राभिशोधनम् ॥ २०८ ॥
शैवोक्तपीठमन्वन्तां पीठपूजां ततश्चरेत् ।
पुनर्ध्यात्वा समावाह्य चावाहनादिमुद्रया ॥ २०९ ॥
पञ्चपुष्पाञ्जलिदानपर्यन्तं परिपूजयेत् ।
पञ्चपुष्पाञ्जलिं दत्त्वा [५]वदनार्चनमाचरेत् ॥ २१० ॥

परतो लुप्तशब्दान्ते शक्तये पदमुच्चरेत् । नेत्रत्रयाद्य शब्दान्ते वौषट् पदमुदीरयेत् ॥
शकारं शत्रुसंयुक्तं वामनेत्रं सबिन्दुकम् । पशुशब्दं तारशब्दं वामनेत्रं सबिन्दुकम् ।
पशुशब्दं तारशब्दं अनन्तशत्रुभेपदम् ॥ ख० अधि० ।

१. ध्यायेच्चैतन्यरूपकमिति ख० ।
२. दधानमसिता—ख० । ३. त्रक्ष्यैरिति—ग० ।
४. बीजमन्त्राभिशोधकमिति—ख० ।
५. आवरणार्चनमाचरेदिति—ख० । वरुणार्चनमाचरेदिति—ग० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इस प्रकार ध्यान कर पूजा करने वाला साधक मानसोपचारों से पूजन कर उनके अपने मन्त्र से अभिमन्त्रित कर अर्घ्यस्थापन करे । शिवजी के पीठ के लिए कहे गए मन्त्र पर्यन्त मन्त्रों से पीठपूजा करे । फिर ध्यान कर आवाहन मुद्रा से रुद्र का आवाहन कर 'पञ्चपुष्पाञ्जली दान पर्यन्त' उनकी पूजा करे । इस प्रकार पाँच पुष्पाञ्जलि समर्पण करने के पश्चात् उनके मुखों की अर्चना करे ॥ २०८-२१० ॥

शिवावरुण[1]देवांश्च पूजयेत्तत् क्रमं शृणु ।
ऐशान्यां पूजयेद्विद्वान् ईशानाय नमस्ततः ॥ २११ ॥
पूर्वे ॐ तत्पुरुषाय नमः शब्दं समुच्चरेत् ।
दक्षिणे ॐ अघोराय नमः शब्दं समुच्चरेत् ॥ २१२ ॥
उत्तरे ॐ वामशब्दं देवाय नम उच्चरेत्[2] ।
पश्चिमे प्रणवं पश्चात् सद्योजाताय एव हि ॥ २१३ ॥
नमोऽन्तं पूजनं कृत्वा सर्वसिद्धीश्वरो भवेत् ।
ईशानादिचतुष्केषु [3]निवृत्तीत्यादीन् प्रपूजयेत् ॥ २१४ ॥

इसके बाद शिव के आवरण देवताओं का पूजन करे । 'ॐ ईशानाय नमः' कह कर ईशान दिशा में ईशान की, इसके बाद पूर्व दिशा में 'ॐ तत्पुरुषाय नमः' कह कर तत्पुरुष की, फिर दक्षिण दिशा में 'ॐ अघोराय नमः' कहकर अघोर की, तदनन्तर उत्तर दिशा में 'ॐ वामदेवाय नमः' कहकर वामदेव की, पश्चिम दिशा में प्रणव का उच्चारण कर 'ॐ सद्योजाताय नमः' से सद्योजात की पूजा कर साधक सर्वसिद्धिश्वर बन जाता है । इसके अनन्तर ईशानादि चारों कोणों में निवृत्यादि कलाओं का पूजन करे ॥ २११-२१४ ॥

प्रणवान्ते [4]निवृत्यै च नमश्चान्ते ततोऽर्चयेत् ।
एवं [5]प्रतिष्ठां विद्यां च शान्तिं सम्पूज्य यत्नतः ॥ २१५ ॥
प्रणवादिनमोऽन्तेन चतुर्थ्यन्तपदेन च ।
योजयित्वा महापूजाविधौ कुर्यात्[6] समर्पणम् ॥ २१६ ॥

प्रणव का उच्चारण कर इसके अनन्तर 'ॐ निवृत्यै नमः' से निवृत्ति की पूजा करे, इसी प्रकार प्रतिष्ठा, विद्या, शान्ति—इन कलाओं के नाम का चतुर्थ्यन्त कहकर आदि में 'ॐ' तथा अन्त में 'नमः' कहकर महान् पूजन करने के पश्चात् उन्हें (जप) समर्पण कर देवे ॥ २१५-२१६ ॥

दशदलस्य मध्ये तु विभाव्याष्ट[7]दलं सुधीः ।
तत्रैव पूजनं कुर्यात् अष्टाङ्गयोगसिद्धये ॥ २१७ ॥

---

१. शिवावरुणदेवाश्चेति—ग० ।
२. वामशब्दमुच्चार्य देवाय नम इत्युच्चारणीयम् अर्थात् 'वामदेवाय नमः' इत्यत्र तात्पर्यम्।
३. निवृत्त्यादीनिति—ख० ।
४. निवृत्तौ चेति—ख० ।
५. प्रतिष्ठा विद्या चेति—ख० ।
६. समर्चनमिति—ख० ।
७. द्विदलमिति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इसके बाद विद्वान् साधक दशदल के मध्य में रहने वाले आठ दलों पर ध्यानादि करके अष्टाङ्गयोग सिद्धि के लिए इस प्रकार पूजन करे ॥ २१७ ॥

प्रणवादिनमोऽन्तेन चतुर्थ्यन्तपदेन च ।
पूजयेद्देवदेवेशं गन्धपुष्पाक्षतादिभिः ॥ २१८ ॥
अनन्तेशं पूजयेद्वै तथा [1]सूक्ष्मेशमेव च ।
शिवोत्तमेशं सम्पूज्य एकनेत्रेशमेव च ॥ २१९ ॥
एकरुद्रेशमेवं हि त्रिमूर्त्तीशं ततोऽर्चयेत् ।
भक्त्या समर्चयेत्तत्र श्रीकण्ठेशं शिखण्डिनम् ॥ २२० ॥

नाम का चतुर्थ्यन्त कर, आदि में प्रणव तथा अन्त में नमः लगाकर देवदेवेश की गन्ध, पुष्प तथा अक्षतों से अनन्तेश (ॐ अनन्तेशाय नमः गन्धं समर्पयामि) इत्यादि क्रम से पूजा करनी चाहिए । सूक्ष्मेश, शिव, उत्तमेश, एकनेत्रेश, एकरुद्रेश, त्रिमूर्तीश, श्रीकण्ठेश तथा शिखण्डी की भक्तिपूर्वक अर्चन करे ॥ २१८-२२० ॥

तद्बाह्यपत्रिकाग्रेषु उत्तरादिक्रमेण तु ।
उमाद्यादेवताः पूज्याः प्रणवादिनमोऽन्तिकाः ॥ २२१ ॥
उमादेवीं समभ्यर्च्य तथा चण्डेश्वरं ततः ।
नन्दिनञ्च महाकालं गणेशं वृषभं तथा ॥ २२२ ॥
भृङ्गरीटः[2] स्कन्दपुत्रौ तद्बाह्ये क्रमतोऽर्चयेत् ।
इन्द्रादीन् लोकपालाँश्च गन्धदीपैः समर्चयेत् ॥ २२३ ॥

उसके बाहर के पत्र के अग्रभागों पर उत्तरादि के क्रम से उमादि देवताओं के नाम का चतुर्थ्यन्त कर आदि में प्रणव तथा अन्त में नमः लगाकर उत्तरादि दिशाओं के क्रम से पूजन करे । प्रथम उमा देवी की अर्चना कर तदनन्तर चण्डेश्वर की, फिर नन्दी महाकाल गणेश वृषभ, भृङ्गरीट स्कन्द पुत्र की पूजा कर, उसके बाद क्रम से इन्द्रादि लोकपालों की गन्ध दीपों से अर्चना करे ॥ २२१-२२३ ॥

वज्रादींश्च क्रमेणैव पूजयेत्साधकोत्तमः ।
धूपदीपादिनैवेद्यपानार्थं पुनराचमनम्[3] ॥ २२४ ॥
संहारमुद्रया चोर्ध्वे स्थापयेद्रुद्ररूपिणम् ।
विसर्जनान्तं तत्कर्म [4]उत्सृष्टपूजनादिकम् ॥ २२५ ॥
समाप्य विधिनानेन पूजाकर्म समापयेत् ।
प्रत्यहं मानसं जापं होममर्चनतर्पणे ॥ २२६ ॥
वर्धयेत् साधकश्रेष्ठो भक्तिभावपरायणः ।
पञ्चलक्षजपेनास्या पुरश्चरणमिष्यते ॥ २२७ ॥

---

१. शम्भुं त्रिलिङ्गकमिति ख० ।
२. भृङ्गरीटिस्कपुत्रौ—ग० ।
३. पुनराचममिति—ख० ।
४. तच्छिष्टपूजनादिकमिति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं ध्यात्वा जपेन्मन्त्रं पञ्चलक्षं मधुप्लुतैः ।
प्रसूनैः करवीरोत्थैरथवा जुहुयात् सुधीः ॥ २२८ ॥
सर्वदा मानसं कार्यं [१]द्रव्यालाभेऽनिशं चरेत् ।
तद्दशांशं [२]प्रजुहुयात्तद्दशांशञ्च तर्पणम् ॥ २२९ ॥
तद्दशांशं चाभिषेकं दशांशं विप्रभोजनम् ।
एवं जपं साधनञ्च पुरा [३]नारायणो मुनिः ॥ २३० ॥

इसके बाद उत्तम साधक पूर्वादि क्रम से इन्द्रादि लोकपालों के वज्रादि आयुधों की धूप, दीप, नैवेद्य तथा पीने के लिए पुनराचमन कराकर पूजा करे । संहारमुद्रा से सबके ऊपर रुद्र रूप वाले सदाशिव की स्थापना कर उत्कृष्ट पूजनादि कर्म विसर्जन पर्यन्त करे । इस प्रकार सारी विधि सम्पादन कर पूजा कर्म समाप्त करे । साधक श्रेष्ठ प्रतिदिन मानस जाप होम द्वारा अर्चन तथा तर्पण भक्ति भाव से युक्त होकर बढ़ाता रहे । पाँच लाख जप करने से पुरश्चरण कर्म पूर्ण होता है । नित्य प्रति इसी प्रकार से ध्यान कर पाँच लाख की संख्या में मन्त्र एवं जप कार्य पूरा करे । फिर करवीर के पुष्पों से, जो मधु में डुबोये गए हों, उनसे होम करे । यदि द्रव्य न प्राप्त हो तो यह क्रिया मानस ही करे । जप का दशांश होम उसका दशांश तर्पण उसका दशांश अभिषेक उसका दशांश ब्राह्मण भोजन करावे । इस प्रकार के जप तथा साधन से पूर्वकाल में कोई मुनि, नारायण हो गए ॥ २२४-२३० ॥

कृत्वा [४]सर्वसत्त्वमयः शीतलो योगिराड् [५]भवेत् ।
यः करोति साधनानि सोऽचिरादमरो भवेत् ॥ २३१ ॥
पूजान्ते[६] पूजाशेषे च पूजामध्यक्रमेण च ।
प्रणमेत् साधकश्रेष्ठो [७]वरुणात् पापभूपतेः ॥ २३२ ॥

जो इन साधनों को करता है वह सर्वसत्त्वमय शीतल योगिराज तथा शीघ्र ही अमर बन जाता है । पूजा के अन्त में, पूजा के प्रारम्भ में तथा पूजा के मध्य में साधक श्रेष्ठ पापराजा वरुण से मुक्ति के लिए महारुद्र को इस प्रकार नमस्कार करे ॥ २३१-२३२ ॥

ॐ[८] नमः परमकल्याण नमस्ते विश्वभावन ।
नमस्ते पार्वतीनाथ[९] उमाकान्त नमोऽस्तु ते ॥ २३३ ॥
विश्वात्मने विचिन्त्याय गुणाय निर्गुणाय च ।
धर्माय ज्ञानमोक्षाय नमस्ते सर्वयोगिने ॥ २३४ ॥

---

१. द्रव्यालाभेऽठपि संचरेदिति—ख० ।
२. चाभिषेकं दशांशं विप्रभोजनमिति—ख० । एषश्लोको—ख० पु० नास्ति ।
३. नारायणेन च—ग० ।
४. सर्वमन्त्रमय—ख० ।
५. भवेदिति—ग० ।
६. पूजाद्यैश्चैव शेषे च पूजामध्ये क्रमेण तु—ख० ।
७. वारणादिति—ख० ।
८. ओमिति—ख पु० नास्ति ।
९. उमानाथेति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पाप राशि को हटाने की विधि इस प्रकार है—ॐ परमकल्याण करने वाले रुद्र आप को नमस्कार है। विश्व द्वारा भावना किए जाने योग्य रुद्रदेव आप को नमस्कार है। हे पार्वतीनाथ ! आप को नमस्कार है। हे उमाकान्त ! आप को नमस्कार है। विश्वात्मा, अविचिन्त्य सगुण, निर्गुणस्वरूप वाले, धर्म, ज्ञान तथा मोक्षस्वरूप वाले सर्वयोगी आप रुद्र को नमस्कार है ॥ २३३-२३४ ॥

नमस्ते कालरूपाय त्रैलोक्यरक्षणाय च ।
गोलोकघातकायैव[१] चण्डेशाय नमोऽस्तु ते ॥ २३५ ॥
सद्योजाताय देवाय नमस्ते शूलधारिणे ।
कालान्ताय च कान्ताय चैतन्याय नमो नमः ॥ २३६ ॥

कालरूप आप को नमस्कार है। त्रैलोक्य की रक्षा करने वाले आप को नमस्कार है। पृथ्वी लोक का संहार करने वाले आप को नमस्कार है। चण्डेश आप को नमस्कार है। सद्योजात देवता को नमस्कार है। शूलधारी को नमस्कार है, कालान्तक को नमस्कार है, अत्यन्त सुन्दर आप को नमस्कार है। सर्वथा चेतनस्वरूप आप को नमस्कार है ॥ २३५-२३६ ॥

कुलात्मकाय कौलाय चन्द्रशेखर ते नमः ।
उमानाथ[२] नमस्तुभ्यं योगीन्द्राय नमो नमः ॥ २३७ ॥
सर्वाय सर्वपूज्याय ध्यानस्थाय गुणात्मने ।
पार्वती प्राणनाथाय नमस्ते परमात्मने ॥ २३८ ॥

सर्वथा शक्तिस्वरूप, शक्ति के उपासक हे चन्द्रशेखर ! आपको नमस्कार है, हे उमानाथ ! आपको नमस्कार है, हे योगीन्द्र ! आप को बारम्बार नमस्कार है। सर्वस्वरूप, सर्वपूज्य, ध्यान में स्थित रहने वाले गुणात्मा आप को नमस्कार है। पार्वती के प्राणनाथ परमात्मा आप को नमस्कार है ॥ २३७-२३८ ॥

एतत्स्तोत्रं पठित्वा च स्तौति यः परमेश्वरम् ।
याति [३]रुद्रकुलस्थानं मणिपूरं विभिद्यते ॥ २३९ ॥
एतत्स्तोत्रप्रपाठेन तुष्टो भवति शङ्करः ।
खेचरत्वं[४] पदं नित्यं ददाति परमेश्वरः ॥ २४० ॥

इस स्तोत्र का पाठ कर जो परमेश्वर की स्तुति करता है, वह रुद्रकुल में चला जाता है तथा मणिपूर का विभेदन तो हो ही जाता है। इस स्तोत्र के पाठ से शङ्कर प्रसन्न हो जाते हैं और संतुष्ट हुए परमेश्वर नित्य खेचरत्व पद प्रदान करते हैं ॥ २३९-२४० ॥

ततो वक्ष्ये महादेव मृत्युञ्जयविधानकम् ।
यत् कृत्वा परमब्रह्ममयो भवति साधकः ॥ २४१ ॥

---

१. त्रैलोक्यघातकायैवेति—ख० । २. उमाकान्तेति—ख० ।
३. रुद्रकुलस्थाने—ग० । ४. खेचरत्वपदमिति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मृत्युञ्जयस्य मन्त्रं वै जपते यदि मानुषः ।
कोटिवर्षशतं स्थित्वा लीनो भवति ब्रह्मणि ॥ २४२ ॥

हे महादेव ! अब इसके बाद मृत्युञ्जय का विधान कहती हूँ, जिसके करने से साधक परम ब्रह्ममय हो जाता है । यदि मनुष्य निरन्तर मृत्युञ्जय मन्त्र का जप करे तो वह करोड़ों वर्ष जीने के बाद परम ब्रह्म में लीन हो जाता है ॥ २४१-२४२ ॥

सर्वव्यापकरूपेण स तिष्ठति सदाशिव ।
तत्प्रकारं प्रवक्ष्यामि [१]सावधानोऽवधारय ॥ २४३ ॥
आदौ[२] पूजां विधानेन वक्ष्यामि सारनिर्मिताम् ।
श्रीकण्ठ[३]सपूर्णोदर्याश्च न्यासं चास्ये समाचरेत् ॥ २४४ ॥

हे सदाशिव ! ! मृत्युञ्जय मन्त्र का जापक सर्वव्यापक रूप से सर्वदा बना रहता है । उसका प्रकार कहती हूँ सावधानी से सुनिए । सर्वप्रथम साररूप से कही गई मृत्युञ्जय पूजा का विधान कहती हूँ । 'श्री कण्ठपूर्णोदरीभ्यां' आदि इस मन्त्र से मुख में न्यास करे ॥ २४३-२४४ ॥

ततो हृदयमध्ये तु स्वहस्ताङ्गुलिमुद्रया[४] ।
तद्वयान्यस्य[५] देवेश तत्प्रकाशं [६]प्रचक्ष्यते ॥ २४५ ॥
प्रणवादि नमोऽन्तेन चतुर्थ्यन्तपदेन च ।
योजयित्वा न्यसेन्मन्त्री मन्त्रभावपरायणः ॥ २४६ ॥

फिर हृदय के मध्य में अपने हाथ की अंगुलि की मुद्रा से हृदय में न्यास करे । इसी प्रकार अन्य स्थानों पर भी न्यास करे, उसको प्रकाश रूप से कहती हूँ । प्रथम प्रणव, फिर नाम का चतुर्थ्यन्त पद द्विवचन तथा अन्त में नमः पद का उच्चारण कर मन्त्रज्ञ साधक भक्तिभाव से तत्तत्स्थानों में न्यास करे ॥ २४५-२४६ ॥

आधारशक्तिमेवं हि प्रकृतितदनन्तरम् ।
कूर्ममनन्तं तत्पश्चात् पृथिवीं क्षीरसागरम् ॥ २४७ ॥
श्वेतद्वीपं ततः पश्चान्मणिमण्डपमेव च ।
कल्पवृक्षे[७] ततो नाथ विन्यसेन्मणिवेदिकाम् ॥ २४८ ॥

इसी प्रकार आधारशक्ति (ॐ आधारशक्त्यै नमः, ॐ प्रकृत्यै नमः इत्यादि) प्रकृति कूर्म, अनन्त, पृथ्वी, क्षीरसागर, श्वेत द्वीप, मणिमण्डप, कल्पवृक्ष और हे नाथ ! मणिवेदिका का न्यास करे ॥ २४७-२४८ ॥

---

१. सावधानावधारयेति—क० ।
२. आदौ[illegible]—ख० ।
३. पूर्णोदर्यश्चेति—ख० । ४. हस्ताङ्गुलीसमुद्रया—ख० ।
५. त स्वयाख्यस्येति—ख । तत्त्वायान्यस्येति—ग० ।
६. प्रचत्रते—ख । ७. कल्पवृक्षमिति—ग० ।

SRI JAGADGURU VISHWARADHYA JNANA SIMHASAN JNANAMANDAL LIBRARY
Jangamwadi Math, Varanasi
ACC No. 8512
CC-0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रत्नसिंहासनं तत्र हृदयाम्भोजमण्डले ।
दक्षवामस्कन्धभागे वामोरौ दक्षिणे तथा ॥ २४९ ॥
मुखे वामपार्श्वभागे नाभौ दक्षपार्श्वके ।
प्रणवादिनमोऽन्तेन चतुर्थ्यन्तपदेन च ॥ २५० ॥
सर्वत्र न्यासमाकुर्यात्तेषां नाम शृणु प्रभो ।
क्रमेण सर्वं कर्त्तव्यं [१]क्रमभङ्गो न चाचरेत् ॥ २५१ ॥

फिर हृदयाम्भोजमण्डल में स्थित रत्न सिंहासन के दाहिने भाग में, बायें भाग में, बायें ऊरू में, दाहिने ऊरु में, मुख में, उसके बायें पार्श्व भाग में तथा दक्षिण पार्श्व भाग में और नाभि में वक्ष्यमाण रीति से प्रथम प्रणव, फिर चतुर्थ्यन्त पद, फिर नमः लगाकर सर्वत्र न्यास करे । अब उनका नाम कहती हूँ, हे प्रभो सुनिए । यह न्यास क्रमपूर्वक जैसा कहा गया है उस रीति से करे, कहीं भी क्रमभङ्ग नहीं होना चाहिए ॥ २४९-२५१ ॥

धर्मं ज्ञानञ्च वैराग्यमैश्वर्यं तदनन्तरम् ।
अधर्ममपि चाज्ञानमवैराग्यं ततः परम् ॥ २५२ ॥
अनैश्वर्यं क्रमेणापि विन्यसेत् साधकोत्तमः ।
पुनर्वारं हृदम्भोजे न्यसेदेकमनाः सुधीः ॥ २५३ ॥

'धर्म (ॐ धर्माय नमः दक्षभागे आदि) ज्ञान, वैराग्य, ऐश्वर्य फिर अधर्म, अज्ञान अवैराग्य एवं अनैश्वर्य द्वारा साधकोत्तम न्यास करे । इसके बाद पुनः हृदयस्थित कमल पर एकाग्र मन से न्यास करे ॥ २५२-२५३ ॥

अनन्तपद्ममेवं तु [२]अं सूर्यमण्डलं तथा ।
द्विषट्कलात्मना[३] सार्धं सं सोममण्डलं तथा ॥ २५४ ॥
षोडशकलात्मानञ्च मं वह्निमण्डलं तथा ।
दशकलात्मना सार्धं सं [४]सत्वं तदनन्तरम् ॥ २५५ ॥
रं [५]बीजं रजसं तत्र तं तमसमेव च ।
आं [६]आत्मने न्यसेन्मन्त्री अं अन्तरात्मने नमः ॥ २५६ ॥
पं बीजं परमात्मानं मायाज्ञानात्मने नमः ।
इत्यन्तं न्यस्य देवेश मन्त्रसिद्धिमवाप्स्यसि ॥ २५७ ॥
मणिपूरे मन्त्रसिद्धिं सर्वसिद्धिमवाप्नुयात् ।
यः करोति सदा न्यासं ध्यानपूजापरायणः ॥ २५८ ॥

'अं सूर्यमण्डलाय द्वादशकलात्मने अनन्त पद्मं न्यसामि', फिर 'सं सोममण्डलाय

---

१. क्रमभङ्गेन चाचरेदिति—ख ।
२. तं—ख० ।
३. द्वादशकात्मना सार्य सुं सोममण्डल तथेति—ख० ।
४. सत्त्व—ग० ।
५. राजसमिति—ख० ।
६. आत्मानमिति—ख० ।

LIBRARY
Jangamwadi Math, Varanasi
ACC. No.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

षोडशकलात्मने अनन्तपद्मं न्यसामि', तदनन्तर 'मं वह्निमण्डलाय दशकलात्मने नमः अनन्तपद्मं न्यसामि', इसके बाद 'सं सत्त्वं नमः', 'रं रजसे नमः', 'तं तमसे नमः', 'आं आत्मने नमः', 'अं अन्तरात्मने नमः', 'पं परमात्मने नमः' तथा 'मां मायाज्ञानात्मने नमः' - इतने वाक्यों से न्यास करने पर हे देवेश ! आप मन्त्रसिद्धि प्राप्त करेंगे । ध्यान पूजा में निरत होकर जो इस न्यास को इस प्रकार करता है, वह साधक मणिपूर में मन्त्र सिद्धि प्राप्त कर सर्वसिद्धि प्राप्त कर लेता है ॥ २५४-२५८ ॥

वामां[१] ज्येष्ठां तथा रौद्रीं कालीं कलपदादिकाम् ।
विकरण्याह्वया युक्ता बलविकरणीं तथा ॥ २५९ ॥
बलप्रमथिनीं चैव न्यसेत् साधकसत्तमः ।
ततः सर्वभूतदमनीं मनोन्मनीं ततो न्यसेत् ॥ २६० ॥
तदुपरि न्यसेन्नाथ ॐ नमो भगवते पदम् ।
सकलगुणात्मनः[२] शक्तिं चान्ते युक्ताय पदमावदेत् ॥ २६१ ॥
अनन्ताय पदस्यान्ते योगपीठात्मने पदम् ।
नमोऽन्तोऽयं महामन्त्रः सर्वोपरि न्यसेत्सुधीः ॥ २६२ ॥

वामा, ज्येष्ठा, रौद्री काली, कलविकरिणी, बलविकरिणी, बलप्रमथनी, इसके बाद साधकोत्तम सर्वभूतदमनी फिर मनोन्मनी का न्यास करे । इसके बाद हे नाथ ! 'ॐ नमो भगवते सकलगुणात्मने शक्तियुक्ताय अनन्ताय योगपीठात्मने नमः' इस महामन्त्र से सुधी साधक सबके बाद न्यास करे ॥ २५९-२६२ ॥

ततो नाथ समाकुर्यात् साधको गतभीः स्वयम् ।
ऋष्यादिन्यासमाकुर्यात् तत्प्रकारं शृणु प्रभो ॥ २६३ ॥

इसके बाद हे नाथ ! साधक निर्भय हो कर ऋष्यादिन्यास करे । हे प्रभो ! अब उस ऋष्यादिन्यास का प्रकार सुनिए ॥ २६३ ॥

शिरसि पदमुच्चार्य कहोडऋषये नमः ।
तदुपरि ततो नाथ महाविष्णुपदं वदेत् ॥ २६४ ॥
ऋषये नम इत्युक्त्वा मुखे देवीपदं वदेत् ।
गायत्रीच्छन्दसे पश्चान्नमः शब्दं समुच्चरेत् ॥ २६५ ॥
हृदि मृत्युञ्जयायैवं दैवतायै नमः पदम् ।
ऋषिः कहोडो देव्याश्च गायत्रीच्छन्द ईरितम् ॥ २६६ ॥
मृत्युञ्जयो महादेवो देवतास्य [३]प्रकीर्तिता ।
कराङ्गन्यासकौ कुर्यात् षड्दीर्घभाजया सह ॥ २६७ ॥

---

१. वामा ज्येष्ठा तथा रौद्री काली कलपदादिकमिति—ग० ।
२. सकलगुणात्मशक्तिचान्ते भुक्ताय पदमावदेत्—ख० ।
३. प्रकीर्तितः—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सकारेण महाकाल तत्प्रकारं शृणु प्रभो।

'कहोड ऋषये नमः', इसके बाद 'महाविष्णुऋषये नमः शिरसि' ऐसा कह कर शिर, 'देवी गायत्रीच्छन्दसे नमः मुखे' से मुख पर, 'मृत्युञ्जयायै देवतायै नमः हृदि' कहकर हृदय में न्यास करे। वस्तुतः इस मन्त्र के कहोड ऋषि हैं, देवी गायत्री छन्द और मृत्युञ्जय महादेव देवता कहे गए हैं। हे प्रभो ! इसके बाद षड्दीर्घ युक्त सकार से हे महाकाल ! करान्यास एवं अङ्गन्यास करना चाहिए। उसका प्रकार सुनिए ॥ २६४-२६८ ॥

सामङ्गुष्ठाभ्यां चान्ते च नमः शब्दं क्रमेण तु ॥ २६८ ॥
एवं कराङ्गुलीन्यासं कुर्यादेव महाप्रभो।
षड्दीर्घभाजा[1] मन्त्रेण सकारेण सबिन्दुना ॥ २६९ ॥

'सां अंगुष्ठाभ्यां नमः', सीं तर्जनीभ्यां नमः' एवं 'सूं मध्यमाभ्यां नमः' इत्यादि हे महाप्रभो ! इस प्रकार कराङ्गुलीन्यास अवश्य करे। जैसा कि ऊपर बिन्दु तथा षड्दीर्घ युक्त सकार से कहा गया है ॥ २६८-२६९ ॥

कराङ्गन्यासमाकुर्यात् कुलतन्त्रक्रमेण तु।
ततो ध्यानं समाकुर्यात् शुभभावपरायणः ॥ २७० ॥

इस प्रकार तान्त्रिकों की कुल परम्परा के अनुसार साधक कराङ्गन्यास करे। फिर शुद्ध भावना से युक्त होकर महामृत्युञ्जय का ध्यान इस प्रकार करे ॥ २७० ॥

महामृत्युञ्जयध्यानम्

इन्द्वर्कानललोचनं स्मितमुखं [2]पद्मद्वयान्तास्पदं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुच्छविम्।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं[3]
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ॥ २७१ ॥

चन्द्र, सूर्य, अग्निरूप नेत्र वाले, मन्द हास्य से युक्त दो पद्मों की बीच में स्थित, मुद्रा, पाश, मृग एवं अक्षमाला से सुशोभित हाथ वाले, चन्द्रमा के समान कान्तिमान्, करोड़ों चन्द्रमा से गिरते हुए अमृत से भींगे शरीर वाले, हारादि भूषणों से प्रकाशित तथा अपनी शरीर कान्ति से विश्व को मोहित करने वाले पशुपति, मृत्युञ्जय का ध्यान करता हूँ ॥ २७१ ॥

एवं ध्यात्वा मानसोपचारद्रव्यैः प्रपूजयेत्।
अर्घ्यस्थापनमाकृत्य तत्तन्मन्त्रेण साधकः ॥ २७२ ॥
पूजयेत्पीठ[4]मन्वन्ता तत्तन्मन्त्रेण साधकः।

---

१. ब्रीजेनेति—ख०। २. पछन्वयान्तास्पदं—ग०।
३. भूषाकुलमिति—ख०।
४. एतत्पद्यत्रयं—ख पुस्तके नास्ति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुनर्ध्यात्वा समावाह्य मूलमन्त्रेण मन्त्रवित् ॥ २७३ ॥
पाद्यादिभिः पूजयेद्वै गन्धपुष्पादिशोभितैः ।
पञ्चपुष्पाञ्जलिं दत्वा परिवारान् प्रपूजयेत् ॥ २७४ ॥
केशरेष्वग्निनिर्ऋतिवाय्वीशानेषु पूजयेत् ।
मध्ये दिक्षु च तन्मध्ये सा बीजं तत्र चोच्चरेत् ॥ २७५ ॥

इस प्रकार ध्यान कर मानसोपचार द्रव्यों से महामृत्युञ्जय का मानस पूजन करे । फिर अर्घ्य स्थापित कर तत्तन्मन्त्रों से साधक पीठ का पूजन करे । फिर ध्यान कर मन्त्रवेत्ता मूलमन्त्र से पीठ पर महामृत्युञ्जय का आवाहन करे । फिर पाद्यादि, गन्ध, पुष्पादि, मङ्गलकारी उपचारों से पूजन करे । तदनन्तर पञ्च पुष्पाञ्जलि देकर उनके परिवारों की अर्चना करे । केशरों में अग्नि, नैर्ऋत्य, वायव्य एवं ईशान कोणों में, मध्य में, दिशाओं में तथा दिशाओं के मध्य में 'सां' बीज का उच्चारण करे ॥ २७२-२७५ ॥

हृदयाय नमश्चान्ते सीं बीजं तदनन्तरम् ।
शिरसे स्वाहया सार्धं सु बीजं तदनन्तरम् ॥ २७६ ॥
शिखायै वषडित्यादि सैं बीजं तदनन्तरम् ।
कवचाय पदस्यान्ते तारबीजं समुच्चरेत् ॥ २७७ ॥
सों बीजं पूर्वमुच्चार्य नेत्रत्रयाय इत्यपि ।
वौषडादिमध्यपदं चतुर्दिक्षु ततः परम् ॥ २७८ ॥
सश्चान्तेऽस्त्राय[1] शब्दान्ते फडित्येव समर्चयेत् ।
षडङ्गानि पूजयित्वा तद्बहिः प्रतिपूजयेत् ॥ २७९ ॥

'सां हृदयाय नमः' से हृदय पर, 'सीं बीजं शिरसे स्वाहा' से शिर पर, फिर 'सूं शिखायै वषट्', फिर 'सै कवचाय हुं' से दोनों बाहुओं पर, 'ॐ सौं नेत्रत्रयाय वौषट्' से दोनों नेत्रों पर, फिर 'सः अस्त्राय फट्' से चारों दिशाओं में ताली बजाते हुए न्यास करे । इस प्रकार षडङ्ग पूजन कर उसके बाहर आवरण देवताओं का पूजा करे ॥ २७६-२७९ ॥

इन्द्रादींल्लोकपालांश्च[2] वज्रादींश्च तथा प्रभो ।
धूपदीपादिनैवेद्यपानादीनि प्रदापयेत् ॥ २८० ॥
विधिना वादनं कुर्यान्मृत्युञ्जयसुतोषणात्[3] ।
विसर्जनान्तं यत्कर्म समाप्य विधिनामुना ॥ २८१ ॥
संहारमुद्रया चैव[4] हृदये चानयेद्[5] बुधः ।
प्रसन्नहृदयो भूत्वा चरणोदकमापिबेत् ॥ २८२ ॥

प्रथम इन्द्रादि लोकपालों की, उसके बाद उनके वज्रादि आयुधों की, धूप दीपादि नैवेद्य

---

१. मश्चान्ते—क० ।
२. पूजयेत्तु तथा—ख० ।
३. सुभूषणात्—ख ।
४. देवमिति—ख० ।
५. चालयेदिति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं पानी देकर पूजा करे । तदनन्तर मृत्युञ्जय की संतुष्टि के लिए विधिपूर्वक बाजा बजावे । इसी विधि से विद्वान् साधक विसर्जन पर्यन्त सारा कृत्य समाप्त कर संहार मुद्रा दिखाकर इन्हें हृदय में स्थान देवे । तदनन्तर प्रसन्न हृदय से महामृत्युञ्जय का चरणोदक ग्रहण करे ॥ २८०-२८२ ॥

एतन्मात्रेण देवेश सर्वसिद्धिं समाप्नुयात् ।
पिबामि चरणद्वन्द्वाम्भोजनिःसृतकं भजे ॥ २८३ ॥
अमरत्वं सदा देहि मृत्युञ्जय नमोऽस्तुते ॥ २८४ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे [१]मन्त्रप्रकाशो नाम सप्तचत्वारिंशः पटलः ॥ ४७ ॥

हे देवेश ! मात्र इतने विधान से ही साधक सारी सिद्धि प्राप्त कर लेता है । हे देव ! आप के चरणाम्भोज से निकले चरणोदक को मैं पी रहा हूँ आप का भजन करता रहूँ, मुझे अमरता प्रदान कीजिए । मृत्युञ्जय आपको नमस्कार है । इस प्रकार 'पिबामि ... ... नमोऽस्तुते' श्लोक पढकर मृत्युञ्जय को प्रणाम करे ॥ २८३-२८४ ॥

॥ श्री रुद्रयामल के उत्तरतन्त्र में मन्त्रप्रकाश नामक सैतालिसवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ४७ ॥

१. अष्टचत्वारिंशदिति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथाष्टचत्वारिंशः पटलः

आनन्दभैरव उवाच

श्रुतं च साधनं पुण्यं महारुद्रस्य सुन्दरि ।
मणिपूरे प्रकाशञ्च कथितं ज्ञाननिर्णयम् ॥ १ ॥
अकस्मात् सिद्धिसम्पत्तिं[1] नुतिं वद महाप्रियाम् ।
यस्य श्रवणमात्रेण पाठेन योगिनीवशम् ॥ २ ॥

आनन्दभैरव ने कहा—हे सुन्दरि ! मणिपूर में किए जाने वाले महारुद्र के पुण्यकारक साधन को मैंने सुना । इतना ही नहीं मणिपूर में होने वाले ज्ञाननिर्णय युक्त प्रकाश को (जैसा कहा उसे) मैंने श्रवण किया । अब अकस्मात् योगिनियों को प्रिय लगने वाली तथा अकस्मात् सिद्धि सम्पत्ति प्रदान करने वाली उस स्तुति को कहिए, जिसके मात्र सुनने तथा मात्र पाठ करने से योगिनी वश में हो जाती है ॥ १-२ ॥

श्रीआनन्दभैरवी उवाच

परमानन्ददेवेश योगानामधिप प्रभो ।
स्तोत्रं रुद्रस्य वक्ष्यामि सारात्सारं परात्परम् ॥ ३ ॥
यज्ज्ञात्वा योगिनः सर्वे षट्चक्रपरिभेदकाः ।
आकाशगामिनः सर्वे स्वर्गमोक्षाभिलाषुकाः[2] ॥ ४ ॥

श्री आनन्दभैरवी ने कहा—हे परमानन्द ! हे योगेश ! हे योगिजनों के पालन करने वाले ! हे प्रभो ! मैं अब महारुद्र के उस स्तोत्र को कहती हूँ, जो सभी स्तोत्रों के सार का भी सार होने से अत्यन्त उत्कृष्ट है, जिसे जानकर सभी योगी जन षट्चक्रों का भेदन कर देते हैं, तथा आकाशगामी होकर स्वर्ग में जाने की इच्छा करते हैं ॥ ३-४ ॥

महादेवसमाः सर्वे देवाश्च स्वर्गभोगिनः[3] ।
सर्वरक्षाकरं स्तोत्रं ये पठन्ति निरन्तरम् ॥ ५ ॥
ते यान्ति ब्रह्मसदनं सिद्धमुख्या महीतले ॥ ६ ॥

वे सभी महादेव के समान देवता बनकर स्वर्ग का भोग भोगते हैं । सबकी रक्षा करने वाले इस स्तोत्र का जो निरन्तर पाठ करते हैं, वे इस महीतल में श्रेष्ठ सिद्ध बन कर अन्त में ब्रह्मलोक को जाते हैं ॥ ५-६ ॥

---

१. सम्पत्तिः स्यात्त्वं वद महाप्रिये—ख० । सम्पत्तिर्येन स्यात् तद् वद प्रिये—इति जीवा० ।
२. अभिनासकाः—ग० ।
३. सर्गभोगिनः—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ॐ [१] भजामि शम्भुं सुखमोक्षहेतुं
रुद्रं महाशक्तिसमाकुलाङ्गम् ।
रौद्रात्मकं [२] चारुहिमांशुशेखरं
कालं गणेशं सुमुखाय शङ्करम् ॥ ७ ॥

महारुद्रस्तोत्र—सुख तथा मोक्ष के हेतु, अपने आधे अङ्ग में महाशक्ति को धारण करने के कारण संकुचित अङ्गो वाले, रौद्रमुख एवं चन्द्रमा धारण करने के कारण सुन्दर ललाट वाले, काल स्वरूप गणों के ईश सदाशिव को अपने सुन्दरमुख अर्थात् संमुख (अनुकूल) होने के लिए मैं उन रुद्र का भजन करता हूँ ॥ ७ ॥

मृत्युञ्जयं जीवनरक्षकं परं
शिवं परब्रह्मशरीरमङ्गलम् ।
हिमांशुकोटिच्छविमादधानं
भजामि पद्मद्वयमध्यसंस्थितम् ॥ ८ ॥

जो मुत्यु पर विजय प्राप्त करने वाले, जीवन की रक्षा करने वाले, परशिव हैं, परब्रह्मस्वरूप तथा मङ्गल स्वरूप हैं, करोड़ों चन्द्रमा के समान शोभा धारण करने वाले, दो पद्मों के मध्य में स्थित उन रुद्र का मैं भजन करता हूँ ॥ ८ ॥

सर्वात्मकं [३] कामविनाशमूलं
तं चन्द्रचूडं मणिपूरवासिनम् ।
चतुर्भुजं ज्ञानसमुद्रयाढ्यं
पाशं मृगाक्षं गुणसूत्रव्याप्तम् ॥ ९ ॥

जो सर्वात्मक हैं, कामदेव के विनाश के कारण हैं, ललाट में चन्द्रमा धारण करने वाले, मणिपूर में निवास करने वाले हैं, चार भुजा वाले तथा ज्ञान की मुद्रा से शोभित हैं । पाश, मृग, अक्षमाला तथा गुण सूत्र से व्याप्त उन रुद्र का मैं भजन करता हूँ ॥ ९ ॥

धरामयं तेजसमिन्दुकोटिं
वायुं जलेशं [४] गगनात्मकं परम् ।
भजामि रुद्रं कुललाकिनीगतं
सर्वाङ्गयोगं जयदं सुरेश्वरम् ॥ १० ॥

सब (चराचर जगत्) को धारण करने के कारण पृथ्वी स्वरूप, करोड़ों चन्द्रमा के समान तेज वाले, वायु, वरुण तथा आकाशात्मक पञ्चभूत स्वरूप हैं, लाकिनी महाशक्ति से अपने सभी अङ्गो से संयुक्त, जय देने वाले सुरेश्वर रुद्र का मैं भजन करता हूँ ॥ १० ॥

---

१. ओमिति—ख० पु० नास्ति ।
२. रौद्रार्थकं रुद्रहिमांशुशेखरं कालं कुलेशं शिवशङ्करञ्चेति—ख० ।
३. स्वार्थकमिति—ख० ।
४. गगणात्मकमिति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शुक्रं [१]महाभीमनयं पुराणं
प्राणात्मकं व्याधिविनाशमूलम् ।
यज्ञात्मकं[२] कामनिवारणं गुरुं
भजामि विश्वेश्वरशङ्करं शिवम् ॥ ११ ॥

जो शुक्र स्वरूप हैं, महाभीम शरीर धारण करने वाले पुराण पुरुष, प्राणात्मक तथा व्याधियों के विनाश करने में मूल कारण हैं, जो यज्ञात्मक, काम को निवारण करने वाले सर्वश्रेष्ठ गुरु हैं ऐसे विश्वेश्वर शङ्कर शिव स्वरूप महारुद्र का मैं भजन करता हूँ ॥ ११ ॥

वेदागमानामतिमूलदेशं
तदुद्भवं [३]भद्रहितं [४]परापरम् ।
कालान्तकं [५]ब्रह्मसनातनप्रियं
भजामि शम्भुं [६]गगनादिरूढम् ॥ १२ ॥

जो वेद तथा आगम (मन्त्र) शास्त्रों के अत्यन्त मूल स्थान को उत्पन्न करने वाले सबके कल्याणकारी एवं हितकारी हैं । परात्पर, कालान्तक, ब्रह्मस्वरूप तथा सनातन के प्रिय हैं ऐसे गगनादि शब्दों में रूढ़ शम्भु का मैं भजन करता हूँ ॥ १२ ॥

शिवागमं शब्दमयं विभाकरम्
भास्वत्प्रचण्डानलविग्रहं[७] ग्रहम् ।
ग्रहस्थितं ज्ञानकरं करालम्
भजामि शम्भुं प्रकृतीश्वरं हरम् ॥ १३ ॥

जो सबके कल्याणकारी आगमशास्त्र हैं, शब्द ब्रह्मस्वरूप हैं, सबको प्रकाश देने वाले हैं, जाज्वल्यमान प्रचण्ड अग्नि के समान शरीर वाले, सबको ग्रहण करने वाले ग्रहों में रहने वाले, ज्ञान देने वाले तथा महाविकराल हैं ऐसे प्रकृतीश्वर, सबके कष्ट का हरण करने वाले शम्भु का मैं भजन करता हूँ ॥ १३ ॥

छायाकरं योगकरं सुखेन्द्रं
मत्तं महामत्तकुलोत्सवाढ्यम् ।
योगेश्वरं योगकलानिधिं विधिं
विधानवक्तारमहं भजामि ॥ १४ ॥

सबको छाया प्रदान करने वाले, योगकर्ता, सुखेन्द्र, महामत्त तथा महामत्तों द्वारा किए जाने वाले उत्सवों से संयुक्त हैं, ऐसे योगेश्वर, योगकलानिधि, विधानवक्ता विधि का मैं भजन करता हूँ ॥ १४ ॥

---

१. लयमिति—ख० ।
२. यज्ञार्थकमिति—ख० ।
३. तद्रहितमिति—ख० ।
४. परात्परमिति—ख० ।
५. निरूपणमिति—ख० ।
६. गगणादिकरूढमिति—ख० ।
७. प्रचण्डामन्तविग्रहं विभुमिति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हेमाचलालङ्कृतशुद्धवेशं
वराभयादाननिदानमूलम् ।
भजामि कान्तं वनमालशोभितं
चामूल[1]पद्मामलमालिनं कुलम् ॥ १५ ॥

अपने शुद्ध वेष से हेमाचल (सुमेरु) को अलंकृत करने वाले, वर तथा अभय के आदान (ग्रहण) और निदान के मूल, अत्यन्त सुन्दर वनमाला से विभूषित, बिना मूल के स्वच्छ पद्म माला से विभूषित हैं, उन (मूलाधार स्थित) कुल का मैं भजन करता हूँ ॥ १५ ॥

स्वयं [2]पुराणं पुरुषेश्वरं गुरुं
मिथ्या[3]भयाह्लादविभाविनं भजे ।
भावप्रियं प्रेमकलाधरं शिवं
गिरीश्वरं चारुपदारविन्दम् ॥ १६ ॥

स्वयं पुराणपुरुष, पुरुषेश्वर, गुरु, मिथ्या भय तथा आह्लाद से रहित, भाव से प्रेम करने वाले, प्रेमकला धारण करने वाले, गिरीश्वर उन शिव का मैं भजन करता हूँ जिनका पादारविन्द अत्यन्त मनोहर है ॥ १६ ॥

ध्यानप्रियं ज्ञानगभीरयोगं
भाग्यास्पदं [4]भाग्यसमं सुलक्षणम् ।
शूलायुधं शूलविभूषिताङ्गं
श्रीशङ्करं मोक्षफलक्रियं भजे ॥ १७ ॥

ध्यान से प्रेम रखने वाले, ज्ञानयुक्त गभीरयोग वाले, सभी के भाग्यास्पद, सबके भाग्य को समान रूप से देखने वाले, सभी सुलक्षणों से युक्त, शूलायुध वाले तथा शूल से विभूषित अङ्ग वाले तथा मोक्ष फल देने में सक्रिय श्री शङ्कर का मैं भजन करता हूँ ॥ १७ ॥

नमो नमो रुद्रगणेभ्य एवं
मृत्युञ्जयेभ्यः कुलचञ्चलेभ्यः ।
शक्तिप्रियेभ्यो विजयादिभूतये
शिवाय धन्याय नमो नमस्ते ॥ १८ ॥

मृत्यु को जीतने वाले, शक्ति से चञ्चल रहने वाले, उन-उन रुद्रगणों को हमारा बारम्बार नमस्कार, जिन्हें शक्ति अत्यन्त प्रिय हैं । उन्हें अपनी विजय तथा विभूति के लिए, अपने कल्याण के लिए, अपने को धन्य बनाने के लिए मेरा नमस्कार है, फिर भी मेरा नमस्कार है ॥ १८ ॥

---

१. चाम्लानपद्मासनमानिनं कुलमिति—ख० । २. प्रधानमिति—ख० ।
३. सुरमिति—ख० गुरुम् ?
४. सिद्धाभवाह्लादिविभाविनमिति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बाह्यं[१] त्रिशूलं वरसूक्ष्मभावं
विशालनेत्रं तनुमध्यगामिनम् ।
महाविपद्[२] दुःखविनाशबीजं
प्रज्ञादया[३]कान्तिकरं भजामि ॥ १९ ॥

जो सबसे अलग रहने वाले त्रिशूली, श्रेष्ठ तथा सूक्ष्म भाव से युक्त, विशाल नेत्र वाले सूक्ष्मकटि वाले, महाविपत्ति तथा महादुःख के विनाश के एकमात्र कारण हैं, प्रज्ञा तथा दया करने वाले हैं, उन शिव का मैं भजन करता हूँ ॥ १९ ॥

पुरान्तकं पूर्णशरीरिणं गुरुं
स्मरारिमाद्यं निजतर्कमार्गम् ।
अनादिदेवं दिवि दोषघातिनम्
भजामि [४]पञ्चाक्षरपुण्यसाधनम् ॥ २० ॥

त्रिपुर का वध करने वाले, पूर्ण शरीर वाले, सब के गुरु, काम के शत्रु, आदि पुरुष अपने तर्क से विमृग्य, अनादि देव, दिव्य लोक में उत्पन्न, समस्त दोषों का विनाश करने वाले, जिनके प्राप्ति का साधन एकमात्र पञ्चाक्षर (ॐ नमः शिवाय) का पुण्य है, उन रुद्र का मैं भजन करता हूँ ॥ २० ॥

दिगम्बरं [५]पद्ममुखं [६]करस्थं
स्थितिक्रियायोगनियोजनं भवम् ।
भावात्मकं भद्रशरीरिणं शिवं
भजामि पञ्चाननमर्कवर्णम् ॥ २१ ॥

दिशाओं का वस्त्र धारण करने वाले (नङ्गे), कमल के समान मुख वाले, सृष्टि की स्थिति एवं क्रिया के योग में ब्रह्मादि का नियोजन करने वाले, संसार को अपने हाथों में धारण करने वाले, भाव से प्राप्त होने वाले, भद्र शरीर वाले, पाँचमुख वाले, सूर्य के समान कान्तिमान् सदाशिव का मैं भजन करता हूँ ॥ २१ ॥

मायामयं पङ्कजदामकोमलं
दिग्व्यापिनं दण्डधरं [७]हरेश्वरम् ।
त्रिपक्षकं [८]त्र्यक्षरबीजभावं
त्रिपद्ममूलं त्रिगुणं भजामि ॥ २२ ॥

मायामय, कमल की माला के समान कोमल शरीर वाले, सभी दिशाओं में व्याप्त

---

१. भाग्यममयमिति—ख० ।
२. भाव्यमिति—ख० ।
३. महाविपद्भस्मविलासबीजमिति—ख० ।
४. शुद्धोदयं शान्तिकरमिति—ख० ।
५. सुखमिति—ख० ।
६. करस्थितमिति—ख० ।
७. सुरेश्वरमिति—ग० ।
८. अक्षरबीजभावमिति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रहने वाले दण्डधारी, हर, ईश्वर, तीन पक्षों वाले (त्रिनेत्र) अक्षर रूप बीजभाव वाले, तीन पद्मों के मूल में रहने वाले त्रिगुणात्मक सदाशिव का मैं भजन करता हूँ ॥ २२ ॥

विद्याधरं [१]वेदविधानकार्यं
कायागतं नीतनिनादतोषम् ।
नित्यं चतुर्वर्गफलादिमूलं
वेदादिसूत्रं प्रणमामि योगम् ॥ २३ ॥

समस्त विद्याओं को धारण करने वाले, वेद के विधान का कार्य करने वाले, सबके शरीर में रहने वाले, नीति के निनाद से संतुष्ट रहने वाले, नित्य चारों वर्गों (धर्म, अर्थ, काम तथा मोक्ष) के फलादि के मूल, वेदादि सूत्र स्वरूप वाले, योगात्मा सदाशिव शम्भु का मैं भजन करता हूँ ॥ २३ ॥

वेदान्तवेद्यं कुलशास्त्रविज्ञं
क्रियामयं [२]योगस्वधर्मदानम् ।
भक्तेश्वरं भक्तिपरायणं वरं
भक्तं [३] महाबुद्धिकरं भजाम्यहम् ॥ २४ ॥

वेदान्त से जानने योग्य, कुल शास्त्र (शक्ति मार्ग) के वेत्ता, सर्वदा क्रिया में लगे रहने वाले, योगरूप स्वधर्म का दान करने वाले, भक्तों के ईश्वर, स्वयं भक्ति में परायण सर्वश्रेष्ठ भक्त, महाबुद्धि प्रदान करने वाले, महारुद्र का मैं भजन करता हूँ ॥ २४ ॥

गतागतं गम्यमगम्यभावं
समुल्लसत्कोटिकलावतंसम्[४]।
भावात्मकं[५] भावमयं सुखासुखं
भजामि भर्गं प्रथमारुणप्रभम् ॥ २५ ॥

गतागत स्वरूप वाले, गम्यागम्य भावस्वरूप करोड़ों कलाओं से संयुक्त होने के कारण शोभा धारण करने वाले, भावात्मक, भावमय, सुखासुख स्वरूप वाले, सूर्योदय से प्रथम उदय होने वाले, अरुण के समान प्रभा वाले, अत्यन्त तेजोरूप शिव का मैं भजन करता हूँ ॥ २५ ॥

बिन्दुस्वरूपं परिवादवादिनं
मध्याह्नसूर्यायुतसन्निभं नवम् ।
विभूतिदानं [६]निजदानदानं
दानात्मकं तं प्रणमामि देवम् ॥ २६ ॥

---

१. देव ..... ख० । २. सुधर्म ..... ख० ।
३. शक्तिकरमिति—ग० ।४. शरद्विधोः कोटिकलावतंसमिति—ख० ।
५. भावार्थकमिति—ख० । ६. योग—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मघवा माघमध्यस्था[१] महासैन्या महोरगा ॥ ४४ ॥
महाफणिधरो मात्रा[२] मातृका मन्त्रवासिनी ।
महाविभूतिदानाढ्ये मेरुवाहनवाहना ॥ ४५ ॥

महाजय, महारुद्र, महारुद्रारुणाकरा, मनोवर्णमृजोमाख्यो, मुद्रा, तरुणरूपिणी, मुण्डमालाधर, मार्य, मार्यपुष्पमृजामनी, मङ्गलप्रेमभावस्था, महाविद्युत्प्रभाऽचला, मुद्राधारी, मतस्थैर्य, मतभेदप्रकारिणी, महापुराणवेत्ता, महापौराणिकाऽमृता, मौनविद्य, महाविद्या, महाधननिवासिनी, मघवा, माघमध्यस्था, महासैन्या, महोरगा, महाफणिधर, मात्रा, मातृका, मन्त्रवासिनी, महाविभूतिदानाढ्यो, मेरुवाहनवाहना ॥ ४१-४५ ॥

महाह्लादो महामित्रो महामैत्रेयपूजिता ।
मार्कण्डेयसिद्धिदाता मार्कण्डेयायुषिस्थिता ॥ ४६ ॥
मार्कण्डेयो मुहुःप्रीतो[३] मातृकामण्डलेश्वरी ।
मानसंस्थो[४] मानदाता मनोधारणतत्परा ॥ ४७ ॥
मयदानवचित्तस्थो मयदानवचित्रिणी ।
महागुणधरानन्दो [५]महालिङ्गविहारिणी ॥ ४८ ॥
महेश्वरस्थितो मूलो मूलविद्याकुलोदया ।
मायापो मोहनोन्मादी[६] महागुरुनिवासिनी ॥ ४९ ॥
महाशुक्लाम्बरधरो मलयागुरुधूपिता ।
मधूपिनी मधूल्लासो[७] माध्वीरससमाश्रया ॥ ५० ॥

महाह्लाद, महामित्र, महामैत्रेयपूजिता, मार्कण्डेयसिद्धिदाता, मार्कण्डेयायुषिस्थिता, मार्कण्डेयो, मुहुप्रीतो, मातृकामण्डलेश्वरी, मानसंस्थ, मानदाता, मनोधारणतत्परा, मयदानवचित्तस्थ, मयदानवचित्रिणी, महागुणधरानन्द, महालिङ्गविहारिणी, महेश्वरस्थित, मूल, मूलविद्याकुलोदया, मायापो, मोहनोन्मादी, महागुरुनिवासिनी, महाशुक्लाम्बरधर, मलयागुरुधूपिता, मधूपिनी, मधूल्लास, माध्वीरससमाश्रया ॥ ४६-५० ॥

महागुरुर्महादेहो महोत्साहा महोत्पला[८] ।
मध्यपङ्कजसंस्थाता मध्याम्बुजनिवासिनी[९] ॥ ५१ ॥
मारीभयहरो मल्लो मल्लग्रहविरोधिनी ।
महामुण्डलयोन्मादी[१०] मदघूर्णितलोचना ॥ ५२ ॥

---

१. मासस्थो महाशैत्या—ख० । २. मायी .... यन्त्रवासिनी—ख० ।
३. मृकुप्रीतो—ख० । ४. मानसस्थो—ख० ।
५. महानिन्दा—ख० । ६. मोहनन्यासी—ख० । ७. मधुपेशो—ख० ।
८. महोल्वणा—ख० ।—'महोत्पला' इति पाठे तु महान्ति उत्पलानि यस्यां सा इति विग्रहे बहुव्रीहिः । 'महोल्वणा' इति पाठे तु महदुल्वणं यस्यां सा इति लौकिके विग्रहे साधुता बोध्या ।
९. विनोदिनी—ख० । १०. मण्डलयोन्यादि—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महासद्योजातकालो[१] महाकपिलवर्तिनी ।
मेघवाहो[२] महावक्त्रो मनसामणिधारिणी ॥ ५३ ॥
मरणाश्रयहन्ता च महागुर्वीगणस्थिता[३] ।
महापद्मस्थितो मन्त्रो[४] मन्त्रविद्यानिधीश्वरी ॥ ५४ ॥
मकरासनसंस्थाता[५] महामृत्युविनाशिनी ।
मोहनो मोहिनीनाथो [६]मत्तनर्तनवासिनी ॥ ५५ ॥

महागुरु, महादेह, महोत्साहा, महोत्पला, मध्यपङ्कजसंस्थाता, मध्याम्बुजनिवासिनी, मारीभयहर, मल्ल, मल्लग्रहविरोधिनी, महामुण्डलयोन्मादी, मदघूर्णितलोचना, महासद्योजातकाल, महाकपिलवर्तिनी, मेघवाह, महावक्त्र, मनसामणिधारिणी, मरणाश्रयहन्ता, महागुर्वीगणस्थिता, महापद्मस्थित, मन्त्र, मन्त्रविद्यानिधीश्वरी, मकरासनसंस्थाता, महामृत्युविनाशिनी, मोहन, मोहिनीनाथ, मत्तनर्तनवासिनी ॥ ५१-५५ ॥

महाकाल[७]कुलोल्लासी महाकामादिनाशिनी ।
मूलपद्मनिवासी च महामूलकुलोदया[८] ॥ ५६ ॥
मासाख्यो [९]मासनिलया मङ्गलस्था महागुणा ।
मायाछन्नतरो[१०] मीनो मीमांसागुणवादिनी ॥ ५७ ॥
मीमांसाकारको मायी मार्जारसिद्धिदायिनी ।
मेदिनीवल्लभक्षेमो मेदिनीज्ञानमोदिनी[११] ॥ ५८ ॥
मौषलीशो [१२]मृषार्थस्थो मनकल्पितकेशरी ।
मनसः श्रीधरो जापो मन्दहाससुशोभिता[१३] ॥ ५९ ॥
मैनाको मेनकापुत्रो मायाछन्ना महाक्रिया[१४] ।
महाक्रिया[१५] च लोमाण्डो मण्डलासनशोभिता ॥ ६० ॥

महाकालकुलोल्लासी, महाकामादिनाशिनी, मूलपद्मनिवासी, महामूलकुलोदया, मासाख्य, मांसनिलया, मङ्गलस्था, महागुणा, मायाछन्नतर, मीन, मीमांसागुणवादिनी, मीमांसाकारक, मायी, मार्जारसिद्धिदायिनी, मेदिनीवल्लभक्षेम, मेदिनीज्ञानमोदिनी, मौषलीश, मृषार्थस्थ, मनकल्पितकेशरी, मनस, श्रीधर, जाप, मन्दहाससुशोभिता, मैनाक, मेनकापुत्र, मायाछन्ना, महाक्रिया, महाक्रिया, लोमाण्ड, मण्डलासनशोभिता ॥ ५६-६० ॥

---

१. महासह्यो मत्तकालो—ख० । २. मेषवहो—ख० । ३. महागुरू—ख० ।
४. मन्त्री मनत्रविद्याविधीश्वरी—ख०। ५. संस्थश्च—ख० ।
६. मण्डल—ख० । ७. कुलश्रीशो—ख० ।
८. फलोदया—ख० । ९. माननिलयो—ख० ।
१०. हरो....वासिनी—ख० । ११. भेदिनी—ख० । १२. मुषार्थस्थो—ख० ।
१३. मन्दाहहासशोभिता—ख० ।—मन्देन हासेन सुशोभिता, कर्मधारयगर्भस्तृतीयातत्पुरुषः । 'मन्दाहहासशोभिता' इति पाठे तु मन्दमह्नोतीति व्याप्तोतोति मन्दाहः, स चासौ हासश्चेति कर्मधारयः ।
१४. महत्क्रिया—ख० । १५. महाक्रियश्च लोमार्णो—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मायाधारणकर्ता च महाद्वेषविनाशिनी ।
मुक्तकेशी[१] मुक्तदेहो मुक्तिदा मुक्तिमानिनी ॥ ६१ ॥
मुक्ताहारधरो मुक्तो मुक्तिमार्गप्रकाशिनी ।
महामुक्तिक्रियाच्छन्नो[२] महोच्चगिरिनन्दिनी ॥ ६२ ॥
मूषलाद्यस्त्रहन्ता[३] च महागौरीमनःक्रिया ।
महाधनी महामानी मनोमत्ता[४] मनोलया ॥ ६३ ॥
महारणगतः सान्तो[५] महावीणाविनोदिनी ।
महाशत्रुनिहन्ता च महास्त्रजालमालिनी ॥ ६४ ॥
शिवो[६] रुद्रो वलीशानी कितवामोदवर्धिनी ।
चन्द्रचूडाधरो[७] वेदो मदोन्मत्ता महोज्ज्वला ॥ ६५ ॥

मायाधारणकर्ता, महाद्वेषविनाशिनी, मुक्तकेशी, मुक्तदेह, मुक्तिदा, मुक्तिमानिनी, मुक्ताहारधर, मुक्त, मुक्तिमार्गप्रकाशिनी, महामुक्तिक्रियाछन्न, महोच्चगिरिनन्दिनी, मूषलाद्यस्त्रहन्ता, महागौरीमनक्रिया, महाधनी, महामानी, मनोमत्ता, मनोलया, महारणगत, सान्त, महावीणाविनोदिनी, महाशत्रुनिहन्ता, महास्त्रजालमालिनी, शिव, रुद्र, वलीशानी, कितवामोदवर्धिनी, चन्द्रचूडाधर, वेद, मदोन्मत्ता, महोज्ज्वला ॥ ६१-६५ ॥

विगलत्कोटिचन्द्राभो विधुकोटिसमोदया ।
अग्निज्वालाधरो वीरो ज्वालामालासहस्रधा ॥ ६६ ॥
भर्गप्रियकरो धर्मो महाधार्मिकतत्परा ।
धर्मध्वजो धर्मकर्ता धर्मगुप्तिप्रसृत्त्वरी ॥ ६७ ॥
महाविद्रुमपूरस्थो विद्रुमाभायुतप्रभा ।
पुष्पमालाधरो मान्यः शत्रूणां कुलनाशिनी ॥ ६८ ॥
कोजागरो[८] विसर्गस्थो बीजमालाविभूषिता ।
बीजचन्द्रो[९] बीजपूरो बीजाभा विघ्ननाशिनी ॥ ६९ ॥
विशिष्टो[१०] विधिमोक्षस्थो वेदाङ्गपरिपूरिणी ।
किरातिनीपति श्रीमान् विज्ञाविज्ञजनप्रिया ॥ ७० ॥

विगलत्कोटिचन्द्राभ, विधुकोटिसमोदया, अग्निज्वालाधर, वीर, ज्वालामालासहस्रधा, भर्गप्रियकर, धर्म, महाधार्मिकतत्परा, धर्मध्वज, धर्मकर्ता, धर्मगुप्ति, प्रसृत्त्वरी, महाविद्रुमपूरस्थ,

---

१. मुक्ताकाशी मुक्तदेहो—ख० ।
२. क्रमाच्छन्नो महागिरिनिवासिनी—ख० ।
३. हस्तश्च..... प्रिया—ख० ।
४. मनोन्मत्ता—ख० ।
५. मान्तो—ख० ।
६. महारुद्रो महाशाल—ख० ।
७. चन्द्रचूणाधरी इत्यतो विद्रुमाभायुतप्रभापर्यन्तः पाठख० पुस्तके नास्ति ।
८. कोजागरा विसर्गस्था इति—ख० ।—को जागर्ति इति विवरणे कोजागरो विसर्गस्थ इत्यादि बोध्यम् ।
९. बीजचन्द्रा—ख० ।
१०. विशिष्टा विधिमोक्षस्था—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विद्रुमाभायुतप्रभा, पुष्पमालाधर, मान्य, शत्रूणां, कुलनाशिनी, कोजागर, विसर्गस्थ, बीजमाला-विभूषिता, बीजचन्द्र, बीजपूर, बीजाभा, विघ्ननाशिनी, विशिष्ट, विधिमोक्षस्थ, वेदाङ्गपरि-पूरिणी, किरातिनीपति, श्रीमान्, विज्ञाविज्ञजनप्रिया ॥ ६६-७० ॥

वर्धस्थो[१] वर्धसम्पन्नो वर्णमालाविभूषिता ।
महाद्रुमगतः शूरो विलसत्कोटिचन्द्रभा ॥ ७१ ॥
महाकुमारनिलयो महाकामकुमारिका ।
कामजालक्रियानाथो विकला[२] कमलासना ॥ ७२ ॥
खण्डबुद्धिहरो भावो भवतीति दुरासना[३] ।
असंख्यको रूपसंख्यो नामसंख्यादिपूरणी ॥ ७३ ॥
सद्मनाद्यमनाः[४] कोषकिङ्किणीजालमालिनी ।
चन्द्रायुतमुखाम्भोजो[५] विभायुतसमानना ॥ ७४ ॥
कालबुद्धिहरो बालो[६] भगवत्यम्बिकाऽण्डजा ।
मुण्डहस्तश्चातुराद्यः[७] विवादरहिताऽवृता ॥ ७५ ॥

वर्धस्थ, वर्धसम्पन्न, वर्णमालाविभूषिता, महाद्रुमगत, शूर, विलसत्कोटिचन्द्रभा, महाकुमारनिलय, महाकामकुमारिका, कामजालक्रियानाथ, विकला, कमलासना, खण्डबुद्धिहर, भाव, भवतीति, दुरासना, असंख्यको, रूपसंख्यो, नामसंख्यादिपूरणी, सद्मनाद्यमना, कोष-किङ्किणीजालमालिनी, चन्द्रायुतमुखाम्भोज, विभायुतसमानना, कालबुद्धिहर, बाल, भग-वत्यम्बिकाऽण्डजा, मुण्डहस्तश्चातुराद्य, विवादरहिताऽवृता ॥ ७१-७५ ॥

पञ्चमाचारकुशलो महापञ्चमलालसा ।
विकारशून्यो[८] दुर्धर्षो द्विपदा मानुषक्रिया ॥ ७६ ॥
मयदानवकर्मस्थो विधातृकर्मबोधिनी ।
कलिकालक्रियारूढो वायवीषर्घरध्वनिः ॥ ७७ ॥
सर्वसञ्चारकर्ता च सर्वसञ्चारकर्त्रिका ।
मन्दमन्दगतिप्रेमा मन्दमन्दगतिस्थिता ॥ ७८ ॥
साट्टहासो[९] विधुकला चाघोराघोरयातना ।
महानरकहर्ता च नरकादिविपाकहा[१०] ॥ ७९ ॥
पञ्चरश्मिसमुद्भूतो नगादिबलघातिनी[११] ।

---

१. वर्गस्थो वर्गसम्पर्को वर्गमालाविभूषिता—ख० ।
२. विफला—ख० । ३. भवभीतिदुरापहा—ख० ।
४. कम्बलाद्यासनः—ख० ।—कम्बलादि असनं क्षेपणं यस्य । असु क्षेपणे ल्युडन्तः । 'सद्मनाद्यपना' इति पाठे तु सद्मनादि अमनो यस्येत्यर्थो बोध्यः ।
५. चन्द्रयुक्तमुखाम्भोजो—ख० । ६. कालो—ख० ।
७. अण्डस्थको अण्डबाह्यस्थो—ख० । ८. वूरन्ये—ख० ।
९. साट्टहासो विधुकलशः—ख० । १०. विनाशिनी—ख० । ११. रणघातिनी—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गरुडासनसम्पूज्यो[१] गरुडप्रेमवर्धिनी ॥ ८० ॥

पञ्चमाचारकुशल, महापञ्चमलालसा, विकारशून्य, दुर्धर्ष, द्विपदा, मानुषक्रिया, मयदानवकर्मस्थ, विधातृकर्मबोधिनी, कलिकालक्रियारूढ़, वायवीघर्घरध्वनि, सर्वसञ्चारकर्ता, सर्वसञ्चारकर्त्रिका, मन्दमन्दगतिप्रेमा, मन्दमन्दगतिस्थिता, साट्टहास,, विधुकला, चाघोराघोर-यातना, महानरकहर्ता, नरकादिविपाकहा, पञ्चरश्मिसमुद्भूत, नगादिबलघातिनी, गरुडासन-सम्पूज्य, गरुडप्रेमवर्धिनी ॥ ७६-८० ॥

अश्वत्थवृक्षनिलयो वटवृक्षतलस्थिता ।
चिराङ्गो[२] प्रथमाबुद्धिः प्रपञ्चसारसङ्गति ॥ ८१ ॥
स्थितिकर्ता स्थितिच्छाया विमदा छत्रधारिणी ।
दाडिमाभासकुसुमो दाडिमोद्भवपुष्पिका ॥ ८२ ॥
द्राढ्यो[३] द्रवीभरतिका रतिकालापवर्धिनी ।
रत्नगर्भो रत्नमाला रत्नेश्वर इवागतिः ॥ ८३ ॥
प्रसिद्धः[४] पावनी पुच्छा पुच्छसुस्थः परापरा ।
खेचरी खेचरः स्वस्थो[५] महाखड्गधरा जया ॥ ८४ ॥
किशोरभावखेलस्थो [६]विखनादिप्रकारिका ।
महाशब्दप्रकाशश्च महाशब्दप्रकाशिका ॥ ८५ ॥

अश्वत्थवृक्षनिलय, वटवृक्षतलस्थिता, चिराङ्ग, प्रथमाबुद्धि, प्रपञ्चसारसङ्गति, स्थिति-कर्ता, स्थितिच्छाया, विमदा, छत्रधारिणी, दाडिमाभासकुसुम, दाडिमोद्भवपुष्पिका, द्राढ्यो, द्रवीभरतिका, रतिकालापवर्धिनी, रत्नगर्भ, रत्नमाला, रत्नेश्वर, इवागति, प्रसिद्ध, पावनी, पुच्छा, पुच्छसुस्थ, परापरा, खेचरी, खेचर, स्वस्थ, महाखड्गधरा, जया, किशोरभावखेलस्थ, विखनादिप्रकारिका, महाशब्दप्रकाश, महाशब्दप्रकाशिका ॥ ८१-८५ ॥

चारुहासो विपद्हन्ता शत्रुमित्रगणस्थिता ।
वज्रदण्डधरो व्याघ्रो वियत्खेलनखञ्जना ॥ ८६ ॥
गदाधरः शीलधारी[७] शशिकूर्परगाऽबला ।
वसनासनकारी च वसनावसनप्रिया ॥ ८७ ॥
महाविद्याधरो गुप्तो विशिष्टगोपनक्रिया ।
गुप्तगीता[८]गायनस्थो गुप्तशास्त्रगलप्रदा[९] ॥ ८८ ॥
योगविद्यापुराणञ्च यागविद्या विभाकला ।

---

१. संयुक्ता—ख० । २. चित्राङ्ग—ख० ।
३. द्राढ्या द्रविणदेशस्था—ख० । ४. प्रसिद्धा पावनी.....सुस्थ सर्गपराचरा—ख० ।
५. सुस्थो ....धराध्यया—ख० । ६. विखलादि—ख० ।
७. शूलधारी—ख० । ८. गुप्तगीतो—ख० ।
९. गुप्तं यच्छास्त्रं तस्य गलमन्तर्देशं मुखं वा प्रदयते रक्षति या सा, "आतश्चोपसर्गे" इति कर्तरि कप्रत्यये साधुत्वम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एककालो द्विकालश्चात्र[१] कालफलाम्बुजा ॥ ८९ ॥
अष्टादशभुजो रौद्री भुजगा विघ्ननाशिनी ।
विद्यागोपनकारी च विद्यासिद्धिप्रदायिनी ॥ ९० ॥

चारुहास, विपद्हन्ता, शत्रुमित्रगणस्थिता, वज्रदण्डधर, व्याघ्र, वियत्खेलनखञ्जना, गदाधर, शीलधारी, शशिकर्पूरगाऽबला, वसनासनकारी, वसनावसनप्रिया, महाविद्याधर, गुप्त, विशिष्टगोपनक्रिया, गुप्तगीतागायनस्थ, गुप्तशास्त्रगलप्रदा, योगविद्यापुराण, यागविद्या, विभाकला, एककाल, द्विकालश्चात्र, कालफलाम्बुजा, अष्टादशभुज, रौद्री, भुजगा, विघ्ननाशिनी, विद्यागोपनकारी, विद्यासिद्धिप्रदायिनी ॥ ८६-९० ॥

विजयानन्दगो मन्दो महाकालमहेश्वरी ।
भूतिदानरतो[२] मार्गो महद्गीताप्रकाशिनी ॥ ९१ ॥
केशाद्यावेशसन्तानो[३] मङ्गलाभा कुलान्तरा ।
द्विभुजो वेदबाहुश्च षड्भुजा कामचारिणी ॥ ९२ ॥
चन्द्रकान्तमाल्यधरो[४] लोकातिलोकरागिणी ।
त्रिभङ्गदेहनिकरो विभाङ्ग[५]स्था विनोदिनी ॥ ९३ ॥
त्रिकूटस्थस्त्रिभावस्थस्त्रिशरीरा[६] त्रिकालजा ।
एकवक्त्रो द्विवक्त्रश्च वक्त्रशून्या शिशुप्रिया ॥ ९४ ॥
श्री विद्यामन्त्रजालस्थो विज्ञानी कुशलेश्वरी ।
घटासरगतो[७] गौरा गौरवी गौरिकाऽचला ॥ ९५ ॥

विजयानन्दग, मन्द, महाकालमहेश्वरी, भूतिदानरत, मार्गो, महद्गीताप्रकाशिनी, केशाद्यावेशसन्तान, मङ्गलाभा, कुलान्तरा, द्विभुज, वेदबाहु, षड्भुजा, कामचारिणी, चन्द्रकान्तमाल्यधर, लोकातिलोकरागिणी, त्रिभङ्गदेहनिकर, विभाङ्गस्था, विनोदिनी, त्रिकूटस्थस्त्रिभावस्थस्त्रिशरीरा, त्रिकालजा, एकवक्त्र, द्विवक्त्र, वक्त्रशून्या, शिशुप्रिया, श्री, विद्यामन्त्रजालस्थ, विज्ञानी, कुशलेश्वरी, घटासरगत, गौरा, गौरवी, गौरिकाऽचला ॥ ९१-९५ ॥

गुरुज्ञानगतो गन्धो गन्धभोग्या गिरिध्वजा ।
छाया[८]मण्डलमध्यस्थो विकटा पुष्करानना ॥ ९६ ॥
कामाख्यो निरहङ्कारः [९]कामरूपनृपाङ्गजा ।
सुलभो दुर्लभो दुःखी[१०] सूक्ष्मातिसूक्ष्मरूपिणी ॥ ९७ ॥

---

१. त्रिकालफलाम्बुदा—ख० । २. भूरि .... महागीताप्रकाशिनी—ख० ।
३. वेशाद्यावेश—ख० । ४. अलकातिलकरागिणी—ख० ।
५. विभङ्गस्था—ख० । ६. त्रितारस्थस्त्र्यशरेणुस्त्रिकालजा—ख० ।
७. घटासवगतो गौगो गौरवी गौरिकाचला—ख० । ८. हारमण्डल—ख० ।
९. कामाकामविकाशजा—ख० ।—कामेन स्वेच्छया रूपं यस्य सनृपस्तस्याङ्गज्जाता इति कामरूपनृपाङ्गजा इति । १०. दुर्लभाक्षीण—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बीजजापपशोः[१] क्रूरो विमोहगुणनाशिनी ।
अर्धरो[२] निपुणोल्लाशो विभुरूपा सरस्वती ॥ ९८ ॥
अनन्त[३]घोषनिलयो विहङ्गगणगामिनी ।
अच्युतेशः प्रकाण्डस्थः प्रचण्डफालवाहिनी[४] ॥ ९९ ॥
अभ्रान्तो भ्रान्तिरहिता [५]श्रान्तो यान्ति प्रतिष्ठिता ।
अव्यर्थो व्यर्थवाक्यस्थो[६] विशङ्काशङ्कयान्विता ॥ १०० ॥

गुरुज्ञानगत, गन्ध, गन्धभोग्या, गिरिध्वजा, छायामण्डलमध्यस्थ, विकटा, पुष्करानना, कामाख्य, निरहङ्कार, कामरूपनृपाङ्गजा, सुलभ, दुर्लभ, दुखी, सूक्ष्मातिसूक्ष्मरूपिणी, बीजजापपशो, क्रूरो, विमोहगुणनाशिनी, अर्धर, निपुणोल्लाश, विभुरूपा, सरस्वती, अनन्त, घोषनिलय, विहङ्गगणगामिनी, अच्युतेश, प्रकाण्डस्थ, प्रचण्डफालवाहिनी, अभ्रान्त, भ्रान्तिरहिता, श्रान्त, यान्ति, प्रतिष्ठिता, अव्यर्थ, व्यर्थवाक्यस्थ, विशङ्काशङ्कयान्विता ॥ ९६-१०० ॥

यमुनापतिपः पीनो महाकालवसावहा ।
जम्बूद्वीपेश्वरः पारः पारावारकृतासनी[७] ॥ १०१ ॥
वज्रदण्डधरः शान्तो मिथ्यागतिरतीन्द्रिया ।
अनन्तशयनो न्यूनः[८] परमाह्लादवर्धिनी ॥ १०२ ॥
शिष्टाश्रणिलयो[९] व्याख्यो वसन्तकालसुप्रिया ।
विरजान्दोलितो भिन्नो विशुद्धगुणमण्डिता ॥ १०३ ॥
अञ्जनेशः[१०] खञ्जनेशः पललासवभक्षिणी[११] ।
अङ्गभाषाकृतिस्नाता[१२] सुधारसफलातुरा ॥ १०४ ॥
फलबीजधरो दौर्गो द्वारपालनपल्लवा ।
पिप्पलादः[१३] कारणश्च विख्यातिरतिवल्लभा ॥ १०५ ॥

यमुनापतिप, पीन, महाकालवसावहा, जम्बूद्वीपेश्वर, पार, पारावारकृतासनी, वज्रदण्डधर, शान्त, मिथ्यागतिरतीन्द्रिया, अनन्तशयन, न्यून, परमाह्लादवर्धिनी, शिष्टाश्रणिलय, व्याख्य, वसन्तकालसुप्रिया, विरजान्दोलित, भिन्न, विशुद्धगुणमण्डिता, अञ्जनेश, खञ्जनेश, पललासवभक्षिणी, अङ्गभाषाकृतिस्नाता, सुधारसफलातुरा, फलबीजधर, दौर्ग, द्वारपालनपल्लवा, पिप्पलाद, कारण, विख्यातिरतिवल्लभा ॥ १०१-१०५ ॥

---

१. श्रीबीजजापको क्रूरो—ख० ।
२. अकुलोऽतिकुलोद्वासो—ख० ।
३. अनन्ताघारनिलयो—ख० ।
४. फलवासिनी—ख० ।
५. भ्रान्तिरहितो भ्रान्तो भ्रान्ति—ख० ।
६. बाह्यस्थो—ख० ।
७. पारापारहुतासनी—ख० ।
८. शयनोन्मूलः ।
९. सिताभ्रनिलयो ध्येयी ।
१०. आञ्जनेशः खाण्डनेशः—ख० ।
११. पललं च आसवश्चेति पललासवम् 'मांसमद्यम्', तद् भक्षयति तच्छीला, कर्तरि णिनिप्रत्ययः ।
१२. कृतस्नानः सुधारस कलान्तरा—ख० ।
१३. पिघलादो वारुणश्च विख्याता—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संहारविग्रहो विप्रो विषण्णा[१] कामरूपिणी ।
अवलापो नापनापो[२] विक्लृप्ता कंसनाशिनी ॥ १०६ ॥
हठात्कारेणतो[३] चामो नाचामो विनयक्रिया ।
सर्व सर्वसुखाच्छन्नो[४] जिताजितगुणोदया ॥ १०७ ॥
भास्वत्किरीटो राङ्कारी[५] वरुणेशीतलान्तरा ।
अमूल्यरत्नदानाढ्यो दिवारात्रिस्त्रिखण्डजा ॥ १०८ ॥
मारबीजमहामानो[६] हरबीजादिसंस्थिता ।
अनन्तवासुकीशानो लाकिनी काकिनी द्विधा ॥ १०९ ॥
कोटिध्वजो बृहद्गर्गश्चामुण्डा रणचण्डिका ।
उमेशो रत्नमालेशी विकुम्भगणपूजितः ॥ ११० ॥

संहारविग्रह, विप्र, विषण्णा, कामरूपिणी, अवलाप, नापनाप, विक्लृप्ता, कंसनाशिनी, हठात्कारेणत, चाम, नाचाम, विनयक्रिया, सर्व, सर्वसुखाच्छन्न, जिताजितगुणोदया, भास्वत्किरीट, राङ्कारी, वरुणेशीतलान्तरा, अमूल्यरत्नदानाढ्य, दिवारात्रिस्त्रिखण्डजा, मारबीजमहामान, हरबीजादिसंस्थिता, अनन्तवासुकीशान, लाकिनी, काकिनी, द्विधा, कोटिध्वज, बृहद्गर्ग, चामुण्डा, रणचण्डिका, उमेश, रत्नमालेशी, विकुम्भगणपूजित ॥ १०६-११० ॥

निकुम्भपूजितः कृष्णो विष्णुपत्नी सुधात्मिका ।
अल्पकालहरः[७] कुन्तो महाकुन्तास्त्रधारिणी ॥ १११ ॥
ब्रह्मास्त्रधारकः क्षिप्तो[८] वनमालाविभूषिता ।
एकाक्षरो द्व्यक्षरश्च षोडशाक्षरसंभवा ॥ ११२ ॥
अतिगम्भीरवातस्थो महागम्भीरवाद्यगा ।
त्रिविधात्मा त्रिदेशात्मा[९] तृतीया[१०] त्राणकारिणी ॥ ११३ ॥
कियत्कालचलानन्दो[११] विहङ्गगमनासना ।
गीर्वाण बाणहन्ता[१२] च बाणहस्ता विधूच्छला ॥ ११४ ॥
बिन्दुधर्मोज्ज्वलोदारो वियज्ज्वलनकारिणी ।
विवासा[१३] व्यासपूज्यश्च नवदेशीप्रधानिका ॥ ११५ ॥

---

१. विषणा—ख० । २. लापलापो—ख० ।
३. हठात्कारगती चाभो वाचामो विनयप्रिया—ख० ।
४. सर्वकालसुखाच्छन्त्रो—ख० । ५. झङ्कारी करणेशी—ख० ।
६. महामानी—ख० । ७. कल्पकालहरो कुम्भो महाकुम्भास्त्र—ख० ।
८. क्षिप्रो—ख० । ९. त्रिदिवेशस्त्रिदशात्मा—ख० ।
१०. त्रिदेशात्मा इत्यस्य स्थाने दशात्मा इति पाठो युक्तः । तिस्रो दशा अवस्था भवन्ति येषां ते त्रिदशा देवाः, तेषामात्मा ।
११. बलानन्दो ..... मार्गनासना—ख० । १२. बाणहस्तश्च—ख० ।
१३. विरामव्यासपूज्यश्च—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निकुम्भपूजित, कृष्ण, विष्णुपत्नी, सुधात्मिका, अल्पकालहर,, कुन्त,, महाकुन्तास्त्र-धारिणी, ब्रह्मास्त्रधारक, क्षिप्त, वनमालाविभूषिता, एकाक्षर, द्वयक्षर, षोडशाक्षरसंभवा, अति-गम्भीरवातस्थ, महागम्भीरवाद्यगा, त्रिविधात्मा, त्रिदेशात्मा, तृतीयात्राणकारिणी, कियत्काल-चलानन्द, विहङ्गमनासना, गीर्वाण, बाणहन्ता, बाणहस्ता, विधूच्छला, बिन्दुधर्मज्ज्वलोदार, वियज्ज्वलनकारिणी, विवासाव्यासपूज्य, नवदेशीप्रधानिका ॥ १११-११५ ॥

विलोलवदनो वामो[१] विरोमा मोदकारिणी ।
हिरण्यहारभूषाङ्गः कलिङ्ग[२]नन्दिनीशगा ॥ ११६ ॥
अनन्यक्षीणवक्षश्च क्षितिक्षोभविनाशिका ।
क्षणक्षेत्रप्रसादाङ्गो वशिष्ठादिऋषीश्वरी[३] ॥ ११७ ॥
रेवातीरनिवासी च गङ्गातीरनिवासिनी ।
चाङ्गेशः[४] पुष्करेशश्च व्यासभाषाविशेषिका ॥ ११८ ॥
अमलानाथसंज्ञश्च[५] रामेश्वरसुपूजिता ।
रमानाथः प्रभुः प्राप्तिः कीर्तिदुर्गाभिधानिका[६] ॥ ११९ ॥
लम्बोदरः प्रेमकालो लम्बोदरकुलप्रिया ।
स्वर्गदेहो[७] ध्यानमानो लोचनायतधारिणी ॥ १२० ॥

विलोलवदन, वाम, विरोमा, मोदकारिणी, हिरण्यहारभूषाङ्ग, कलिङ्गनन्दिनीशगा, अनन्यक्षीणवक्ष, क्षितिक्षोभविनाशिका, क्षणक्षेत्रप्रसादाङ्ग, वशिष्ठादिऋषीश्वरी, रेवातीरनिवासी, गङ्गातीरनिवासिनी, चाङ्गेश, पुष्करेश, व्यासभाषाविशेषिका, अमलानाथसंज्ञ, रामेश्वरसुपूजिता, रमानाथ, प्रभु, प्राप्ति, कीर्तिदुर्गाभिधानिका, लम्बोदर, प्रेमकाल, लम्बोदरकुलप्रिया, स्वर्गदेहो, ध्यानमान, लोचनायतधारिणी ॥ ११६-१२० ॥

अव्यर्थवचनप्रक्ष्यो[८] विद्यावागीश्वरप्रिया ।
अब्दमान[९]स्मृतिप्राणः कलिङ्गनगरेश्वरी ॥ १२१ ॥
अतिगुह्यतरज्ञानी[१०] गुप्तचन्द्रात्मिकाऽव्यया ।
मणिनागगतो गन्ता वागीशानी बलप्रदा ॥ १२२ ॥
कुलासनगतो नाशो विनाशा[११] नाशसुप्रिया ।
विनाशमूलः कूलस्थः संहारकुलकेश्वरी ॥ १२३ ॥

---

१. व्यासो विरामो—ख० ।
२. कलिन्दनन्दिनीनगा—ख० ।
३. विशिष्टानामधीश्वरी—ख० ।
४. गङ्गेशः—ख० ।
५. आतुरानाथसंज्ञश्च—ख० ।
६. कीर्तिश्रद्धाभिधारिणी—ख० ।
७. अर्धदेहो—ख० ।
८. प्राज्ञो तथा—ख० ।
९. ॐ ॐ अब्दमणेस्मृतिप्राणकलिङ्ग—ख० ।—अब्दः कालो मानं प्रमाणं यस्य सः, स्मृतिः प्राणो यस्य सः । द्वयोः कर्मधारयः ।
१०. ॐ ॐ अतिभोजतरङ्गिणी गुप्तचक्रात्मिकात्मदा—ख० ।
११. त्रिनाशनाथ—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्रिवाक्यगुणविप्रेन्द्रो महदाश्चर्यचित्रिणी ।
आशुतोषगुणाच्छन्न मदविह्वलमण्डला[१] ॥ १२४ ॥
विरूपाक्षी लेलिहश्च महामुद्राप्रकाशिनी ।
अष्टादशाक्षरो रुद्रो मकरन्दसुबिन्दुगा ॥ १२५ ॥

अव्यर्थवचन, प्रश्य, विद्यावागीश्वरप्रिया, अब्दमान, स्मृतिप्राण, कलिङ्गनगरेश्वरी, अतिगुह्यतरज्ञानी, गुप्तचन्द्रात्मिकाऽव्यया, मणिनागगत, गन्ता, वागीशानी, बलप्रदा, कुलासनगत, नाश, विनाशा, नाशसुप्रिया, विनाशमूल, कूलस्थ, संहारकुलकेश्वरी, त्रिवाक्यगुणविप्रेन्द्र, महदाश्चर्यचित्रिणी, आशुतोषगुणाच्छन्न, मदविह्वलमण्डला, विरूपाक्षी, लेलिह, महामुद्राप्रकाशिनी, अष्टादशाक्षर, रुद्र, मकरन्दसुबिन्दुगा ॥ १२१-१२५ ॥

छत्रचामरधारी च छत्रदात्री त्रिपौण्ड्रजा[२] ।
इन्द्रात्मको विधाता च धनदा नादकारिणी[३] ॥ १२६ ॥
कुण्डलीपरमानन्दो मधुपुष्पसमुद्भवा ।
बिल्ववृक्षस्थितो रुद्रो नयनाम्बुजवासिनी[४] ॥ १२७ ॥
हिरण्यगर्भः कौमारो विरूपाक्षा ऋतुप्रिया[५] ।
श्रीवृक्षनिलयश्यामो महाकुलतरूद्भवा ॥ १२८ ॥
कुलवृक्षस्थितो विद्वान् हिरण्यरजतप्रिया ।
कुलपः[६] प्राणपः प्राणा पञ्चचूडधराधरा ॥ १२९ ॥
उषती वेदिकानाथो नर्मधर्मविवेचिका[७] ।
शीतलाप्तः शीतहीनो मनःस्थैर्यकरी क्षया ॥ १३० ॥

छत्रचामरधारी, छत्रदात्री, त्रिपौण्ड्रजा, इन्द्रात्मक, विधाता, धनदा, नादकारिणी, कुण्डलीपरमानन्द, मधुपुष्पसमुद्भवा, बिल्ववृक्षस्थित, रुद्र, नयनाम्बुजवासिनी, हिरण्यगर्भ, कौमार, विरूपाक्षा, ऋतुप्रिया, श्रीवृक्षनिलयश्याम, महाकुलतरूद्भवा, कुलवृक्षस्थित, विद्वान्, हिरण्यरजतप्रिया, कुलपं, प्राणप, प्राणा, पञ्चचूडधराधरा, उषती, वेदिकानाथ, नर्मधर्मविवेचिका, शीतलाप्त, शीतहीन, मनःस्थैर्यकरी, क्षया ॥ १२६-१३० ॥

कुक्षिस्थः क्षणभङ्गस्थो गिरिपीठनिवासिनी ।
अर्धकायः[८] प्रसन्नात्मा प्रसन्नवनवासिनी ॥ १३१ ॥
प्रतिष्ठेशः[९] प्राणधर्मा ज्योतीरूपा ऋतुप्रिया ।
धर्मध्वजपताकेशो बलाका रसवर्द्धिनी[१०] ॥ १३२ ॥

---

१. सुन्दरी—ख० ।
२. त्रिपुण्ड्रजा—ख० ।
३. धनदानादि—ख० ।
४. रागिणी—ख० ।
५. क्रतुप्रिया—ख० ।
६. कुलेशः धरोधरा—ख० ।
७. धर्माधर्मविवेचका—ख० ।—नर्म हास्यादि, धर्मो वेदविहितो विधिः, आगमविहितो विधिर्वा, तयोः विवेचिका ।
८. स्वर्गकायः—ख० ।
९. प्रतिष्ठेशः प्राणधर्मो ज्योतिरूपा भृगुप्रिया—ख० ।
१०. शत—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मेरुशृङ्गगतो धूर्तो धूर्तमत्ता खलस्पृहा ।
सेवासिद्धिप्रदोऽनन्तोऽनन्तकार्यविभेदिका[१] ॥ १३३ ॥
भाविनामत्त्वजानज्ञो[२] विराटपीठवासिनी ।
विच्छेदच्छेदभेदश्च [३]छलन्शास्त्रप्रकाशिका ॥ १३४ ॥
चारुकर्म्या[४] संस्कृतश्च तप्तहाटकरूपिणी ।
परानन्दरसज्ञानी रससन्तानमन्त्रिणी ॥ १३५ ॥

कुक्षिस्थ, क्षणभङ्गस्थ, गिरिपीठनिवासिनी, अर्धकाय, प्रसन्नात्मा, प्रसन्नवनवासिनी, प्रतिष्ठेश, प्राणधर्मा, ज्योतीरूपा, ऋतुप्रिया, धर्मध्वजपताकेश, बलाका, रसवर्द्धिनी, मेरुशृङ्गगत, धूर्त, धूर्तमत्ता, खलस्पृहा, सेवासिद्धिप्रदऽनन्तऽनन्तकार्यविभेदिका, भाविनामत्त्विजानज्ञ, विराटपीठवासिनी, विच्छेदच्छेदभेद, छलन्शास्त्रप्रकाशिका, चारुकर्म्या, संस्कृत, तप्तहाटकरूपिणी, परानन्दरसज्ञानी, रससन्तानमन्त्रिणी ॥ १३१-१३५ ॥

प्रतीक्षः सूक्ष्मशब्दश्च प्रसङ्गसङ्गतिप्रिया ।
अमायी सागरोद्भूतो बन्ध्यादोषविवर्जिता ॥ १३६ ॥
जितधर्मो ज्वलच्छत्री[५] व्यापिका फलवाहना ।
व्याघ्रचर्माम्बरो योगी महापीना[६] वरप्रदा ॥ १३७ ॥

---

१. कार्या विभेदिका—ख० । २. ब्रह्मबीजं ततः पश्चात्—ख० ।
३. छलशास्त्रप्रकाशिका—ख० ।
* अन्येषां तोलकं चैकं संशोध्य भक्षणं चरेत् ।
पुनस्तेषां महाकालमनुं वक्ष्यामि तत्त्वतः ॥ १३२ ॥
सकलं चामरायोगं मन्त्रेणानेन भक्षयेत् ।
तारद्वयं समुद्धृत्य श्रीयुग्मं तदनन्तरम् ॥ १३३ ॥
विसर्गबिन्दुसंयुक्तं तत्पश्चादमृतामुखि ।
मारय हारय द्वन्द्वं योगसिद्धिं ततः परम् ॥ १३४ ॥
देहि देहि पदस्यान्ते स्वाहान्तं मन्त्रमुत्तमम् ।
एतन्मन्त्रेण चोद्धृत्य मन्त्रयित्वा प्रभक्षयेत् ॥ १३५ ॥
एतत्काण्डस्य मन्त्रं तु तत्रैव परियोजयेत् ।
निर्गुण्डी मन्त्रबीजेन्द्रं शृणु वक्ष्यामि भैरव ॥ १३६ ॥
कामबीजत्रयं पश्चात् कालीबीजत्रयं तथा ।
सर्वयोगं ततः पश्चात् साधय द्वयमेव च ॥ १३७ ॥
अमृतत्वं मयि शब्दं समर्पयद्वयं तथा ।
—इति ख० पुस्तके अधिकः पाठः ।

४. चारुकान्तालङ्कृतश्च सप्त—ख० ।
५. कुलवृतो ... ... भटवाहना—ख० ।
६. महापीठा बलप्रदा—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वरदाता सारदाता ज्ञानदा वरवाहिनी[१] ।
चारुकेशधरो [२]मापो विशाला गुणदाऽम्बरा ॥ १३८ ॥
ताडङ्कमालानिर्माल [३]धरस्ताडङ्कमोहिनी ।
पञ्चालदेश संभूतो [४]विशुद्धस्वरवल्लभा ॥ १३९ ॥
किरातपूजितो व्याधो मनुचिन्तापरायणा ।
शिववाक्यरतो वामो[५] भृगुरामकुलेश्वरी ॥ १४० ॥

प्रतीक्ष, सूक्ष्मशब्द, प्रसङ्गसङ्गतिप्रिया, अमायी, सागरोद्भूत, बन्ध्यादोषविवर्जिता, जितधर्म, ज्वलच्छत्री, व्यापिका, फलवाहना, व्याघ्रचर्माम्बर, योगी, महापीना, वरप्रदा, वरदाता, सारदाता, ज्ञानदा, वरवाहिनी, चारुकेशधर, माप, विशाला, गुणदाऽम्बरा, ताडङ्कमालानिर्मालधरस्ताडङ्कमोहिनी, पञ्चालदेश, संभूत, विशुद्धस्वरवल्लभा, किरातपूजित, व्याध, मनुचिन्तापरायणा, शिव, वाक्यरत, वाम, भृगुरामकुलेश्वरी ॥ १३६-१४० ॥

स्वयम्भुकुसुमाच्छन्नो विधिविद्याप्रकाशिनी ।
प्रभाकरतनूद्भूतो विशल्यकरणीश्वरी ॥ १४१ ॥
उषतीश्वरसम्पर्की योगविज्ञानवासिनी ।
उत्तमो मध्यमो व्याख्यो[६] वाच्यावाच्यवराङ्गना ॥ १४२ ॥
आंबीजवादरोषाढ्या[७] मन्दरोदरकारिणी ।
कृष्णसिद्धान्त[८]संस्थानो युद्धसाधनचर्चिका ॥ १४३ ॥
मथुरासुन्दरीनाथो[९] मथुरापीठवासिनी ।
पलायनविशून्यश्च प्रकृतिप्रत्ययस्थिता ॥ १४४ ॥
प्रकृतिप्राणनिलयो विकृतिज्ञाननाशिनी ।
सर्वशास्त्रविभेदश्च मत्तसिंहासनासना ॥ १४५ ॥

स्वयम्भू, कुसुमाच्छन्न, विधिविद्याप्रकाशिनी, प्रभाकरतनूद्भूत, विशल्यकरणीश्वरी, उषतीश्वरसम्पर्की, योगविज्ञानवासिनी, उत्तम, मध्यम, व्याख्य, वाच्यावाच्यवराङ्गना, आंबीजवादरोषाढ्या, मन्दरोदरकारिणी, कृष्णसिद्धान्तसंस्थान, युद्धसाधनचर्चिका, मथुरासुन्दरीनाथ, मथुरापीठवासिनी, पलायनविशून्य, प्रकृतिप्रत्ययस्थिता, प्रकृतिप्राणनिलय, विकृतिज्ञाननाशिनी, सर्वशास्त्रविभेद, मत्तसिंहासनासना ॥ १४१-१४५ ॥

इतिहासप्रियो धीरो विमलाऽमलरूपिणी ।
मणिसिंहासनस्थश्च मणिपूरजयोदया ॥ १४६ ॥

---

१. ज्ञानदानन्दवाहिनी—ख० ।
२. मान्यो ... ... विशालगुण—ख० ।
३. निर्माल्य—ख० ।
४. विशुद्धेश्वरवल्लभा—ख० ।
५. रामो—ख० ।
६. वाच्यो ... ... वराङ्गना—ख० ।
७. वोटाट्यो—ख० ।
८. कृष्णसिद्धान्तेषु आगमोक्तसिद्धान्तेषु संस्थानं यस्य स इति विवेकः ।
९. मथुरेत्यतः मणिसिंहासनात्प्राक् श्लोकद्वयं 'ख' पुस्तके नास्ति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भद्रकालीजपानन्दो भद्राभद्रप्रकाशिनी ।
श्रीभद्रो भद्रनाथश्च भयभङ्गविहिंसिनी ॥ १४७ ॥
आत्मारामो विधेयात्मा शूलपाणिप्रियाऽन्तरा ।
अतिविद्या[१]दृढाभ्यासो विशेषवित्त[२]दायिनी ॥ १४८ ॥
अजराऽमरकान्तिश्च[३] कान्तिकोटिधरा शुभा ।
पशुपालः पद्मसंस्थः श्रीशपाशुपताऽस्त्रदा ॥ १४९ ॥
सर्वशास्त्रधरो दृप्तो ज्ञानिनी ज्ञानवर्धिनी ।
द्वितीयानाथ ईशार्द्धो बादरायणमोहिनी ॥ १५० ॥

इतिहासप्रिय, धीर, विमलाऽमलरूपिणी, मणिसिंहासनस्थ, मणिपूरजयोदया, भद्रकालीजपानन्द, भद्राभद्रप्रकाशिनी, श्रीभद्र, भद्रनाथ, भयभङ्गविहिंसिनी, आत्माराम, विधेयात्मा, शूलपाणिप्रियाऽन्तरा, अतिविद्यादृढाभ्यास, विशेषवित्तदायिनी, अजराऽमरकान्ति, कान्तिकोटिधरा, शुभा, पशुपाल, पद्मसंस्थ, श्रीशपाशुपताऽस्त्रदा, सर्वशास्त्रधर, दृप्त, ज्ञानिनी, ज्ञानवर्धिनी, द्वितीयानाथ, ईशार्द्ध, बादरायणमोहिनी ॥ १४६-१५० ॥

शवमांसाशनो[४] भीमो भीमनेत्रा भयानका ।
शिवज्ञानक्रमो दक्षः क्रियायोगपरायणा[५] ॥ १५१ ॥
दानस्थो[६] दानसम्पन्नो दन्तुरा पार्वतीपरा ।
प्रियानन्दो दिवाकर्ता निशानिषादघातिनी[७] ॥ १५२ ॥
अष्टहस्तो विलोलाक्षो मनःस्थापनकारिणी ।
मृदुपुत्रो मृदुच्छत्रो विभाऽङ्गपुण्यनन्दिनी[८] ॥ १५३ ॥
अन्तरिक्षगतो मूलो मूलपुत्रप्रकाशिनी[९] ।
अभीतिदाननिरतो विधुमालामनोहरी ॥ १५४ ॥
चतुरास्त्रजाह्नवीशो[१०] गिरिकन्या कुतूहली ।
शिशुपालरिपुप्राणो विदेश[११]पदरक्षिणी ॥ १५५ ॥

शवमांसाशन, भीम, भीमनेत्रा, भयानका, शिवज्ञानक्रम, दक्ष, क्रियायोगपरायणा, दानस्थ, दानसम्पन्न, दन्तुरा, पार्वतीपरा, प्रियानन्द, दिवाकर्ता, निशानिषादघातिनी, अष्टहस्त, विलोलाक्ष, मनस्थापनकारिणी, मृदुपुत्र, मृदुच्छत्र, विभाऽङ्गपुण्यनन्दिनी, अन्तरिक्षगत, मूल,

---

१. अभिविद्या—ख० । २. विधि—ख० ।
३. अजरेत्यारभ्य ज्ञानवर्धिनीपर्यन्तं 'ख' पुस्तके नास्ति ।
४. मृगमांसाशनो—ख० ।
५. परायणाः—ख० । ६. कुलस्थो दानसम्मानो—ख० ।
७. निशायां ते निषादाश्चाण्डालास्तान् घातयति तच्छीला । अथवा निशामन्धकारमज्ञानं निषादं चण्डालकर्म च घातयति तच्छीला ।
८. कुलनन्दिनी—ख० । ९. मनःसूत्रप्रकाशिनी—ख० ।
१०. चतुरस्त्रो हृषीकेशो धनि—ख० । ११. विद्वेषिज्वरदायिनी—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मूलपुत्रप्रकाशिनी, अभीतिदाननिरत, विधुमालामनोहरी, चतुरास्त्रजाहनवीश, गिरिकन्या, कुतूहली, शिशुपालरिपुप्राण, विदेशपदरक्षिणी ॥ १५१-१५५ ॥

विलक्षणो[१] विधिज्ञाता मानहन्त्री त्रिविक्रमा ।
त्रिकोणानन-योगीशो निम्ननाभिर्नगेश्वरी ॥ १५६ ॥
नवीन गुणसम्पन्नो नवकन्याकुलाचला ।
त्रिविधेशो विशङ्केतो विज्वरा ज्वरदायिनी ॥ १५७ ॥
अतिधार्मिकपुत्रश्च चारुसिंहासनस्थिता ।
स्थापकोत्तमवर्गाणां[२] सतां सिद्धिप्रकाशिनी ॥ १५८ ॥
सिद्धप्रियो[३] विशालाक्षो ध्वंसकर्त्री निरञ्जना ।
शक्तीशो विकलेशश्च क्रतुकर्मफलोदया ॥ १५९ ॥
विफलेशो वियद्गामी ललिता बुद्धिवाहना ।
मलयाद्रितपःक्षेमः क्षयकर्त्री[४] रजोगुणा ॥ १६० ॥

विलक्षण, विधिज्ञाता, मानहन्त्री, त्रिविक्रमा, त्रिकोणाननयोगीश, निम्ननाभिर्नगेश्वरी, नवीन, गुणसम्पन्न, नवकन्याकुलाचला, त्रिविधेश, विशङ्केत, विज्वरा, ज्वरदायिनी, अतिधार्मिकपुत्र, चारुसिंहासनस्थिता, स्थापकोत्तमवर्गाणां, सतां, सिद्धिप्रकाशिनी, सिद्धप्रिय, विशालाक्ष, ध्वंसकर्त्री, निरञ्जना, शक्तीश, विकलेश, क्रतुकर्मफलोदया, विफलेश, वियद्गामी, ललिता, बुद्धिवाहना, मलयाद्रितप, क्षेम, क्षयकर्त्री, रजोगुणा ॥ १५६-१६० ॥

द्विरुण्डको द्वारपालो [५]बलेर्विघ्नविनाशिनी ।
मायापद्मगतो मानो [६]मारीविद्याविनाशिनी[७] ॥ १६१ ॥
हिङ्गुलाजस्थितः सिद्धो विदुषां वादसारिणी[८] ।
श्रीपतीशः श्रीकरेशः श्रीविद्या भुवनेश्वरी ॥ १६२ ॥
मतिप्रथमजो[९] धन्यो मिथिलानाथपुत्रिका ।
रामचन्द्रप्रियः प्राप्तो रघुनाथकुलेश्वरी ॥ १६३ ॥
कूर्मः[१०] कूर्मगतो वीरो वसावर्गा गिरीश्वरी ।
राजराजेश्वरी[११]बालो रतिपीठगुणान्तरा ॥ १६४ ॥
कामरूपधरोल्लासो विदग्धा कामरूपिणी ।
अतिथीशः [१२]सर्वभर्ता नानालङ्कारशोभिता ॥ १६५ ॥

---

१. विलक्षणो विध्येतरारभ्य ज्वरदायिनीपर्यन्तं 'ख' पुस्तके नास्ति ।
२. स्थापको गुणवर्गाणां—ख० । ३. सिद्धिप्रियो—ख० ।
४. क्षयकर्त्ता—ख० । ५. नानाविघ्न—ख० । ६. मायी—ख० ।
७. मारी महामारी तत्सम्पादिका या विद्या, तां विनाशयति, तच्छीला ।
८. साधिनी—ख० । ९. प्रथमतो—ख० ।
१०. कर्मकुलगतो धीरो वनदुर्गा गिरीश्वरी—ख० । ११. राजेश्वरो—ख० ।
१२. सुव्धभर्ता—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्विरुण्डक, द्वारपाल, बलेर्विघ्नविनाशिनी, मायापद्मगत, मान, मारीविद्याविनाशिनी, हिंगुलाजस्थित, सिद्ध, विदुषां, वादसारिणी, श्रीपतीश, श्रीकरेश, श्रीविद्या, भुवनेश्वरी, मतिप्रथमज, धन्य, मिथिलानाथपुत्रिका, रामचन्द्रप्रिय, प्राप्त, रघुनाथकुलेश्वरी, कूर्म, कूर्मगत, वीर, वसावर्गा, गिरीश्वरी, राजराजेश्वरीबाल, रतिपीठगुणान्तरा, कामरूपधरोल्लास, विदग्धा, कामरूपिणी, अतिथीश, सर्वभर्ता, नानालङ्कारशोभिता ॥ १६१-१६५ ॥

नानालङ्कारभूषाङ्गो नरमालाविभूषिता[१] ।
जगन्नाथो जगद्व्यापी जगतामिष्टसिद्धिदा ॥ १६६ ॥
जगत्कामो जगद्व्यापी[२] जयन्ती जयदायिनी ।
जयकारी जीवकारी जयदा[३] जीवनी जया ॥ १६७ ॥
जयो गणेशः श्रीदाता महापीठनिवासिनी[४] ।
विषमः सामवेदस्थो यजुर्वेदांशयोगया ॥ १६८ ॥
त्रिकालगुणगम्भीरो द्वाविंशतिकराम्बुजा[५] ।
सहस्रबाहुः सारस्थो[६] भागगा भवभाविनी ॥ १६९ ॥
भवनादिकरो[७] मार्गो विनीता नयनाम्बुजा ।
सर्वत्राकर्षकोऽखण्डः सर्वज्ञानाभिकर्षिणी ॥ १७० ॥

नानालङ्कारभूषाङ्ग, नरमालाविभूषिता, जगन्नाथ, जगद्व्यापी, जगतामिष्टसिद्धिदा, जगत्काम, जगद्व्यापी, जयन्ती, जयदायिनी, जयकारी, जीवकारी, जयदा, जीवनी, जया, जय, गणेश, श्रीदाता, महापीठनिवासिनी, विषम, सामवेदस्थ, यजुर्वेदांशयोगया, त्रिकालगुण-गम्भीर, द्वाविंशतिकराम्बुजा, सहस्रबाहु, सारस्थ, भागगा, भवभाविनी, भवनादिकर, मार्ग, विनीता, नयनाम्बुजा, सर्वत्राकर्षकोऽखण्ड, सर्वज्ञानाभिकर्षिणी ॥ १६६-१७० ॥

जिताशयो जितविप्रः[८] कलङ्कगुणवर्जिता ।
निराधारो निरालम्बो विषयाज्ञानवर्जिता ॥ १७१ ॥
अतिविस्तारवदनो विवादखलनाशिनी ।
भार्यानाथः[९] क्षोभनाशो रिपूणां कुलपूजिता ॥ १७२ ॥
आशवो[१०] भूरिवर्गाणां चारुकुन्तलमण्डिता ।
अतिबुद्धिधरो सूक्ष्मो रजनीध्वान्तनाशिनी ॥ १७३ ॥
ज्योत्स्नाजालकरो योगी[११] वियोगशायिनी युगा।
युगगामी योगगामी[१२] जयदा लाकिनी शिवा ॥ १७४ ॥

---

१. वनमालाविभूषणा—ख० । २. जगज्जायो जयन्ती—ख० ।
३. जीवनी जयी—ख० । ४. मञ्चपीठ—ख० ।
५. वेदांशमयाख्या—ख० । द्वाविंशतिः करा हस्ता अम्बुजानि कमलानि इव यस्याः या ।
६. भावस्थो भावना—ख० । ७. भवनादकरो मार्गो—ख० ।
८. जितरिपुः कलङ्कदोषवर्जिता—ख०। ९. आर्यनाथ.....कुलनाशिनी—ख० ।
१०. आश्रयो—ख०। ११. वियोगगामिनीयुता—ख०। १२. जयदानकारी—ख०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संज्ञाबुद्धिकरो भावो भवभीतिविमोहिनी ।
सुन्दरः सुन्दरानन्दो रतिकारतिसुन्दरी[१] ॥ १७५ ॥

जिताशय, जितविप्र, कलङ्कगुणवर्जिता, निराधार, निरालम्ब, विषया, ज्ञानवर्जिता, अतिविस्तारवदन, विवादखलनाशिनी, भार्यानाथ, क्षोभनाश, रिपूणां, कुलपूजिता, आशव, भूरिवर्गाणां, चारुकुन्तलमण्डिता, अतिबुद्धिधर, सूक्ष्म, रजनीध्वान्तनाशिनी, ज्योत्स्नाजालकर, योगी, वियोगशायिनी, युगा, युगगामी, योगगामी, जयदा, लाकिनी, शिवा, संज्ञाबुद्धिकर, भाव, भवभीतिविमोहिनी, सुन्दर, सुन्दरानन्द, रतिकारतिसुन्दरी ॥ १७१-१७५ ॥

रतिज्ञानी रतिसुखो [२]रतिनाथप्रकाशिनी ।
बुद्धरूपी[३] बोधमात्रो वैरोधो द्वैतवर्जिता ॥ १७६ ॥
भूरिभावहरानन्दो भूरिसन्तानदायिनी ।
यज्ञसाधनकर्ता च सुयज्ञ पञ्चमोचना[४] ॥ १७७ ॥
कोटिकोटिचन्द्रतेजः[५] कोटिकोटिरुचिच्छटा ।
कोटिकोटिचञ्चलाभो[६] द्विकोट्ययुतचञ्चला ॥ १७८ ॥
कोटिसूर्याच्छन्नदेहः कोटिकोटिरविप्रभा ।
कोटिचन्द्रकान्तमणिः कोटीन्दुकान्तनिर्मला ॥ १७९ ॥
शतकोटिविधुमणिः शतकोटीन्दुकान्तगा ।
विलसत्कोटिकालाग्निः कोटिकालानलोपमा ॥ १८० ॥

रतिज्ञानी, रतिसुख, रतिनाथप्रकाशिनी, बुद्धरूपी, बोधमात्र, वैरोधो, द्वैतवर्जिता, भूरिभावहरानन्द, भूरिसन्तानदायिनी, यज्ञसाधनकर्ता, सुयज्ञ, पञ्चमोचना, कोटिकोटिचन्द्रतेज, कोटिकोटिरुचिच्छटा, कोटिकोटिचञ्चलाभ, द्विकोट्ययुतचञ्चला, कोटिसूर्याच्छन्नदेह, कोटि-कोटिरविप्रभा, कोटिचन्द्रकान्तमणि, कोटीन्दुकान्तनिर्मला, शतकोटिविधुमणि, शतकोटीन्दु-कान्तगा, विलसत्कोटिकालाग्नि, कोटिकालानलोपमा ॥ १७६-१८० ॥

कोटिवह्निगतो[७] वह्नि वह्निजाया द्विगोद्भवा ।
महातेजो वह्निवारिः[८] कालाग्निहारधारिणी ॥ १८१ ॥
कालाग्निरुद्रो भगवान्[९] कालाग्निरुद्ररूपिणी ।
कालात्मा कलिकालात्मा कलिका कुललाकिनी[१०] ॥ १८२ ॥

---

१. रतिकामातिसुन्दरी—ख० । २. रतिसुख—ख० ।
३. बुद्धिरूपी बोधमात्रा द्विबोधा द्वैतवर्जिता—ख० ।
४. परमासना—ख० ।—परममासनं यस्याः सा 'पञ्चमोचना' इति पाठे तु पञ्चभ्यः शब्दादि विषयेभ्यो मोचयति या सा । नन्द्यादित्वाल्ल्युः प्रत्ययः, अनादेशः।
५. तेजा ..... रविच्छटा—ख० । ६. चन्द्रनाभो द्विकोटियुत—ख० ।
७. कोटि कोटि वह्निनिभो—ख० । ८. राशिः—ख० ।
९. कालाग्निरुद्रो—ख । १०. कुलनाशिनी—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मृत्युजितो[१] मृत्युतेजा मृत्युञ्जयमनुप्रिया ।
महामृत्युहरो मृत्युरपमृत्युविनाशिनी ॥ १८३ ॥
जयो जयेशो जयदो जयदा जयवर्धिनी ।
जयकरो जगद्धर्मो जगज्जीवनरक्षिणी ॥ १८४ ॥
सर्वजित् सर्वरूपी च सर्वदा सर्वभाविनी ।
इत्येतत्[२] कथितं नाथ महाविद्याभिधानकम्[३] ॥ १८५ ॥

कोटिवह्निगत, वह्नि, वह्निजाया, द्विगोद्भवा, महातेज, वह्निवारि, कालाग्निहारधारिणी, कालाग्निरुद्र, भगवान्, कालाग्निरुद्ररूपिणी, कालात्मा, कलिकालात्मा, कलिका, कुललाकिनी, मृत्युजित, मृत्युतेजा, मृत्युञ्जयमनुप्रिया, महामृत्युहर, मृत्युरपमृत्युविनाशिनी, जय, जयेश, जयद, जयदा, जयवर्धिनी, जयकर, जगद्धर्य, जगज्जीवनरक्षिणी, सर्वजित्, सर्वरूपी, सर्वदा, सर्वभाविनी । महाविद्या के इतने नामों को कहा ॥ १८१-१८५ ॥

विमर्श—हवन करने के समय जो नाम कम हैं उनकी पूर्ति के लिए उन्हीं नामों की द्विरावृत्ति करके ११०८ संख्या पूर्ण कर लेनी चाहिए ॥ १८५ ॥

शब्दब्रह्ममयं साक्षात् कल्पवृक्षस्वरूपकम्[४] ।
अष्टोत्तरसहस्राख्यं शतसंख्यासमाकुलम् ॥ १८६ ॥
त्रैलोक्यमङ्गलक्षेत्रं सिद्धविद्याफलप्रदम् ।
सकलं निष्कलं साक्षात् कल्पद्रुमकलान्वितम्[५] ॥ १८७ ॥

फलश्रुति—ये कुल एक हजार एक सौ आठ नाम साक्षात् शब्द ब्रह्ममय हैं और कल्पवृक्ष के तो स्वरूप ही हैं । ये नाम त्रिलोकी का मङ्गल करने वाले हैं तथा सिद्धविद्या का फलप्रदान करते हैं—ये साकार तथा निराकार दोनों ही हैं तथा साक्षात् कल्पद्रुम की कला से युक्त हैं ॥ १८६-१८७ ॥

योगिनामात्मविज्ञानमात्मज्ञानकरं[६] परम् ।
यः पठेद् भावसम्पूर्णो मिथ्याधर्मविवर्जितः ॥ १८८ ॥
रुद्रपीठे स्वयं[७] भूत्त्वा महायोगी भवेद्ध्रुवम् ।
अकस्मात्सिद्धिमाप्नोति चाधमां[८]माल्यदायिनीम् ॥ १८९ ॥
राजलक्ष्मीधनैश्वर्यमतिधैर्य[९] हयादिकम् ।
कुञ्जरं सुन्दरं वीरं[१०] पुत्रं राज्यं सुखं जयम् ॥ १९० ॥

---

१. मृत्युजित् मृत्युजेता—ख० । २. ॐ ॐ ॐ—ख० पु० अधिकः पाठः ।
३. महाविद्या अभिधानं यस्य तदिति बहुव्रीहिः । महाविद्याया वर्णनं तत्र तत्रोपलभ्यते ।
४. कल्पवृक्षफलान्वितम्—ख० । ५. फलान्वितम्—ख० ।
६. मोक्षज्ञानकरं परम्—ख० । ७. रुद्रपीठे स्वयंभूयो—ख० ।
८. चाधिकं—ख० । ९. राजलक्ष्मीं—ख० ।
१०. धीरम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

योगियों के लिए आत्मविज्ञान (ब्रह्म) हैं । इतना ही नहीं सबको आत्मज्ञान देने वाले हैं । जो आडम्बर एवं छलरहित होकर और भावविभोर होकर इसका पाठ करता है, वह रुद्रपीठ में उत्पन्न होकर निश्चय ही महायोगी बन जाता है । जो इसका पाठ करता है उसे अकस्मात् माल्यप्रदान करने वाली अधमा सिद्धि प्राप्त होती है । जिसमें राजलक्ष्मी, धन, ऐश्वर्य, अतिधैर्य, हयादि, गज, सुन्दर वीरपुत्र एवं राज्य सुख तथा जय की प्राप्ति होती है ॥ १८८-१९०

राजराजेश्वरत्वं च दिव्यवाहनमेव च ।
अक्लेशपञ्चमासिद्धिं[1] ततः प्राप्नोति मध्यमाम् ॥ १९१ ॥
अत्यन्तदुःखहननं गुरुत्वं लोकमण्डले ।
देवानां भक्तिसंख्याञ्च[2] दिव्यभावं सदा सुखम् ॥ १९२ ॥

उसे राजराजेश्वरत्व दिव्यवाहन मिलता है, फिर बिना क्लेश के पञ्चम मध्यमा सिद्धि की भी प्राप्ति होती है । जिसमें उसके समस्त दुःख नष्ट हो जाते हैं, लोकमण्डल में उसे गुरुत्व एवं सर्वश्रेष्ठता प्राप्त होती है, देवताओं में भक्तिभाव की वृद्धि होती है एवं दिव्यभाव तथा सदासुख मिलता है ॥ १९१-१९२ ॥

आयुर्वृद्धिं लोकवश्यं पूर्णकोशं हि गोधनम् ।
देवानां [3]राज्यभवनं प्रत्यक्षे स्वप्नकालके ॥ १९३ ॥
दीर्घदृष्टिभयत्यागं चाल्पकार्यविवर्जितम् ।
सदा धर्मप्रियत्वं च धर्मज्ञानं महागुणम् ॥ १९४ ॥

उसके आयु की वृद्धि होती है, समस्त लोक उसके वश में हो जाते हैं, उसका कोश सदैव भरा रहता है, गोधन मिलता है तथा प्रत्यक्ष में एवं स्वप्न काल में उसे राज्य भवन में वास प्राप्त होता है । उसकी दृष्टि दूर तक देखने वाली होती है, भय का सर्वथा विनाश हो जाता है, वह छोटा निन्दनीय कार्य नहीं करता, धर्म से प्रेम करता है तथा अत्यन्त गुणवान् महान् धर्म का उसे अपने आप ज्ञान हो जाता है ॥ १९३-१९४ ॥

विवेकाङ्कुरमानन्दं [4]श्रीवाणीसुकृपान्वितम् ।
तत उत्तमयोगस्थां सिद्धिं [5]प्राप्नोति साधकः ॥ १९५ ॥
अनन्तगुणसंस्थानं[6] मायार्थभूतिवर्जनम् ।
एकान्तस्थानवसतिं योगशास्त्रनियोजनम् ॥ १९६ ॥

उसके हृदय में आनन्द देने वाला विवेक का अंकुर उत्पन्न हो जाता है, वह श्री वाणी की कृपा प्राप्त कर लेता है, इसके बाद वह साधक उत्तमयोग वाली सिद्धि प्राप्त करता है । जिसमें अनन्त गुणों का स्थान है । माया के लिए अर्थभूति विवर्जित रहती है, वह सदैव एकान्त स्थान में निवास करता है तथा योगशास्त्र में अपने को लगाता है ॥ १९५-१९६ ॥

---

१. पञ्चमाम्—ख० । २. भावञ्च ख० ।
३. वाक्यश्रवणम्—ख० ।—वाक्यस्य श्रवणमत्यन्तं महत्त्वमादधाति । एतेन महनीयं रहस्यमुद्घाटितं भवति । ४. श्रावणीसुकृपान्वितम्—ख० ।
५. प्राप्नोति साधकोत्तमः—ख० । ६. अत्यन्तगुणसंस्थानम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वाकाङ्क्षाविशून्यत्वं दैवतैकान्तसेवनम् ।
खेचरत्वं सर्वगतिं भावसिद्धिं सुरप्रियम्[१] ॥ १९७ ॥
सदा [२]रौद्रक्रियायोगं विभूत्यष्टाङ्गसिद्धिदम् ।
दृढज्ञानं सर्वशास्त्रकारित्वं[३] रससागरम् ॥ १९८ ॥
एकभावं द्वैतशून्यं महापदनियोजनम् ।
महागुणवतीविद्यापतित्वं शान्तिमेव च ॥ १९९ ॥
प्राप्नोति साधकश्रेष्ठो यः पठेद् भावनिश्चलः ।
त्रिकालमेककालं वा द्विकालं वा पठेत् सुधीः ॥ २०० ॥

उसे कोई भी अकांक्षा बाधा नहीं करती । वह देवता बन कर एकान्त स्थान का सेवन करता है । खेचरता, अप्रतिहतगतित्त्व, भावसिद्धि तथा देवताओं में अनुराग होता है । उसे रुद्र की क्रिया में योग देने वाले और अष्टाङ्ग योग से सिद्धि प्रदान करने वाली विभूति प्राप्त होती है, उसे दृढ़ ज्ञान होता है और सभी शास्त्रों का कर्तृत्व प्राप्त होता है तथा वह समस्त रसों का सागर बन जाता है । जो सुधी साधक भाव में निमग्न हो कर तीनों काल, दोनों काल अथवा एक काल इस स्तोत्र का पाठ करता है वह सदैव द्वैतशून्य एक भाव में निवास करता है, महापद में अपने आप को लीन कर लेता है और महागुणवती विद्या का स्वामित्व तथा शान्ति का लाभ करता है ॥ १९७-२०० ॥

शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः ।
पुरश्चरणमाकृत्य पठित्वा च पुनः पुनः ॥ २०१ ॥
अष्टैश्वर्ययुतो भूत्वा [४]मनोगतिमवाप्नुयात् ।
सर्वत्र[५] कुशलं व्याप्तं यः पठेन्नियतः शुचिः ॥ २०२ ॥

इसके १०८ पाठ से एक पुरश्चरण पूर्ण होता है, इसका पुरश्चरण करके तथा बारम्बार पाठ करके साधक अणिमादि अष्टैश्वर्य से युक्त हो कर सम्पूर्ण वाञ्छित फल प्राप्त करता है । किं बहुना, जो नित्य नियम पूर्वक पवित्रता से इसका पाठ करता है, उसे सर्वत्र कुशल ही कुशल दिखाई पड़ता है ॥ २०१-२०२ ॥

षट्चक्रमणिपीठञ्च भित्त्वाऽनाहतगो भवेत् ।
अनाहतं ततो भित्त्वा विशुद्धसङ्गमो भवेत् ॥ २०३ ॥

वह षट्चक्र में होने वाले मणिपीठ का भेदन कर अनाहत चक्र में गमन करता है । इसके बाद अनाहत का भेदन कर विशुद्ध चक्र में चला जाता है ॥ २०३ ॥

---

१. सुरप्रियम्—ख० । २. सदायोग—ख० ।
३. धर्मशास्त्रे कवित्वम्—ख० ।
४. विशुद्धसङ्गमो भवेत्—ख० ।—मनसो गतिः । सा च वायोर्गतितोऽपि अत्यन्तं सूक्ष्मा भवति । अत एव भगवतो हनुमतो विषये मनोजव इति शब्दः प्रयुज्यते ।
५. सर्वत्रेत्यारभ्य भवेदितिपर्यन्तं ख—पुस्तके नास्ति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विशुद्धपद्मं भित्त्वा च शीर्षे[१] द्विदलगो भवेत् ।
द्विदलादिमहापद्मं भित्त्वैतत् स्तोत्रपाठतः ॥ २०४ ॥

पुनः विशुद्ध चक्र का भी भेदन कर, शीर्ष स्थान में जहाँ दो दल स्थित हैं उस आज्ञा चक्र का भी भेदन कर वह साधक सहस्रार महाप्दम में प्रवेश कर जाता है । ऐसा इस स्तोत्र का प्रभाव है ॥ २०४ ॥

चतुर्वर्गां[२] क्रियां कृत्वा चान्ते निर्वाणमोक्षभाक् ।
योगिनां योगसिद्ध्यर्थे सर्वभूतदयोदयम्[३] ॥ २०५ ॥
निर्वाणमोक्षसिद्ध्यर्थे कथितं परमेश्वर ।
एतत्स्तवनपाठेन किं न सिद्ध्यति भूतले ॥ २०६ ॥

वह धर्म अर्थ काम तथा मोक्ष के लिए की जाने वाली सारी क्रिया का सम्पादन कर अन्त में निर्वाण मोक्ष का पात्र हो जाता है । हे परमेश्वर ! समस्त प्राणियों पर कृपा करने वाले योगियों को योगसिद्धि प्रदान करने वाले तथा निर्वाणमोक्ष की सिद्धि के लिए यह स्तोत्र आप से कहा । इस स्तोत्र के पाठ से पृथ्वी पर कौन ऐसी वस्तु है जिसकी सिद्धि न हो ॥ २०५-२०६ ॥

कुलं कुलक्रमेणैव[४] साधयेद् योगसाधनम् ।
योगान्ते योगमध्ये च योगाद्ये प्रपठेत् स्तवम् ॥ २०७ ॥

यह कुल (शक्ति) मार्ग है इसके कुलक्रम से ही योगसाधन सिद्ध करना चाहिए। योग के अन्त में योग के मध्य में तथा योग के आदि में इस स्तोत्र का पाठ करना चाहिए ॥ २०७ ॥

कृत्तिकारोहिणीयोगयात्रायां[५] मिथुने तथा ।
श्रवणायां मेषगणे[६] कुजे चेन्दुसमाकुले ॥ २०८ ॥
शनिवारे च सङ्क्रान्त्यां कुजवारे पुनः पुनः[७] ।
सन्ध्याकाले लिखेत् स्तोत्रं ध्यानधारणयोगिराट्[८] ॥ २०९ ॥

कृत्तिका नक्षत्र तथा रोहिणी नक्षत्र के योग में यदि यात्रा करनी हो अथवा मिथुन के चन्द्रमा हो, श्रवण नक्षत्र हो मेष के चन्द्रमा हो मङ्गल, सोम, शनिवार का दिन हो अथवा जिस दिन संक्रान्ति में मङ्गलवार का दिन पड़े, उस दिन सांयकाल में ध्यान धारणपूर्वक योगिराज इस स्तोत्र को लिखे ॥ २०८-२०९ ॥

---

१. शीघ्रम्—ख० ।
२. चतुर्वर्गक्रियाम्—ख० ।
३. शुभोदयात्—ख० ।
४. कुलाकुलक्रमेणैव—ख० ।
५. योगे आर्द्रायां—ख० ।
६. लग्ने कुब्जे कुहु—ख० ।
७. पुनर्वसौ—ख० ।
८. वित्—ख० । —ध्यानं च धारणं च ध्यानधारणे, तयोर्योगी, तत्र राजमानः । व्यानधारणयोः सिद्धिं सम्पाद्य विराजमानो योगी इत्यर्थः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भूर्जपत्रे लिखित्वा च कण्ठे शीर्षे [१]प्रधारयेत् ।
अथवा रात्रियोगे च कुलचक्रे लिखेत् सुधीः ॥ २१० ॥
सर्वत्र कुलयोगेन पठन्[२] सिद्धिमवाप्नुयात् ।
एतन्नाम्ना प्रजुहुयात् कालिकाकृतिमान्[३] भवेत् ॥ २११ ॥
तद्दशांशक्रमेणैव हुत्वा योगीह सर्वदा ।
मणिपूरे दृढो भूत्वा रुद्रशक्तिकृपां[४] लभेत् ॥ २१२ ॥

॥ इति[५] श्रीरुद्रयामले लाकिनीशाष्टोत्तरशतसहस्रनामविन्यासे
एकपञ्चाशत्तमः पटलः ॥ ५१ ॥

अथवा भोजपत्र पर लिखकर गले में अथवा शिर पर धारण करे, अथवा रात्रि का योग उपस्थित होने पर सुधी साधक कुलचक्र में इसे लिखे । इस प्रकार कुलयोग मे सदैव इसका पाठ करते हुए लिखे तो उसे सिद्धि प्राप्त होती है । यदि इन नामों से होम करे तो वह कालिका के समान आकृति वाला हो जाता है । योगी पाठ के दशांश के क्रम से होम कर मणिपूर में दृढ़तापूर्वक प्रवेश प्राप्त करता है तथा रुद्र की महाशक्ति लाकिनी की कृपा प्राप्त कर लेता है ॥ २१०-२१२ ॥

॥ श्रीरुद्रयामल के लाकिनी के ११०८ नामों के विन्यास में इक्यावनवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ५१ ॥

---

१. प्रदापयेत्—ख० । २. पठित्वा—ख० ।
३. कालिकाहुतिदानवत्—ख० ।
४. रुद्रस्य भगवतो या शक्तिः भगवती भवानी रुद्राणी, तस्याः कृपा ।
५. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवी-भैरवसंवादे महारुद्रमृत्युञ्जयलाकिनीशाष्टोत्तरशतसहस्रविन्यासो नाम द्विपञ्चाशत्तमः पटलः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ द्विपञ्चाशत्तमः पटलः

श्रीआनन्दभैरव उवाच

कथयस्व वरारोहे मणिपूरमनुक्रमम् ।
यज्ज्ञात्वा मुनयः सर्वे चाष्टसिद्धिमवाप्नुयुः ॥ १ ॥
प्रजपन् गच्छति क्षिप्रं अनायास[१]मनाहते ।
मन्त्रार्थं [२]मन्त्रचैतन्यं निजविग्रहरक्षणम् ॥ २ ॥
तत्परापरग्रन्थिस्थं विचार्य वक्तुमर्हसि ।

आनन्दभैरव ने कहा—हे वरारोहे ! अब आप मणिपूर पद्म चक्र में होने वाले अनुक्रम (मन्त्र, तन्त्र, मनः स्थिति) के विषय में कहिए, जिसका ज्ञान कर सभी मुनियों ने अष्टसिद्धि प्राप्त की । हे देवि ! आप उन-उन तत्त्वों को कहिए जिसका जप करते हुए साधक अनायास ही अनाहत चक्र में प्रवेश कर जाता है । इतना ही नहीं साधक के शरीर के रक्षणोपयोगी मणिपूर के परापर ग्रन्थि में रहने वाले मन्त्र के अर्थों को और मन्त्र में चेतना प्रदान करने वाले उन-उन तत्त्वों को भी विचार कर कहिए ॥ १-३ ॥

श्रीआनन्दभैरवी उवाच

महाभैरव कालाग्ने मनुज्ञानं [३]निशामय ॥ ३ ॥
कथयामि तव स्नेहादतिकोमलसाधनम् ।
मन्त्राणां मन्त्रचैतन्यं[४] विषयानि शृणु प्रभो ॥ ४ ॥

श्रीआनन्दभैरवी ने कहा—हे महाभैरव! हे कालाग्ने ! मन्त्रज्ञान रात्री के अन्धकार के समान सरलता से बोधगम्य नहीं है । मैं आपके स्नेह से मन्त्र ज्ञान तथा मन्त्रों के चैतन्य वाले उन-उन विषयों को कहती हूँ जो सौम्य साधन के योग्य हैं । हे प्रभो ! उसे सुनिए ॥ ३-४ ॥

मणिपूरे त्वनायासे[५] यत्प्रसादात् स्थिरो[६] भवेत् ।
एतत्करणमात्रेण योगी भवति निश्चितम् ॥ ५ ॥

हे देव ! जिसकी कृपा से साधक अनायास ही उस मणिपूर चक्र में पहुँचकर स्थिर हो जाता है तथा जिसके करने मात्र से निश्चित रूप से योगी बन जाता है । उसे सुनिए ॥ ५ ॥

---

१. प्राणायामैरनाहते—ख० ।
२. मनु—ख० ।
३. नां मनशाय—क० ।
४. मनुना मन्त्रचैतन्यं विविधानि—ख० ।
५. तव ज्ञाने—ख० ।
६. शिवो—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कोटिकोटिमन्त्रजालं[१] तदर्थकोटयः स्मृताः ।
एतन्मध्ये सारभागं कथयामि कुलार्णव ॥ ६ ॥

ऐसे तो करोड़ों करोड़ों की संख्या वाले मन्त्र जाल हैं और उन मन्त्रों के करोड़ों करोड़ों अर्थ भी बताये गए हैं । किन्तु हे कुलार्णव ! मैं उनके भीतर रहने वाले सारभाग को ही कहूँगी ॥ ६ ॥

सर्वत्र समभावेन संस्मरन्[२] मन्त्रमुत्तमम् ।
शरीरमपरिच्छिन्नं ब्रह्माण्डं सचराचरम् ॥ ७ ॥
मूलादिमणिपूरान्तं त्रिगुणं मनुरूपकम् ।
वर्णमालामुपादाय[३] मुहुर्मुहुर्जपेत् सुधीः ॥ ८ ॥

(मणिपूर में रहने वाले उस) उत्तम मन्त्र का समस्त चराचर ब्रह्माण्ड ही अपरिच्छिन्न शरीर है । अतः सुधी साधक सर्वत्र, समभाव से मन्त्र का स्मरण करते हुए मूलाधार से लेकर मणिपूर पर्यन्त त्रिगुणात्मक मन्त्ररूप में विद्यमान् समस्त वर्णमाला का बारम्बार जप करे ॥ ७-८ ॥

पूर्णतेजोमयीं ध्यायेत्[४]कोटिकालाग्निरूपिणीम् ।
स्वदेवतां सदा ध्यायेन्मूलादिब्रह्मरन्ध्रके ॥ ९ ॥
तन्मूर्तिमपरिच्छिन्नां[५] गूढस्थाननिवासिनीम् ।
गभीरोर्ध्वगलानन्दां[६] सुधासागरवासिनीम् ॥ १० ॥

करोड़ों कालाग्नि के रूप में विद्यमान पूर्णतेजोमयी (मातृका वर्णों का) ध्यान करे और स्वदेवता का मूलाधार से ब्रह्मरन्ध्रपर्यन्त प्रदेश में सदैव ध्यान करे । उस वर्णमाला की मूर्ति अपरिमेय है जो गूढ़ स्थान में रहने वाली है, गम्भीर है, जिसके ऊपर ब्रह्मरन्ध्र से आनन्द का स्रोत प्रवाहित हो रहा है और जो सुधा के समुद्र में निवास करती है ॥ ९-१० ॥

यज्ज्ञात्वा[७] ब्रह्मतुल्यं स्याद् ब्रह्मरन्ध्रे विभावनात् ।
मूलरन्ध्रे मुदा ध्यायेत्[८]कोटिकालानलोज्ज्वलम् ॥ ११ ॥

साधक जिसका ब्रह्मरन्ध्र में ध्यान करने से ब्रह्म के समान हो जाता है, ऐसे करोड़ों कालानल के समान उज्ज्वल उस तेज का ब्रह्मरन्ध्र में प्रसन्नतापूर्वक ध्यान करे ॥ ११ ॥

ज्वलन्तं ध्यानमाकुर्यादूर्ध्वशिखाप्रभाकरम् ।
सुधारसमोदमुग्धं[९] हव्याग्निसदृशोज्ज्वलम् ॥ १२ ॥

---

१. मन्त्रजापात् तदर्थे—ख० ।
२. संस्मरेत् मूर्तिमुत्तमाम्—ख० ।
३. वर्णमालानुसारेण—ख० ।
४. कोटिकामग्निरूपिणीम्—ख० ।
५. गृह—ख० ।
६. गभीराह्लादनानन्दाम्—ख० ।
७. यज्ज्ञात्वेति पुस्तके नास्ति—ख० ।
८. ज्वलाम्—ख० ।
९. रसामोदिमुग्धम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ललाटं चिन्तयेत् कान्तं पूर्णेन्दुकोटिसङ्कुलम्[1]।
विगलद्रसपुञ्जं तु [2]तद्रसप्रोज्ज्वलाननम् ॥ १३ ॥
स्थिरवायुस्थिराकारं[3] मन्त्रार्थं चेति भावयेत् ।

साधक ऊपर की ओर उठती हुई ज्वाला से प्रकाशित होने वाले, सुधारस के आनन्द से मुग्ध एवं हव्य ग्रहण करने वाली अग्नि के सदृश उज्ज्वल वर्णमाला का ध्यान करें । करोड़ों पूर्णमासी के चन्द्रमा से संयुक्त, अत्यन्त मनोहर उस वर्णमाला के मन्त्रार्थ का ललाट में ध्यान करें। जिस मन्त्रार्थ से रस का समूह प्रवाहित हो रहा है तथा उस रस के प्रवाह से अपना मुख उद्दीप्त हो रहा है ऐसे स्थिर वायु वाले तथा स्थिर आकार के मन्त्रार्थ का चिन्तन करे ॥ १२-१४ ॥

अथवा शुद्धसङ्काशं [4]पूर्णब्रह्ममयूखगम् ॥ १४ ॥
मूलादिब्रह्मरन्ध्रान्तं[5] मूलं ध्यात्वा पुनः पुनः ।
विचिन्तयेत् सूक्ष्मरूपां महागुर्वीं स्वदेवताम् ॥ १५ ॥

अथवा अत्यन्त शुद्धता से संयुक्त पूर्ण ब्रह्म के किरणों में विद्यमान उस मूलभूत तेज का मूलाधार से लेकर ब्रह्मरन्ध्र पर्यन्त प्रदेश में बारम्बार ध्यान कर सूक्ष्म स्वरूप वाली, अत्यन्त गुरुतर स्वदेवता का भी ध्यान करे ॥ १४-१५ ॥

मन्त्रार्थं चेति तज्ज्ञानं तज्ज्ञानान्मोक्षमाप्नुयात् ।
मन्त्रार्थज्ञानमात्रेण [6] सिद्धिनिर्वाणमाप्नुयात् ॥ १६ ॥

यही मन्त्रार्थ है, जिसका ज्ञान करना चाहिए । उस मन्त्र के अर्थ के ज्ञान से साधक मोक्ष प्राप्त कर लेता है । क्योंकि मन्त्रार्थ के ज्ञान मात्र से सिद्धि तथा निर्वाण (मोक्ष) प्राप्त होता है ॥ १६ ॥

न स्थूलं नातिसूक्ष्मं गुणमयवपुषं विश्वनाथं [7]स्वशक्तिं
स्वानन्दानन्दचित्तं कलिफलमचलं चञ्चलं शुक्लरक्तम् ।
पीनापीनादिरूपं त्रिगुणगगमनं मूलपद्मादिवक्त्रे[8]
विश्वात्मानं कुलाख्यं मनुगुणजडितं भावयेत्सिद्धलोकः[9] ॥ १७ ॥

सिद्ध लोग प्रथम मूलाधार पद्म के मुख में इस प्रकार के स्वरूप का ध्यान करें, जो न स्थूल है, न अत्यन्त सूक्ष्म है, जिसका शरीर गुणमय है, जो विश्वनाथ तथा अपनी शक्ति

---

१. सङ्गमम्—ख० । २. रसात्प्रोज्वलानलम्—ख० ।
३. वायुं स्थिराकारं—ख० । ४. मयं शुभम्—ख० ।
५. मूलादिब्रह्मरन्ध्रान्तं मूलम् । मूलमाद्यचक्रं तदादिर्यस्य, ब्रह्मरन्ध्रं शिरोदेशस्थं चक्रं तदन्तो यस्य तत् ।
६. मन्त्रार्थज्ञानेति—ख० पुस्तके नास्ति ।
७. सानन्दा ..... सकलं शुक्लवक्त्रं विशुद्धम्—ख० ।
८. रन्ध्रे—ख० । ९. सिद्धिहेतोः—ख० ।

 CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

से युक्त है, जिसका चित्त स्वकीयानन्द से ही आनन्दपूर्ण है, जो कलि का फल है, अचल एवं चञ्चल है, शुक्ल तथा रक्त वर्ण वाला है, पीन (मोटा) और अपीन (पतला) स्वरूप वाला है, त्रिगुणगामी है ऐसे कुल नाम वाले मनु (मन्त्र) गुण से जटित विश्वात्मा का ध्यान करना चाहिए ॥ १७ ॥

चतुः षष्टिक्षेत्रे त्रिगुणजननीं ध्याननिपुणां
(महा) [१]मन्त्राकारां भुवनकरुणां बोधविषये ।
महाविद्यामाद्यां [२]मनुमयरसाच्छन्नतनुता-
मवाप्यामन्दाब्धौ [३] कुलपथि भजन्तीह रसिकाः ॥ १८ ॥

(मन्त्र गुण सम्पन्न) रसिक लोग, कुलपथ में, अत्यन्त गम्भीर समुद्र में और जहाँ ६४ योगिनियों का क्षेत्र है वहाँ त्रिगुण (सत्त्व, रज और तम) को उत्पन्न करने वाली, महामन्त्र स्वरूपा, त्रिभुवन को करुण दृष्टि से देखने वाली, ध्यान मात्र से कल्याण करने वाली, ज्ञान देने में महाविद्या स्वरूपा, आद्या, मन्त्रमयी तथा समस्त रसों से आच्छन्न शरीर वाली उस देवी को प्राप्त कर उसका भजन करते हैं ॥ १८ ॥

समस्तं शून्यार्थं रजतघटनारायणमयं
विसर्गं बिन्दुस्थं रविशशिकला वह्निकिरणम् ।
जगद् व्यापाराङ्गं[४] भवविरहितं भावजडितं
विकाराधाराहं[५] दशदलबिले स्थापयति धीः ॥ १९ ॥

समस्त विकारों की आधारभूत अहंभूता बुद्धि, जिस दशकमल में समस्त अर्थ शून्य है, जो रजतघट के समान चमकीला है एवं नारायण मय है, बिन्दु में रहने वाला विसर्ग है, जो सूर्य कला व चन्द्र कला वाला तथा अग्नि के समान देदीप्यमान है, जो सारे जगत् के व्यापार का अङ्ग है, किन्तु स्वयं भवविरहित है और भाव से जड़ा हुआ है, ऐसी स्थिति स्थापित करती है ॥ १९ ॥

सुरासुरभयप्रदं तरुणरूपशोभाकरं
मनोहरकलेवरं सकलदेहसंज्ञापनम्[६] ।
भजन्ति मुनयो नृपा [७]यतय इन्द्रदेवादयो
दशच्छदनिकेतने प्रकृतिदेहमध्यस्थितम् ॥ २० ॥

---

१. महामन्त्राकारं भुवनकरजां वेशविषये—ख० ।
२. तनुगा—ख० ।
३. मवाप्यानन्दाब्धौ कुलपथिजम्—ख० ।
४. व्यापारादिम्—ख० ।
५. विकाराधारार्हं दशदलयुतं स्थापयति धीः—ख० ।
६. संज्ञापकम्—ख० ।—सकलदेहान् संज्ञापयति इति भावः ।
७. प्रतिदिनं तथेन्द्रादयः—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जो दशपत्र (कमल के) निकेतन (मणिपूर चक्र) में प्रकृति के देह के मध्य में स्थित हैं, देवताओं एवं असुरों दोनों को भयभीत करने वाले हैं, तारुण्य की शोभा के आकर होने से मनोहर शरीर वाले हैं तथा समस्त देहधारियों को प्रेरणा प्रदान करते हैं, ऐसे सदाशिव का मुनिगण, राजा लोग, सन्यासी जन एवं इन्द्रादि देवता भजन करते हैं ॥ २० ॥

प्रचण्डवचनाश्रयं[१] ध्वनिकलापसम्मर्दनं
महोत्कटतपःप्रियं [२]भजति चाशुतोषं शिवम् ।
निधाय हृदि पङ्कजे किमपि नाभिमूलेऽपि वा
विभावगुणभावनं परिकरोति योगी महान् ॥ २१ ॥
स्वकीयगुणसत्त्वके कठिनचित्तसंज्ञार्पणं[३]
चतुर्भुजकलेवरे दशकलाधरेन्दीवरे ।
मनोहरहरं[४] परमसारमाद्याक्षरं
प्रकृत्य[५] परमेश्वरे प्रणवरूपमारोपये ॥ २२ ॥

महान् योगीजन अपने हृदय कमल में अथवा कोई कोई नाभिमूल में जिन्हें स्थापित कर जिनके विभाव (क्रिया) और गुणों की भावना करते हैं और भक्त लोग, प्रचण्ड वचनों के आश्रय, ध्वनि कलाप को सम्मर्दन करने वाले एवं अत्यन्त उत्कट तप के प्रेमी आशुतोष शिव का भजन करते हैं तथा मैं अपने गुण से सत्त्वस्वरूप वाले, चतुर्भुज शरीर वाले, दश कला धारण करने वाले कमल में उन परमेश्वर का उद्देश्य कर कठिन चित्त को चेतना प्रदान करने वाले, मनोहर हरस्वरूप, परमसार तथा आद्यक्षर प्रणव के रूप का आरोप करता हूँ ॥ २१-२२ ॥

विविक्तमतिनिर्मलं [६]कमलहासमाल्याश्रयं
शिवं [७]शतकभास्करं सकलदेहमध्येऽपि वा ।
भुजायुतधरं धराधरधरं हि मुद्राधरं
भजन्ति कुलकामिनीपतय ईशवेश्मास्पदा[८] ॥ २३ ॥

कुल कामिनी पति (शक्ति मार्ग पर अधिकार रखने वाले) विविक्त (एकान्त) में निवास करने वाले, (शुद्ध बुद्ध होने से) अत्यन्त निर्मल, कमल के समान मन्दस्मित, माला धारण करने वाले, सैकड़ों सूर्य के समान भासमान, सभी प्राणियों के शरीर में रहने वाले,

---

१. चरणाश्रयं धवलि—ख० । २. भवति—ख० ।
३. संज्ञापनम्—ख० ।
४. मनोहरपरं हरं परमसारमाद्याक्षरम्—ख० ।
५. प्रकृष्ट ..... आरोपयेत्—ख० ।
६. हार—ख० ।
७. सकल .... पद्ममध्ये—ख० ।
८. 'ईश वेश्याम्पदा' इति मुद्रितपाठः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अयुत भुजाओं वाले, पर्वतों को धारण करने वाले तथा मुद्राओं को धारण करने वाले भगवान् सदाशिव के लोक में स्थान चाहने वाले साधक सदाशिव का भजन करते हैं ॥ २३ ॥

सदा चरणपङ्कजे [१]विवहानिमुद्राप्तये
कृपामयसलक्षणं[२] गतिगसत्वसम्भावनम् ।
सदैकगुणभावनं परमदेवदेवस्य या[३]
त्रिलोकजननीपते रमणमेव कुर्याद्वशी ॥ २४ ॥

जितेन्द्रिय साधक को त्रिलोकजननी के पति, परमदेवाधिदेव के चरण कमल में (विफलहानिमुद्रा) सफलता की प्राप्ति के लिए सदैव रमण करना चाहिए, जिसमें उनकी कृपा के लक्षण हैं। जो गति देने वाले हैं, सत्त्वगुण से संयुक्त हैं तथा सर्वदा प्रधान गुणों से अनुप्रणित हैं ॥ २४ ॥

एवं [४]कृत्वा निरालम्बविश्वासध्यानवान्नरः।
अकस्मान्मन्त्रचैतन्यं[५] प्राप्नोत्यर्थविनिर्णयम् ॥ २५ ॥

॥ इति[६] श्रीरुद्रयामले उत्तरतन्त्रे मन्त्रार्थ चैतन्यविन्यासो नाम
द्विपञ्चाशत्तमः पटलः ॥ ५२ ॥

— ❖ —

इस प्रकार असहाय होकर विश्वास के साथ मणिपूर चक्र में ध्यान करने वाला साधक भक्त, अकस्मात् मन्त्र चैतन्य तथा मन्त्र के अर्थ की संप्राप्ति कर लेता है ॥ २५ ॥

॥ श्रीरुद्रयामल के उत्तरतन्त्र में मन्त्रार्थ चैतन्य विन्यास नामक बावनवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ५२ ॥

— ❖ —

---

१. विफलहानि—ख० ।
२. सुलक्षणम् .... मतिग—ख० ।—कृपामयं सलक्षणं यस्य तत् । प्राचुर्ये मयट् । तत्प्रकृतवचने मयडिति सूत्रेण तस्य विधानम् ।
३. वै—ख० ।
४. जप्त्वा सदा मन्त्रं विश्वमध्ये परः शुचिः—ख० ।
५. मन्त्रस्य चैतन्यम्, चेतनत्वम् । मन्त्रा हि मननात् चेतनत्वं प्रकटयन्ति ।
६. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रभेदप्रकाशे भैरवीभैरवसंवादे मन्त्रार्थचैतन्यविन्यासो नाम त्रिपञ्चाशत्तमः पटलः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ त्रिपञ्चाशत्तमः पटलः

श्रीआनन्दभैरवी[१] उवाच

आनन्दसागराम्भोजमध्यस्थ परमप्रिय ।
इदानीं कालजालादिवारणं शृणु भैरव ॥ १ ॥

आनन्दभैरवी ने कहा—हे आनन्द सागर के मध्य में विकसित कमल में निवास करने वाले ! हे परमप्रिय प्रभो! हे भैरव ! अब जिससे कालजालादि का वारण हो जाता है उसे आप सुनिए ॥ १ ॥

सम्पूर्य सञ्चयाच्छन्नं वायुं स्वाभाविकीगतिम्[२]
कुम्भयित्वा स्वभावेन चिरकालं सुखी भवेत् ॥ २ ॥
शनैः शनैः रेचयित्वा सर्वदा तद्गतो भवेत् ।
कालजालवशो[३] याति तत्क्षणान्नात्र संशयः ॥ ३ ॥

सञ्चय किए गए आच्छन्न वायु की स्वाभाविक गति को स्वभावानुसार चिरकाल पर्यन्त रोककर कुम्भक प्राणायाम करने से साधक सुखी हो जाता है । फिर उसे धीरे धीरे निकालते हुए रेचन प्राणायाम कर उसी में समाहित हो जावे, तो काल जाल तत्क्षण उसके वश में हो जाता है, इसमें संशय नहीं ॥ २-३ ॥

विना [४]वाय्वाकुञ्चनेन न सिध्यति च को जनः।
वायुचालनमात्रेण सूक्ष्ममार्गोद्गमेन च ॥ ४ ॥
सिध्यत्येव महायोगी कालजालवशोऽपि[५] च ।
कालवशं न करोति मोहादतिसुखायते[६] ॥ ५ ॥
कालभक्षो भवेत् सोऽपि म्रियते नात्र संशयः ।
मणिपुरे मनो दत्त्वा साधयेद् देवताः[७] सदा ॥ ६ ॥

---

१. आनन्दभैरवी उवाच—ख० । २. पतिम्—ख० ।
३. कालजोलवसं—ख० ।
४. कुम्भकयोगेन को हि सिध्यति भूतले—ख० ।—'विना वाय्याकुञ्चेन न सिध्यति च को जनः' इति मूलपाठे वायोराकुञ्चनं निरोधः संकोच इति यावत् । एवं च कुम्भकयोग एव पर्यवसानं भवति ।
५. भवेदिति—ख० । ६. सुखोदयात्—ख० ।
७. देवताम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वायु के आकुञ्चन के बिना कोई भी साधक सिद्धि नहीं प्राप्त करता । किं बहुना सूक्ष्ममार्ग से वायु को ऊपर उठाकर उसके सञ्चालन से भी सिद्धि प्राप्त होती है । ऐसा करने से महायोगी सिद्ध तो हो ही जाता है, काल जाल भी उसके वश में हो जाता है । किन्तु जो काल जाल को वश में करने का उपाय नहीं करता और मोह में फँस कर ही जो अपने को सुखी मानता है वह अवश्य ही कालकवलित हो जाता है तथा मृत्यु प्राप्त करता है इसमें संशय नहीं । अतः मणिपूर चक्र में अपना मन समाहित कर सदैव देवता की सिद्धि करनी चाहिए ॥ ४-६ ॥

स्तोत्रं ध्यानं नाम गुणं पठित्वा च पुनः पुनः ।
मनोयोगञ्च सर्वत्र वायुना कारयेद् बुधः ॥ ७ ॥
कुम्भयित्वा [1]धारयित्वा रेचयित्वा पुनः पुनः ।
सर्वकालवशं नीत्वा जितात्मा चामरो भवेत् ॥ ८ ॥

बुद्धिमान् साधक देवता के स्तोत्र, ध्यान, नाम तथा गुणों का बारम्बार पाठ करे और सर्वत्र वायु (संयमन) योगके द्वारा उसीमें अपना मन समाहित करे। वायु को बारम्बार कुम्भक करे, धारण (पूरक) करे और धीरे धीरे उसका रेचन करे (बाहर निकाले) । ऐसा करने से समस्त काल को अपने वश में कर साधक जितेन्द्रिय तथा अमर हो जाता है ॥ ७-८ ॥

लोभमोहौ वर्जयित्वा कामक्रोधादिपातकम् ।
सर्वदा वायुपानञ्च कृत्वा रहसि [2]संवशी ॥ ९ ॥
नित्यं वायुसाधनानि षट्चक्रभेदनाय च ।
शनैः शनैर्धारयेद्वै[3] चिरजीवित्वसाधनात् ॥ १० ॥

अपने इन्द्रियों को सभी प्रकार से वश में करने वाला साधक लोभ, मोह, काम तथा क्रोधादि पातकों का त्याग करे । सर्वदा एकान्त में स्थित रह कर वायु पान करे । इस प्रकार के वायु का साधन षट्चक्र के भेदन के लिए नित्य करना चाहिए । अतः चिरञ्जीवि साधन के लिए साधक धीरे धीरे वायु को धारण करे ॥ ९-१० ॥

यदि न चिरजीवी स्यात् कालात्मा वायुसेवकः ।
षट्चक्रभावसिद्ध्यन्ते ज्ञानी मृत्युवशो भवेत् ॥ ११ ॥
अतः कुर्याच्छिवज्ञानं वायुसंसिद्धकारणम् ।
तत्क्रियासाधनार्थाय [4]आदौ पञ्चामराविधिम् ॥ १२ ॥

यदि इस प्रकार वायु का सेवन करने वाला कालात्मा साधक चिरञ्जीवी नहीं हुआ तो भी उसे षट्चक्र भेदन की सिद्धि हो ही जाती है और वह उसका ज्ञान रखते हुए मृत्यु के वश में हो जाता है । अतः सर्वप्रथम शिव का ज्ञान अवश्य करे, जिसमें वायु की संसिद्धि कारण है । उस वायु की संसिद्धि के लिए पञ्चामरा योग का विधान कहा गया है ॥ ११-१२ ॥

---

१. सदायोगी—ख० ।
२. सद्वशी—ख० ।
३. रेचयेद्वै—ख० ।
४. चादौ—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुर्यात् साधकमुख्यश्च निजकायप्रसाधनात् ।
नेतीयोगं तदा कुर्याद् यथा भवति संवशी ॥ १३ ॥
धौतीयोगं तदा कुर्याद् यथा भवति संवशी[१] ।
नेउलीयोगमाकुर्याद्[२] यत्र लोको न विद्यते ॥ १४ ॥
दन्तीयोगं[३] तदा कुर्याद् यदा मुख्यक्रियावतः ।
तदा क्षणेन यः कुर्याद्[४] यदा तृष्णाविवर्जितः ॥ १५ ॥
तृष्णानाशो[५] भवेन्मोक्ष इति मे योगनिर्णयः ।
विशेषेण प्रवक्ष्येऽहं शृणु कैलासपावन ॥ १६ ॥

१. मुख्य साधक कायसिद्धि से पूर्व 'नेतीयोग' अवश्य करे जिससे इन्द्रियाँ वश मे हो जावें । २. साधक इन्द्रियों को वश में करने के लिए 'धौती योग' भी करे । ३. फिर जहाँ कोई भी न हो ऐसे एकान्त स्थल में 'नेउली योग' करे । ४. इस प्रकार मुख्य क्रिया करने के बाद 'दन्ती योग' भी करे । साधक जब तृष्णा से रहित हो जावे तभी इन क्रियाओं को करे । क्योंकि हठयोग का ऐसा निर्णय है कि 'तृष्णा के नाश होने पर ही मोक्ष होता है ।' हे कैलास पावन ! अब उन-उन क्रियाओं को विशेष रूप से कहती हूँ । आप उनका श्रवण कीजिए ॥ १३-१६ ॥

एतत्कार्यं पुरा कृत्वा[६] दिवि देवा मुनीश्वराः ।
कायसिद्धिं मुदा कृत्वा छायामायाविवर्जिताः ॥ १७ ॥
सर्वत्र गामिनः सर्वे धर्मशास्त्रार्थपण्डिताः ।
चिरजीविन एवापि [७]सकलश्रीसमन्विताः ॥ १८ ॥

पूर्व काल में देवताओं और मुनियों ने इस कार्य का सम्पादन कर स्वर्ग प्राप्त किया । प्रसन्नतापूर्वक इससे काय (शरीर) सिद्धि प्राप्त कर वे छाया तथा माया दोनों से रहित हो गए । वे सभी सर्वत्र अप्रतिहत गति वाले बन गए तथा धर्मशास्त्रार्थ के पण्डित हो गए और सब प्रकार की श्री से समन्वित हो आज भी चिरञ्जीवी बने हुए है ॥ १७-१८ ॥

तत्तद्भेदान् प्रवक्ष्यामि साधनं[८] कायरक्षणम् ।
यः करोति महादेव कायसाधनमुत्तमम् ॥ १९ ॥
स आयाति ममानन्दसदने नात्र संशयः ।

---

१. संयमी—ख० । २. सदा कुर्यात्—ख० ।
३. दण्डी सदा मुख्यक्रियारतः—ख० । ४. यः कुर्याद् यथा—ख० ।
५. नाशे—ख० ।—अयं पाठो युक्ततरः प्रतिभाति, यतो हि यस्य च भावेन भावलक्षणमिति सूत्रविहितसप्तम्याज्ञापकत्वमर्थः । अतश्च तृष्णानाशज्ञाप्यो मोक्ष इत्यर्थः सम्पन्नः ।
६. पुरस्कृत्वा—ख० । ७. कमलाश्री—ख० ।
८. साधनान् कायरक्षणान्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हे महादेव ! अब उस काय साधन के भेदों को कहती हूँ । प्रथम काय साधन है, उसके बाद उसका संरक्षण । हे महादेव ! जो उत्तम (श्रेष्ठ) कायसाधन की क्रिया करता है, वह मेरे आनन्दमय लोक को प्राप्त करता है, इसमें संशय नहीं है ॥ १९-२० ॥

प्रभाते च समुत्थाय ब्राह्मे कालफलोदये ॥ २० ॥
सहस्रारे गुरोः पादपङ्कजध्यानमाचरेत् ।
विचिन्तयेत्ततः श्रीमान् गुरुरूपां सरस्वतीम् ॥ २१ ॥

प्रभात काल में जो कर्म फल के उदय का काल है साधक उस समय अपनी निद्रा त्याग कर उठ जावे । तदनन्तर सहस्रार चक्र में गुरु के चरण कमलों का ध्यान करे । तदनन्तर गुरु के रूप में सरस्वती का ध्यान करे ॥ २०-२१ ॥

स्वदेवतां परानन्दरसिको योगबुद्धिमान् ।
प्रणम्य शिरसा नित्यं शौचकार्य[१] समाचरेत् ॥ २२ ॥
शौचक्रियाक्रमेणैव सिद्धः शुचिगुणान्वितः ।
प्रगच्छेच्छौचकार्यार्थं घटमानं तु[२] यत्नतः ॥ २३ ॥

फिर योग में बुद्धिमान् परानन्द का रसिक साधक अपने इष्टदेवता को शिर से नित्य प्रणाम कर शौचकार्य करे । शौचक्रिया के क्रम से ही साधक शुचिता के गुण से सम्पन्न होकर सिद्धि प्राप्त करता है । फिर यत्नपूर्वक शौचकार्य की चेष्टा के उपयुक्त सारी सामग्री एकत्रित कर तब शौचकार्य प्रारम्भ करे ॥ २२-२३ ॥

मृत्तिकाप्रस्थमानञ्च नीत्वा शौचं समाचरेत् ।
कुल्कुलं[३] सप्तदशकं वर्चत्यागं पुनः पुनः ॥ २४ ॥
ततस्तर्जन्या [४]चालोड्य वामहस्तस्य शङ्कर ।
गुदरन्ध्रे समायोज्य क्षालनं हि पुनः पुनः ॥ २५ ॥

एक प्रस्थ प्रमाण की मृत्तिका ले कर शौच कार्य इस प्रकार करे । १७ बार कुल्ला (?) कर बारम्बार मलत्याग करे । फिर हे शङ्कर ! बाये हाथ की तर्जनी अंगुली को गुदा के छिद्र में डालकर बारम्बार उसका छालन करे ॥ २४-२५ ॥

यावच्च[५] विससंत्यागं[६] निःशेषेण मलक्षयम् ।
तावन्मृत्पयसा क्षाल्य शोधयेदुदरं सुधीः ॥ २६ ॥
यावन्न जायते सौख्यं तावत्कालं समाचरेत् ।

---

१. शौचं कार्यं समाचरेत्—ख० ।
२. घटमानं जलं नयेत्—ख० ।—घटते यत्तद् घटमानं जलम्, शौचक्रियोपयोगि जलमिति भावः ।
३. कुन्थनं—ख० ।
४. अल्पतैलैः—ख० ।
५. कालं भवेत् वै तु—ख० ।
६. यावत्कालं भवेद् वै तु—इति जीव० पाठः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततः उत्थाय विधिना मृत्तिकाशौचमाचरेत् ॥ २७ ॥
येन क्रमेण विष्ठाया गन्धनाशोऽपि जायते ।
पादद्वयं समाक्षाल्य चान्तःशौचं [१] समाश्रयेत् ॥ २८ ॥

जब तक विस (कमलतन्तु Prostrat gland) से संत्यागपूर्वक समस्त मल विनष्ट न हो जाय तब तक मिट्टी और जल से सुधी साधक उदर का क्षालन करता रहे । जब तक प्रसन्नता न हो तब तक इस क्रिया को करते रहना चाहिए । इसके अनन्तर उठ कर विधिपूर्वक मृत्तिका से शौच क्रिया करे । जब तक हाथ में लगे हुए विष्ठा का दुर्गन्ध दूर न हो तब तक मृत्तिका से हाथ को शुद्ध करना चाहिए । इसके बाद दोनों पैर धो कर अन्त में शौच (भीतरी पवित्रता) इस प्रकार करनी चाहिए ॥ २६-२८ ॥

तत्क्रियासफलं[२] वक्ष्ये शृणु योगेश्वर प्रभो ।
सूक्ष्मवस्त्रसमुद्भूतं डोरकं सूक्ष्मरन्ध्रके [३] ॥ २९ ॥
नासिकाया [४] दृढतरं कोमलं चातिनिर्मलम् ।
शनैः शनैर्नियोज्याथ जिह्वामूले निवेशयेत् ॥ ३० ॥
जिह्वामूलात् सदादाय [५] वारं द्वादशकं सुधीः।
मन्दमन्दाघर्षणं तु कृत्वा भेदं [६] समानयेत् ॥ ३१ ॥

हे प्रभो ! अन्तः शौच की सारी विधि फल के सहित कहती हूँ, हे योगेश्वर ! उसे सुनिए । अत्यन्त पतले वस्त्र का डोरा जो अत्यन्त मजबूत हो तथा बहुत कोमल भी हो, साथ ही साथ स्वच्छ भी हो उसे अपनी नासिका के सूक्ष्म बिल में डालकर धीरे धीरे जिह्वा के मूल तक डाले । फिर जब वह डोरा जिह्वामूल तक पहुँच जाय तो उसे लेकर सुधी साधक १२ बार धीरे-धीरे घर्षण करे और ऐसा करते हुए उसमें रहने वाले समस्त भेद बाहर निकाल देवे ॥ २९-३१ ॥

मायात्रयेण बीजेन देवीबीजत्रयेण च ।
रमाबीजत्रयेणापि योगिन्यै नम इत्यपि ॥ ३२ ॥
एतन्मन्त्रेण योगीन्द्रो नेतीयोगं समाचरेत् ।
शिरःस्थाङ्गं[७] समाकृत्य कण्ठशोधनमाचरेत् ॥ ३३ ॥

इसके बाद तीन माया बीज (ह्रीं ह्रीं ह्रीं) तीन देवी बीज (क्ली क्लीं क्लीं) तीन श्री बीज (श्रीं श्रीं श्रीं), इसके बाद 'योगिन्यै नमः' इस मन्त्र को पढ़ते हुए योगीन्द्र साधक नेती योग प्रारम्भ करे । प्रथम शिर में रहने वाले अङ्ग को ठीक तरह से सीधा रखकर साधक कण्ठ का शोधन करे ॥ ३२-३३ ॥

---

१. समाचरेत्—ख० ।
२. सकलम्—ख० ।
३. वस्त्रके—ख० ।
४. नासिकायाम्—ख० ।
५. समादाय—ख० ।
६. समाचरेत्—ख० ।
७. शिरः शुद्धि ..... करशोधन ..... ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततो वक्षःशोधनं तु ततो नाभेश्च शोधनम् ।
क्रमेण कुर्यात् कायार्थे[१] तत्प्रकारं शृणु प्रभो ॥ ३४ ॥

इसके बाद वक्षःस्थल का फिर नाभी का शोधन करे । काय की शुद्धि के लिए यह क्रिया क्रमशः करे । हे प्रभो ! अब उसका प्रकार कहती हूँ, श्रवण कीजिए ॥ ३४ ॥

धौतीक्रियां समाकुर्यात् तप्तोदकनिसेवनम् ।
शुक्लवस्त्रं सूक्ष्मसूत्रं [२]चाष्टाङ्गुलप्रमाणकम् ॥ ३५ ॥
द्वात्रिंशद्धस्तमानं तु [३] पूर्णसंख्या उदीरिता ।
मन्त्री प्रथमतः कुर्यात् चतुरङ्गुलवस्त्रकम् ॥ ३६ ॥
दीर्घे पञ्चहस्तमानं तप्तोदकसमन्वितम् ।
भक्षयेत् शेषजिह्वाग्रे संस्थाप्य वसनं सुखम् ॥ ३७ ॥

धौती क्रिया में गर्म जल का प्रयोग करना चाहिए । अत्यन्त पतला एवं स्वच्छ वस्त्र आठ अंगुल मान वाला (चौड़ा) तथा ३२ हाथ का लम्बा धौती का पूर्ण प्रमाण कहा गया है । मन्त्रज्ञ साधक प्रथम ४ अंगुल चौड़ा तथा ५ हाथ लम्बा सूक्ष्म एवं स्वच्छ वस्त्र गर्म जल में डुबोकर जिह्वा के अग्रभाग में स्थापित करे और सुखपूर्वक उस वस्त्र को धीरे धीरे भक्षण करे ॥ ३५-३७ ॥

तर्जनीमध्यमाङ्गुष्ठमुद्राभिर्भक्षयेत् सुधीः ।
क्रमेण वर्धयेन्नित्यं दीर्घे च प्रसवे तथा ॥ ३८ ॥

विद्वान् साधक को वस्त्र में तर्जनी एवं मध्यमा तथा अंगूठे की एकत्र मुद्रा लगाकर भक्षण क्रिया शनैः शनैः करनी चाहिए और क्रमशः वह भक्षण क्रिया नित्य बढ़ाते रहना चाहिए । उस वस्त्र को निकालने में भी देरी से (धीरे-धीरे) निकाले ॥ ३८ ॥

एतन्मन्त्रेण [४] देवेश पूर्वोक्तमनुना तथा ।
सर्वत्र पूर्वबीजेन [५] संशोध्य बीजमुच्चरेत् ॥ ३९ ॥

हे देवेश ! अधोलिखित मन्त्र तथा पूर्वोक्त मन्त्र (द्र० ५३. ३२) द्वारा भक्षण क्रिया करे । सर्वत्र पूर्व बीज (द्र० ५३. ३२) से वस्त्र का संशोधन कर फिर इस प्रकार बीज मन्त्र का उच्चारण करे ॥ ३९ ॥

शक्तिबीजत्रयं पश्चात् कामबीजत्रयं तथा ।
लक्ष्मीबीजत्रयं पश्चान्महाधौतनिवासिनी ॥ ४० ॥

---

१. 'कार्यार्थे—ख० ।—नेतीयोगो नासिकारन्ध्रेण वस्त्रादिक्रियया कण्ठस्य वक्षसः नाभेश्च मलशोधनं भवति । मलच्छत्रानि इमानि स्थानानि यदि स्युस्तदा योगक्रियायां बाधा भवति ।

२. चाष्टाङ्गुलि—ख० ।

३. तन्तुमानन्तु—ख० ।

४. एतन्मन्त्रेणेति श्लोकार्धः ख० नास्ति ।

५. मन्त्रेण—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मेवाडीमलमन्त्रे[१] तु क्षालयद्वयमेव च ।
भार्या वहेत्ततः पश्चादुदरे सन्निवेशयेत्[२] ॥ ४१ ॥

तीन शक्ति बीज (ह्रीं ह्रीं ह्रीं), फिर तीन काम बीज (क्लीं क्लीं क्लीं), इसके बाद तीन बार लक्ष्मी बीज (श्रीं श्रीं श्रीं), इसके बाद 'महाधौतनिवासिनी', फिर 'मेवाड़ीमलमन्त्रे' फिर दो बार क्षालय (क्षालय क्षालय), फिर वह्नि भार्या (स्वाहा) इतना कह कर पेट में उस वस्त्र को धीरे-धीरे सन्निविष्ट करे ॥ ४०-४१ ॥

शनैर्निवेशमाकृत्य यावत् सर्वः[३] प्रजायते ।
एतद्योगप्रसादेन[४] वायवी सुकृपा भवेत् ॥ ४२ ॥

इस प्रकार धीरे धीरे उस वस्त्र को निगलते हुए पेट में ले जावे, यह क्रिया तब तक करें जब तक सारा वस्त्र पेट में न पहुँच जावे । जब यह धौती क्रिया का योग पूर्ण हो जाता है तब वायु की कृपा होती है ॥ ४२ ॥

ततः कुर्यात् साधकेन्द्रो विग्रहक्षेमकारणात् ।
नेउलीपरमं योगं[५] गात्रदृढनिबन्धनम् ॥ ४३ ॥
घूर्णायमानमाकुर्यादुदरं[६] परमेश्वर ।
सर्वदा चालनं कुर्यात् प्राणवायुप्रधारणम् ॥ ४४ ॥
वामे घूर्णितमाकृत्य दक्षिणे घूर्णितं चरेत् ।
एवं क्रमेण देवेश[७] पुटपाकं समाचरेत् ॥ ४५ ॥

इसके बाद साधकेन्द्र शरीर के क्षेम के लिए नेउली नाम वाला परम योग करे । जिससे शरीर में दृढ़ता निबद्ध होती है । हे परमेश्वर ! इस नेउली क्रिया में पेट को घुमाते रहना चाहिए और सर्वदा वायु का सञ्चालन करते रहना चाहिए जिससे पेट वायु धारण करने में समर्थ हो जावे । पेट को बायीं ओर से घुमाना प्रारम्भ कर दाहिनी ओर घुमाना चाहिए । हे देवेश ! इसी क्रम से दाहिनी ओर से बायीं ओर भी पेट को घुमाना चाहिए । जिससे पेट वायु धारण के लिए परिपक्व हो जावे ॥ ४३-४५ ॥

एतन्मन्त्रेण देवेश[८] शुभासने हठो भवेत् ।
ब्रह्मबीजत्रयं पश्चात् कालीबीजत्रयं ततः ॥ ४६ ॥
देवीप्रणवयुग्मं तु गात्रस्थायै नमो द्विठः ।
तदन्ते नाडिकादीनां क्षालनं परमाद्भुतम् ॥ ४७ ॥

---

१. मलमन्त्रे—ख० । २. बम्धे—ख० ।
३. सर्व—ख० । ४. एतदिति श्लोकार्ध ख० पुस्तके नास्ति ।
५. गात्रस्य दृढबन्धनम्—ख ।—गात्रस्य शरीरस्य तदङ्गस्य च दृढं बन्धनमिति यावत् ।
६. मान मा—ख० । ७. सदाचरेत्—ख०, पेटपाक—क० ।
८. शुभासन—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हे देवेश ! इस मन्त्र से शुभासन पर दृढ़ता आती है, तीन बार ब्रह्मबीज (ॐ ॐ ॐ) इसके बाद तीन बार काली बीज (क्रीं क्रीं क्रीं), इसके बाद देवी प्रणव (ह्रीं ह्रीं ह्रीं), फिर 'गात्रस्थायै स्वाहा' ऐसा करने से नाड़ियों का क्षालन हो जाता है । यह अपने में एक परमाश्चर्य है ॥ ४६-४७ ॥

वक्षःस्थानं[१] महादेव दन्तीयोगेन कारयेत् ।
गजमानं दन्तकाष्ठं निर्मलं सुन्दरं मतम्[२] ॥ ४८ ॥

हे महादेव ! इसके बाद दन्तीयोग के द्वारा वक्षः स्थान की शुद्धि करनी चाहिए । इसके लिए गज मान (८ हाथ) का निर्मल दन्तकाष्ठ सुन्दर कहा गया है ॥ ४८ ॥

दन्तकाष्ठं [३]क्षालयेद्वै मनुना साधकाग्रणीः ।
मायाबीजत्रयं[४] पश्चाद् भैरवीबीजकत्रयम् ॥ ४९ ॥
मर्दिनीबीजयुगलं दन्तकाष्ठनिवासिनी ।
मे हृद्ग्रन्थिं छेदय इति युगलं वह्निसुन्दरी ॥ ५० ॥

श्रेष्ठ साधक उस दन्त काष्ठ का इस मन्त्र से क्षालन करे । तीन मायाबीज (ह्रीं ह्रीं ह्रीं) इसके बाद तीन भैरवी बीज (?) इसके बाद मर्दिनी (दुर्गा) बीज दो बार (दुँ) फिर 'दन्तकाष्ठनिवासिनी मे हृद्ग्रन्थि छेदय छेदय' फिर वह्नि सुन्दरी (स्वाहा) यह मन्त्र है ॥ ४९-५० ॥

विमर्श—मन्त्र का स्वरूप इस प्रकार है—ह्रीं ह्रीं ह्रीं .. .. .. दुँ दुँ दन्तकाष्ठ-निवासिनी मे हृद्ग्रन्थिं छेदय छेदय स्वाहा ॥ ४९-५० ॥

क्रमेण विधिनानेन गलरन्ध्रे निवेशयेत् ।
यावन्नाभेरधो याति यावत्[५]सुखमयानि च ॥ ५१ ॥
तावद्दन्तीयोगकार्यं प्रभाते सर्वकार्यकम् ।
एतदन्ते ततः कुर्यान्नाडीक्षालनमेव च[६] ॥ ५२ ॥

इतना मन्त्र पढ़कर उस कोमल दन्तकाष्ठ को गले के बिल में डाले यह क्रिया तब तक करे जब तक वह नाभि के नीचे न चला जाय, जब तक दोष की शान्ति नहीं होती और प्रसन्नता नहीं होती तब तक दन्ती योग करते रहना चाहिए । यह क्रिया प्रातःकाल में करना उचित है इतना कर लेने के बाद नाडी क्षालन करना चाहिए ॥ ५१-५२ ॥

तन्मन्त्रं शृणु वीरेन्द्र चामरत्वप्रदायकम् ।
आदौ प्रणवमुद्धृत्य दीर्घप्रणवयुग्मकम् ॥ ५३ ॥

---

१. स्थाने महाकाल—ख० । २. नतम्—क० ।
३. कारयेत्—ख० । ४. श्यामाबीजत्रयं—ख० ।
५. सुखमयो न च ख० ।
६. दन्तीयोगक्रियां कृत्वा नाडीचालनं कर्तव्यम्, तेन नाडीशोधनं भवति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भुवनेशीबीजयुग्मं चन्द्रबीजत्रयं ततः ।
कृष्णबीजत्रयं पश्चादर्कबीजत्रयं ततः ॥ ५४ ॥
वाग्भवत्रयमुद्धृत्य[१] वह्निबीजत्रयं ततः ।
श्रीबीजं मन्मथं लक्ष्मीं शीतले तदनन्तरम् ॥ ५५ ॥
स्वोदरं[२] नाडिकामूलं मलक्षालययुग्मकम् ।
स्वाहान्तमनुना नित्यं क्षालयेन्नाडिकाधमाः ॥ ५६ ॥

हे वीरेश्वर ! अमरत्व प्रदान करने वाले नाड़ी क्षालन के मन्त्र को सुनिए । सर्वप्रथम प्रणव (ॐ), फिर दो बार दीर्घ प्रणव (औम् औम् ?) फिर भुवनेश्वरी बीज (ह्रीं ह्रीं) दो बार फिर चन्द्रबीज तीन बार (?), इसके बाद तीन बार कृष्णबीज (क्लीं क्लीं क्लीं), फिर तीन बार सूर्य बीज (?), इसके बाद तीन बार वाग्भव बीज (ऐं), फिर तीन बार अग्निबीज (रम्), इसके बाद श्रीबीज (श्रीं), फिर 'मन्मथं लक्ष्मीं शीतले', फिर 'स्वोदरं नाडिका मूलं' फिर 'मलक्षालय' को दो बार, इसके बाद 'स्वाहा' इस मन्त्र से नीचे की समस्त नाडियों का क्षालन करे ॥ ५३-५६ ॥

यावत्तृष्णानाशकः स्यात्तावत्कालं समाचरेत् ।
यावदुद्गमशक्तित्वं[३] त्रिदण्डावधि धारणा ॥ ५७ ॥
तावन्न जायते नाथ क्षालनं सुखसाधनम् ।
यदि भाग्यवशादेव त्रिदण्डवायुकुम्भकम् ॥ ५८ ॥
स्वयमेव समायाति नाडिकाक्षालनं शुभम् ।
यावत्सूक्ष्मानिलालापं[४] मधुपानं निरन्तरम् ॥ ५९ ॥

जब तक इस क्रिया से प्यास अथवा वैषयिक तृष्णा का विनाश न हो तब तक नाडी क्षालन की क्रिया करते रहना चाहिए । हे नाथ ! जब तक शरीर के ऊपर उठने की शक्ति न हो और तीन दण्ड पर्यन्त धारणा शक्ति न हो तब तक नाडियों के प्रक्षालन से सुख प्राप्ति नहीं होती । यदि भाग्यवश तीन दण्ड पर्यन्त वायु का कुम्भक स्वयं हो जाता है तो समझ लेना चाहिए कि नाडीं का प्रक्षालन सिद्ध हो गया । जब तक सूक्ष्म वायु का शब्द होता रहे तब तक निरन्तर मधु (दूध या शहद) का पान करते रहना चाहिए ॥ ५७-५९ ॥

पादाम्भोजनिःसृतं तु परमानन्दवर्धनम् ।
तत्सुखेनापरिच्छिन्नं[५] संज्ञाननिर्मलेन च ॥ ६० ॥
चिदानन्दस्वरूपेण[६] आनन्दाश्रुविमोचनम् ।
तदा हि[७] हृदयग्रन्थिभेदनं देहवर्धनम् ॥ ६१ ॥

---

१. वाग्भवेति श्लोकार्ध—ख० पुस्तके नास्ति । २. शोधयन् नाडिकामूलं—ख० ।
३. उद्गमशक्तिर्न—ख० । ४. मलालापं—ख० ।
५. सज्ञान—ख० । ६. स्वानन्दाश्रुविलोचनम्—ख० ।
७. हृदये ग्रन्थिछेदनं—ख० ।—हृदयस्य ग्रन्थानां भेदनम्, हृदये या ग्रन्थयस्तासां भेदनम्। अयमेव भेदो द्वयोः पाठयोः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भगवान् के चरण कमल से निःसृत गङ्गा जल का पान तो अत्यन्त आनन्द बढ़ाने वाला है । उस चिदानन्दस्वरूप, निर्मल ज्ञान से इतने आनन्द की वृद्धि होती है कि आनन्दातिरेक से अश्रु निकलने लगते हैं, जिसका सुख अपरिच्छेद्य (न अमाने वाला) है । जब ऐसा आनन्द होने लगे तो समझना चाहिए कि शरीर की वृद्धि करने वाली हृदय ग्रन्थि का भेदन हो गया ॥ ६०-६१ ॥

तदा हि पुलकं स्थैर्यं देहावेशस्थिरं तथा ।
तदा षट्कञ्ज[1] सिद्धान्तज्ञानं चैतन्यनिर्मलम् ॥ ६२ ॥
चिदानन्दमयो भूत्वा [2]तृष्णाज्ञानविवर्जितः ।
जीवन्मुक्तः परानन्दरसिकः [3]प्रणयप्रियः ॥ ६३ ॥

हृदयग्रन्थि भेदन हो जाने पर शरीर में रोमाञ्च हो जाता है, मन स्थिर हो जाता है, किं बहुना देह में किसी प्रकार का आवेश (कम्पनादि) नहीं होता, उस समय चेतना को निर्मल बनाने वाले षट्चक्र कमल के सिद्धान्त का ज्ञान अपने आप उत्पन्न हो जाता है । ऐसा साधक चिदानन्दमय होकर तृष्णा तथा अज्ञान से रहित हो जाता है और जीवन्मुक्त परमानन्दरसिक तथा सबके प्रेम का पात्र हो जाता है ॥ ६२-६३ ॥

स्थिरचेता महायोगी भवत्येव न संशयः ।
आस्तिको[4] देवभक्तश्च निन्दावादविवर्जितः ॥ ६४ ॥
स एवात्मा महाज्ञानी भवत्येव न संशयः ।
पञ्चयोगं समाकृत्य नित्यादिकमनुत्तमम् ॥ ६५ ॥

यही सर्वश्रेष्ठ पञ्चयोग है । इन क्रियाओं को सिद्ध करने वाला साधक स्थिरचित्त, महायोगी, आस्तिक, देवभक्त, किसी की निन्दा न करने वाला, आत्मज्ञ और महाज्ञानी हो जाता है, इसमें संशय नहीं ॥ ६४-६५ ॥

स्नानं कुर्याद्विधानेन तीर्थराजनिकेतने ।
इडा गङ्गाजले वापि पिङ्गला यमुनाजले ॥ ६६ ॥
सुषुम्नायां सरस्वत्यां [5]वसुपुष्करकोटिषु ।
तथापि बाह्यस्नाने तु सर्वाङ्गमस्तकं विना ॥ ६७ ॥
सप्तवारं समासिञ्चेत्[6] मस्तकं बाह्यवारिणा ।
मार्जनेनापि मनुना मूलमन्त्रेण वा पुनः ॥ ६८ ॥

साधक को चाहिए कि वह तीर्थराज प्रयाग में विधिपूर्वक स्नान करे । अथवा इडारूप गङ्गाजल में, पिङ्गलारूप यमुना जल में, सरस्वती रूप सुषुम्ना में, जो करोड़ों पुष्कर के समान है उस अभ्यन्तर तीर्थ में स्नान करे । यदि वाह्य तीर्थराज में स्नान करता है तो सर्वांग मस्तक

---

१. षट्कज—क० ।
२. कृष्णाज्ञान—ख० ।
३. प्रलयप्रियः—क० ।
४. देवदत्तश्च—ख० ।
५. द्युषु—ख० ।
६. समासिञ्च—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सहित स्नान करे । किन्तु उसके बिना आभ्यन्तर स्नान में मार्जन के मन्त्र से अथवा मूलमन्त्र से बाहरी जल द्वारा सात बार मस्तक का आसिञ्चन करना चाहिए ॥ ६६-६८ ॥

ततोऽङ्गं मार्जयित्वा च सन्ध्यावन्दनमाचरेत् ।
बाह्यसन्ध्यां तु [१]मन्त्रेणैवान्तरे प्रकृतीश्वरम् ॥ ६९ ॥
ऊर्ध्वाधस्तैजसं बिन्दुं नादमण्डलसम्पुटम् ।
सन्ध्यावन्दनमाकृत्य [२] महौषधिं [३]प्रभक्षयेत् ॥ ७० ॥

साधक को अङ्गों के मार्जन के पश्चात् सन्ध्यावन्दन का कार्य करना चाहिए । बाह्य सन्ध्या मन्त्र से करे । अन्तर सन्ध्या में ऊपर से लेकर नीचे तक तैजस बिन्दु स्वरूप नादमण्डल से सम्पुटित प्रकृति ईश्वर का ध्यान करना चाहिए । इस प्रकार सन्ध्यावन्दन कर लेने के पश्चात् महौषधि भक्षण करे ॥ ६९-७० ॥

मूलमन्त्रेणाभिमन्त्र्य पञ्चगव्यं कुलेश्वर ।
ततः कुर्यान्महापूजां स्वस्वमन्त्रोक्तसाधिताम् ॥ ७१ ॥

हे कुलेश्वर ! सदाशिव पञ्चगव्य को मूल मन्त्र से अभिमन्त्रित करे (यही महौषधि के भक्षण का विधान है ?) इसके बाद अपने अपने मन्त्र से उक्त प्रकार से साधित महापूजा करनी चाहिए ॥ ७१ ॥

षट्चक्रार्थं ततो ध्यायेद् यदुक्तं विधिना प्रभो ।
कुण्डलिन्या [४] महापूजा सहस्रनाममङ्गलम् ॥ ७२ ॥
देवतानां [५] पठेद्धीमान् सर्वकाले सुसिद्धये ।

हे प्रभो ! इसके बाद विधि पूर्वक जैसा कहा है उसी प्रकार से षट्चक्रों में स्थित देवताओं का ध्यान करना चाहिए । धीमान् साधक को भली प्रकार सिद्धि प्राप्त करने के लिए, मङ्गल देने वाले देवता के सहस्र नाम का पाठ कर मूलाधार में स्थित कुण्डलिनी की महापूजा करनी चाहिए ॥ ७१-७२ ॥

मूलाधारं मुदा भित्वा सूक्ष्मवायुद्वयेन च ॥ ७३ ॥
ततो भेदं स्वाधिष्ठानं राकिणीविष्णुसङ्गमम् ।
तयोरनुक्रमं नाथ सहस्रनाममङ्गलम् ॥ ७४ ॥
अन्यन्तगुह्यकथनं सत्त्वभक्तिप्रकारकम् ।
भित्वा भेदं मुदा कुर्यान्मणिपीठस्थदेवयोः ॥ ७५ ॥

---

१. मन्त्रजालैः—ख० ।
२. सन्ध्यावन्दनमाकृत्येत्यनेन शुचित्वं द्योतितम् ।
३. प्रकर्षेण औषधभक्षणविधानेनेत्यर्थः ।
४. कुण्डल्यादिमहापूजां—ख० ।
५. देवतानामित्यतः मङ्गलं पर्यन्तं श्लोकद्वयं ख० पुस्तके नास्ति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ध्यानं ज्ञानं स्तवं नित्यं यजनं नामकीर्तनम् ।
चैतन्यं रुद्रलाकिन्यास्तथा मृत्युञ्जयस्य च ॥ ७६ ॥
नित्यं गुरुमयं ध्यात्वा सर्वगामिनमीश्वरम्[१] ।
चिरजीवी महायोगी भवत्येव न संशयः ॥ ७७ ॥

॥ इति[२] श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे भैरवभैरवीसंवादे मणिपूरभेदो नाम त्रिपञ्चाशत्तमः पटलः ॥ ५३ ॥

— ❖ —

इसके बाद सूक्ष्म दो वायुओं के द्वारा सरलतापूर्वक मूलाधार का भेदन कर स्वाधिष्ठान चक्र में जहाँ राकिणी एवं विष्णु का सङ्गम है उसका भेदन करे । हे नाथ ! उसका अनुक्रम मङ्गल देने वाला विष्णु तथा राकिणी का सहस्र नाम है । जो सत्त्वभक्ति का प्रकार है उसका कथन अत्यन्त गुह्य है । इस प्रकार उस चक्र का भी भेदन कर मणिपूर में स्थित दोनों देवताओं रुद्र एवं लाकिनी तथा मृत्युञ्जय का ध्यान करे । ज्ञान पूर्वक नित्य उनकी स्तुति करे और उनका यजन करे, नाम कीर्तन करे । ऐसा करने से साधक में (आध्यात्मिक) चेतनता आती है । इस प्रकार गुरु स्वरूप सर्वत्र व्याप्त ईश्वर का नित्य ध्यान करने से साधक चिरञ्जीवी एवं महायोगी हो जाता है इसमें संशय नहीं है ॥ ७३-७७ ॥

॥ श्रीरुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन में सिद्धमन्त्रप्रकरण में भैरवीभैरव संवाद में मणिपूर भेद नामक तिरपनवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ५३ ॥

— ❖ —

---

१. गुरुतत्त्वं व्यापकतया सर्वेश्वरसदृशं भवति इति यावत्, तस्य ध्यानेन सकलेष्ट-सिद्धिर्भवति ।

२. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवी-संवादे मणिपूरणभेदो नाम चतुःपञ्चाशत्तमः पटलः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ चतुःपञ्चाशत्तमः पटलः

आनन्दभैरवी उवाच

परापराविभेदज्ञ निगूढज्ञानसाधनम्[१] ।
इदानीं शृणु सर्वज्ञ पञ्चद्रव्यादिसाधनम् ॥ १ ॥

श्री आनन्दभैरवी ने कहा—हे परा एवं अपरा के भेद को जानने वाले ! हे सर्वज्ञ ! अब पञ्च द्रव्यादि साधन को सुनिए जो अत्यन्त गुप्त ज्ञान का साधन है ॥ १ ॥

पञ्चसिद्धद्रव्यशोधनकथनम्

षट्चक्रपद्मभेदार्थं यत्क्रमाज्जायते क्षणात् ।
अमरश्चामरा[२] चैव सर्वसिद्धिप्रदायिका ॥ २ ॥
ब्रह्मज्ञानसाधनी च ब्रह्मानन्दस्वरूपिणी[३] ।
अमरलता[४] तथा ध्येया दूर्वासंज्ञा प्रतिष्ठिता ॥ ३ ॥

षट्चक्र पद्म के भेदन के लिए जिस क्रम से अमर तथा अमरा समस्त सिद्धियों को देने वाली है, सर्वप्रथम ब्रह्मज्ञान की साधनी ब्रह्मानन्द स्वरूपिणी अमरलता जो दूर्वा नाम से प्रतिष्ठित है, उसका ध्यान करना चाहिए ॥ २-३ ॥

सिद्धामरा च निर्गुण्डी सर्वसिद्धिप्रदायिका[५] ।
नीलामरा ततो ग्राह्या नीलतुलसीसङ्गिता ॥ ४ ॥

सभी प्रकार की सिद्धियों को देने वाली 'निर्गुण्डी' सिद्धामरा कही जाती है । इसके बाद नील (काली) तुलसी के नाम से प्रसिद्ध 'नीलामरा' ग्रहण करनी चाहिए ॥ ४ ॥

अमरुः[६] समयापत्रं चामरा विल्वपत्रिका ।
शिवप्रिया सदा पूज्या [७]पूर्वोक्तावासमाश्रयेत् ॥ ५ ॥

इसके बाद अमरू जो समयापत्र (भाग) अमरा नाम से बिल्वपत्रिका ग्रहण करे । ये दोनों ही शिव को अत्यन्त प्रिय हैं । अतः ये पूज्य हैं जिन्हें हमने पूर्व में कह दिया है उनको ग्रहण करना चाहिए ॥ ५ ॥

---

१. साधन—क० ।
२. "अमरश्चामरश्चैव.....प्रदायकः"—ख० ।
३. ब्रह्मज्ञानप्रकाशिनी—ख० ।
४. अमलता—ख० ।
५. सर्वसिद्धिप्रदायिनी—ख० ।
६. अमरा—ख० ।
७. पूर्वोक्ताम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतद्भक्षणमन्त्राणि शृणु कैलासभूपते ।
ब्राह्मणी[१] क्षत्रिया वैश्या शूद्रा [२]चक्रमतो जया ॥ ६ ॥
तत्तन्मन्त्रेण संशोध्य भक्षयेन्मनुनामुना ।
सर्वासाम[३]मरादीनां[४] भक्षणे समुदीरिता ॥ ७ ॥

हे कैलासभूपते ! अब इनके भक्षण मन्त्रों को सुनिए । यह विजया ब्राह्मणी, क्षत्रिया, वैश्या तथा शूद्रा के भेद से चार प्रकार की कही गई है । उन-उन मन्त्रों से शोधन कर उन-उन मन्त्रों से सभी प्रकार के विजया का भक्षण करे । ऐसे उनके भक्षण के मन्त्र पहले कह आए हैं ॥ ७-६ ॥

प्रणवं दीर्घप्रणवं कपिले ज्ञानसाधनि ।
मम[५] योगं साधयेति युगं स्वरेण सम्पुटम् ॥ ८ ॥
शाखासमूहसम्पूर्णे[६] महौषधिनिवासिनि ।
मामेकममरं [७]देहि कुरु युग्मं ततो द्विठः ॥ ९ ॥
अमराशनमन्त्राणि शृणुष्व पार्वतीश्वर ।
यस्य स्मरणमात्रेण नरो नारायणो भवेत् ॥ १० ॥

विजयाभक्षण मन्त्र—प्रणव, फिर दीर्घप्रणव, फिर 'कपिले ज्ञानसाधनि मम योगं साधय' (साधय को दो बार), इस स्वर से सम्पुटित 'शाखा समूहसम्पूर्णे महौषधिनिवासिनी मामेक ममरं देहि' के पश्चात् 'कुरु' दो बार, इसके बाद 'स्वाहा', इसके बाद हे पार्वतीश्वर ! अमर (बिल्वपत्र) के भक्षण का मन्त्र सुनिए जिसके स्मरण मात्र से नर नाराण हो जाता है ॥ ७-१० ॥

विमर्श—विजयाभक्षणमन्त्र का स्वरूप इस प्रकार है—ॐ औम् कपिले ज्ञानसाधनि मम योगं साधय साधय शाखा समूह सम्पूर्णे महौषधिनिवासिनी मामेकममरं देहि देहि कुरु कुरु स्वाहा ॥ ७-१० ॥

शिववद् विहरेल्लोके बिल्वपत्रस्य भक्षणात् ।
श्रीबीजत्रयमुद्धृत्य वाग्देवीत्रितयं ततः ॥ ११ ॥
लक्ष्मीकामेश्वरीबीजं[८] रमाकामत्रयं त्रयम् ।
सिद्धविश्वेशि[९] परमे निगूढतरुवासिनि ॥ १२ ॥
मामेकं ज्ञानतत्त्वेऽन्ते[१०] नियोजय युगं द्विठः ।

---

१. ब्रह्माणि—क० । २. क्रमशा—ख० ।
३. सर्वासां पूर्वोक्तानामोषधीनामित्यर्थः ।
४. अमरा देवा आदयो येषां तेषाम् । अनुक्ते कर्तरि कृद्योगे षष्ठी ।
५. यमयोगम्—ख० । ६. प्रशाखा—ख० ।
७. देव—ख० । ८. बीज—क० ।
९. विल्वेशि—क० । १०. तु—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतन्मन्त्रेण वीरेन्द्रो विधितत्त्वाख्यमुद्रया ॥ १३ ॥
शोधयित्वा पुनर्नाथ चामरां[1] शोधयेत्ततः ।

बिल्वपत्र के भक्षण से साधक शिव के समान लोक में विचरण करता है । इसके भक्षण का प्रकार यह है—तीन बार श्री बीज (श्रीं श्रीं श्रीं), वाग्देवता बीज तीन बार (ऐं ऐं ऐं), लक्ष्मी एवं कामेश्वरी बीज तथा रमा एवं काम बीज तीन तीन बार, फिर 'सिद्धविश्वेशि परमे निगूढतरुवासिनि मामेकं ज्ञानतत्त्वे', फिर 'नियोजय' को दो बार, इसके बाद 'स्वाहा', इस मन्त्र से विधितत्त्व नामक मुद्रा प्रदर्शित करते हुए शुद्ध किए गए बिल्वपत्र को हे नाथ ! संशुद्ध कर भक्षण करे ॥ १०-१४ ॥

विमर्श—मन्त्र का स्वरूप इस प्रकार है—श्रीं श्रीं श्रीं ऐं ऐं ऐं .. .. .. सिद्धविश्वेशि परमे निगूढतरुवासिनिमामेकं ज्ञानतत्त्वे नियोजय नियोजय स्वाहा ।

दूर्वा[2] देवी त्रिभुवने अमृतत्त्वप्रदायिनि ॥ १४ ॥
ग्रन्थिच्छेदभेदवारी प्रणवाद्ये परे रमा[3] ।
ततो हि विष्णुबीजञ्च किङ्किणी[4] बीजमुद्धरेत् ॥ १५ ॥
राजराजेश्वरीबीजं श्रीबीजं त्रीणि तत्परम्[5] ।
सुधाखण्डे मामिहान्ते सिद्धामरपदं लिखेत् ॥ १६ ॥
देहि देहि नमः स्वाहाशब्दमुच्चार्य शोधयेत् ।
एतद्भक्षणमात्रेण[6] चिरकालं सुखी भवेत् ॥ १७ ॥

इसके बाद दूर्वाभक्षण मन्त्र का प्रकार कहते हैं । 'दूर्वा देवी त्रिभुवने अमृतत्वप्रदायिनी ग्रन्थिच्छेदभेदवारी प्रणवाद्ये परे रमा', इसके बाद विष्णु बीज, फिर किङ्किणी बीज का उच्चारण करे । इसके बाद राजराजेश्वरी (त्रिपुरा) बीज, फिर तीन बार श्री बीज, फिर 'सुधाखण्डे मामिह सिद्धामर पदं देहि देहि नमः स्वाहा' इस मन्त्र को उच्चारण कर शोधन कर भक्षण करे । इसके भक्षण मात्र से साधक चिरकाल पर्यन्त सुखी रहता है ॥ १४-१७ ॥

विमर्श—दूर्वाभक्षण मन्त्र इस प्रकार है—दूर्वा देवी त्रिभुवने अमृतत्वप्रदायिनी । ग्रन्थिच्छेदभेदवारी प्रणवाद्ये परे रमा .. .. श्रीं श्रीं श्रीं सुधाखण्डे मामिह सिद्धामरपदं देहि देहि नमः स्वाहा ।

सर्वसंयोगमात्रेण सिद्धो भवति साधकः ।
सिद्धामराशोधनं तु शृणु श्रीचन्द्रशेखर ॥ १८ ॥

साधक सभी (अमरा) को संयुक्त करने मात्र से सिद्ध हो जाता है । हे चन्द्रशेखर ! अब सिद्धामरा (निर्गुण्डी) के शोधन का प्रकार सुनिए ॥ १८ ॥

---

१. चामरतां तु शोधयेत्—ख० ।
२. पूर्वा—ख० ।—दूर्वा देवी अमृतं प्रददाति, दूर्वाया अशनेन दूर्वाशाऋषिर्महानभवत् ।
३. पुरेव सा—ख० ।
४. किं किं बीजं समुद्धरेत्—क० ।
५. निवैरिसम्—क० ।
६. स्मरणमात्रेण—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिद्धामरा च निर्गुण्डी त्रिषु लोकेषु गोपिता ।
एतत्प्रधानं मूलञ्च पत्रं वा [१]चालयेत् सुधीः ॥ १९ ॥
मूलाभावे दलं [२]ग्राह्यं दलाभावे न मूलकम् ।

सिद्धामरा निर्गुण्डी को कहते हैं । यह तीनों लोकों में गुप्त है । सुधी साधक इसके प्रधान मूल अथवा पत्र का सञ्चालन करे । मूल के अभाव में पत्ता ले लेना चाहिए किन्तु पत्ते के अभाव में मूल ग्रहण न करे ॥ १९-२० ॥

आनयेत् साधकश्रेष्ठः शोभनेन दिनेन तु ॥ २० ॥
तदा भवति सिद्धिश्च कौलानां नियमो नहि ।
कौलिके सर्वसिद्धिश्च कौलिके योगसाधनम् ॥ २१ ॥
कुलाचारविहीनानां [३]योगभोगादिकं कथम् ।
विना योगेन भोगादिसञ्चयो जायते कथम् ॥ २२ ॥

साधक श्रेष्ठ उत्तम तिथि वार नक्षत्र वाले सन्मुहूर्त में इसे ग्रहण करे तभी सिद्धि होती है किन्तु कौल सम्प्रदाय वालों के लिए ऐसा नियम नहीं है । कौलिकों के लिए यह सर्वदा सिद्धि देने वाली है और उनके योग का साधन है । भला जो कुलाचार से विहीन (कौलिक नहीं) है उसे योग भोग किस प्रकार प्राप्त हो सकता है ? इतना ही नहीं बिना योग के भोग सञ्चय किस प्रकार हो सकता है ॥ २०-२२ ॥

योगसाधनमात्रेण [४] भोगसाधनमालभेत् ।
तद्भोगं परमं ज्ञानं [५]कालामृतनिसेवनम् ॥ २३ ॥

मात्र योगसाधन से ही साधक भोग साधन प्राप्त कर लेता है । वह भोग वैषयिक भोग नहीं परम ज्ञान स्वरूप है और काल के विनाश के लिए अमृत का सेवन है ॥ २३ ॥

विषयाह्लादभोगादिरनायासेन वर्धते ।
शरीरिणामादिकार्य[६] शरीरस्य प्रभो प्रियम् ॥ २४ ॥

हे प्रभो ! विषयाह्लाद करने वाले भोगादि तो उसी से अनायास बढ़ते हैं । इसलिए उस ज्ञान की प्राप्ति ही शरीर धारियों का प्रथम कर्तव्य है, जो शरीर के लिए प्रिय है ॥ २४ ॥

शीतलामृतरूपाढ्यं व्यक्ताव्यक्तप्रकारकम् ।
आदिसाधनमेवं हि कथितं स्नेहहेतुना ॥ २५ ॥

---

१. भक्षयेत्—ख० । २. भोज्यं पत्राभावे च—ख० ।
३. योगं योगादिकम्—ख० । ४. योगसञ्चयमात्रेण—ख० ।
५. ज्ञानामृतनिषेवणम्—ख० ।
६. शरीराणाम्—ख० ।—शरीरिणामिति पाठो युक्ततरः, तेषां हि शरीरं प्रियं भवति । तत्रैवात्मतादात्म्यात् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(हे प्रभो ! वह ज्ञान) शीतल एवं अमृत रूप से परिपूर्ण है । वह ज्ञान व्यक्त भी है और अव्यक्त भी है । इस प्रकार वह आदि साधन है, जिसको मैंने आप के स्नेह के कारण कहा है ॥ २५ ॥

वल्लभ प्राणरक्षार्थे [१] शोकार्तिवारणाय च ।
पुनस्तु कथये [२] तुभ्यं निर्गुण्डीशोधनं मनुम् ॥ २६ ॥

हे वल्लभ ! अब प्राण की रक्षा के लिए तथा शोक एवं दुःख के वारण के लिए निर्गुण्डी शोधन का मन्त्र आप से फिर कहती हूँ ॥ २६ ॥

निर्गुण्डीशोधनमन्त्रकथनम्

ॐ निर्गुण्डि महामाये [३] महायवनिवासिनि ।
आयुरारोग्यजननि ब्रह्मशब्दनिवासिनि ॥ २७ ॥
मदीयं सकलं कायं शुद्धं [४] कुरु युगं ततः ।
नान्तयुग्मं बिन्दुनादभूषितं चारुतेजसम् ॥ २८ ॥
चतुर्दशस्वरव्याप्तं (ठयुगं) [५] बिन्दुभूषितम् ।
लक्ष्मीबीजत्रयं [६] पश्चाद् रमाबीजमयं लिखेत् ॥ २९ ॥
वज्रकायं देहि देहि शब्दान्ते वह्निसुन्दरी ।
एतन्मन्त्रेण संशोध्य भक्षयेत् साधकोत्तमः ॥ ३० ॥
ततोऽमरो भवेत् क्षिप्रं नात्र कार्या विचारणा ।

निर्गुण्डीशोधनमन्त्र—'ॐ निर्गुण्डि महामाये महायवनिवासिनि ! आयुरारोग्य जननि ! ब्रह्म शब्द निवासिनी, मदीयं सकलं कायं शुद्धं कुरु कुरु' इसके बाद नान्त ? (पँ पँ) दो, फिर ठयुग (स्वाहा), फिर बिन्दु भूषित लक्ष्मी बीज तीन बार, फिर रमाबीज, फिर 'वज्रकायं देहि देहि' शब्द के अन्त में 'स्वाहा' । इस मन्त्र से शुद्ध कर उत्तम साधक निर्गुण्डी का भक्षण करे । तब वह शीघ्र ही अमर हो जाता है इसमें विचार की आवश्यकता नहीं है ॥ २९-३१ ॥

विमर्श—निर्गुण्डीशोधनमन्त्र का स्वरूप इस प्रकार है—ॐ निर्गुण्डि महामाये महायवनिवासिनि ! आयुरारोग्य जननि ! ब्रह्म शब्द निवासिनी, मदीयं सकलं कायं शुद्धं कुरु कुरु पँ प स्वाहा स्वाहा श्रीं श्रीं श्रीं श्रीं वज्रकायं देहि देहि स्वाहा ॥ २९-३१ ॥

तुलसीशोधनमन्त्रकथनम्

तुलसीशोधनं वक्ष्ये शृणुष्व परमेश्वर ॥ ३१ ॥
यत्कृत्वा च निरोगी स्याद् बलवान् विजितेन्द्रियः ।

---

१. शोकाश्रु—ख० ।
२. तेऽहं—ख० ।
३. महासत्त्व—ख० ।
४. गुह्यं—ख० ।
५. धायुगं—ख० ।
६. उमा—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हे परमेश्वर ! अब तुलसीशोधन का प्रकार कहती हूँ । जिसके करने मात्र से साधक निरोग बलवान् एवं जितेन्द्रिय हो जाता है ॥ ३१-३२ ॥

प्रणवं वैष्णवी देवी सत्त्वज्ञाननिवासिनि ॥ ३२ ॥
कामबीजत्रयान्ते तु मां रक्ष युगलं द्विठः ।
एतच्छोधनमाकृत्य भक्षणं यः करोति च[१] ॥ ३३ ॥
कायसिद्धिर्भवेत्तस्य ध्यानधारणयोगिनः[२] ॥ ३४ ॥

॥ इति[३] श्रीरुद्रयामले उत्तरतन्त्रे सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे पञ्चसिद्धद्रव्यशोधनं नाम चतुःपञ्चाशत्तमः पटलः ॥ ५४ ॥

— ❖ —

'प्रणव (ॐ) वैष्णवी देवी सत्त्वज्ञान निवासिनि', फिर तीन बार काम बीज (क्लीं क्लीं क्लीं), फिर 'मां रक्ष रक्ष स्वाहा' इस प्रकार मन्त्र द्वारा शुद्ध की गई तुलसी का जो भक्षण करता है, उस ध्यान धारणा वाले योगी की कार्यसिद्धि होती है ॥ ३२-३४ ॥

विमर्श—तुलसीशोधनमन्त्र का स्वरूप इस प्रकार है—ॐ वैष्णवी देवी सत्त्वज्ञान निवासिनि क्लीं क्लीं क्लीं मां रक्ष रक्ष स्वाहा ॥ ३२-३४ ॥

॥ श्रीरुद्रयामल के उत्तरतन्त्र में सिद्धमन्त्रप्रकरण में षट्चक्रप्रकाश में भैरवीभैरवसंवाद में पञ्चसिद्धद्रव्यशोधन नामक चौवनवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ५४ ॥

— ❖ —

---

१. हि—ख० ।—एतस्याः तुलसीदेव्याः संशोधनपूर्वकं सेवनेन सर्वसम्पत्तिर्बले वीर्ये ऐश्वर्ये विद्यायां च ।

२. ध्याने धारणे च योगो यस्य, तस्य योगिनः कायसिद्धिर्भवति । कायस्योड्डयनं दूरदर्शनं दूरश्रवणमित्यादि सिद्धय इत्यर्थः ।

३. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरव-संवादे पञ्चद्रव्यशोधनं नाम पञ्चपञ्चाशत्तमः पटलः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ पञ्चपञ्चाशत्तमः पटलः

श्रीआनन्दभैरवी उवाच

कथयामि तव स्नेहात् कायवश्यविशेषणात् ।
हठयोगं प्रकथितमिदानीं शृणुत क्रमम् ॥ १ ॥

श्रीआनन्दभैरवी ने कहा—(हे महाभैरव) काय वश्य की विशेषता कहते हुए हमने आपके स्नेह से हठ योग कहा । अब उसके क्रम को सुनिए ॥ १ ॥

मणिपूरस्थितं रुद्रं त्रैलोक्ये पवनाक्षयम्[१] ।
कथयामि शिवानन्द शिवशङ्कर मङ्गल[२] ॥ २ ॥

हे शिवानन्द ! हे शिवशङ्कर ! हे मङ्गलरूप ! हे त्रैलोक्य को पवित्र करने वाले ! अब अक्षय मणिपूर में निवास करने वाले रुद्र के विषय में कहती हूँ ॥ २ ॥

स्वाधिष्ठानोर्ध्वदेशे च परमानन्दसागरम् ।
नाभिमूलं मेघजालमध्य विद्युच्छताकुलम् ॥ ३ ॥
रहस्यातिरहस्यं च योगिनामतिसारगम् ।
तन्नाभिमूलदेशे च नीलपद्मं महाप्रभम् ॥ ४ ॥
तद्दलाग्रे सदा भान्ति डादि[३]फान्ताक्षराणि च ।
तद् बाह्ये शोभितं रूपं त्रिकोणमनलस्य च ॥ ५ ॥

स्वाधिष्ठान चक्र के ऊपर वाले प्रदेश में अत्यन्त आनन्द का सागर नाभि का मूल है, जो मेद्यजाल में रहने वाली सैकड़ों विद्युतों से प्रकाशित है । वह रहस्य से भी परे अति रहस्य है, योगिजनों के लिए ही उसका सारगम्य है । उस नाभि के मूल प्रदेश में अत्यन्त प्रकाशपूर्ण नीलवर्ण का पद्म है । उस पद्म के आगे 'ड' से लेकर 'फ' पर्यन्त १० वर्ण विराजमान हैं । उसके बाहरी भाग में अग्नि का स्वरूप है जो त्रिकोण है ॥ ३-५ ॥

प्रभातसूर्यसङ्काशं शिखाकारं[४] निरञ्जनम् ।
तत्राग्निबीजरूपं च रूपातीतं गुणान्तरम्[५] ॥ ६ ॥
विचिन्तयेन्मेषपृष्ठवाहनं चारुणाकृतिम् ।
चतुर्बाहुं त्रिनयनं चारुदेहधरं परम् ॥ ७ ॥

---

१. परमाक्षरम्—ख० । २. मङ्गलम्—ख० ।
३. भाविकान्ताक्षराणि—ख० । ४. शिखाकारम्—ख० । ५. निरञ्जनम्—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्क्रोडे भाति रुद्रेशः सिन्दूरारुणविग्रहः ।
ब्रह्मरूपी[१] त्रिनयनः सृष्टिसंहारकारकः ॥ ८ ॥

प्रातःकालीन सूर्य के समान देदीप्यमान, शिखा के आकार वाले निरञ्जन हैं । वहीं पर रूप से अतीत एवं निर्गुण अग्नि का बीज भी विद्यमान है । ऐसे मेष वाहन वाले लाल वर्ण के अग्नि का ध्यान करे । जिनके चार बाहु तथा तीन नेत्र हैं जिनका शरीर अत्यन्त मनोहर हैं । इस प्रकार के अग्नि के गोद में सिन्दूर के समान लाल वर्ण वाले रुद्रेश बैठे हुए शोभित हो रहे हैं । उन रुद्र का स्वरूप ब्रह्म के समान है, जो त्रिनेत्र एवं सृष्टि के संहारकर्ता हैं ॥ ६-८ ॥

विभूतिभूषिताङ्गस्तु लोकानामिष्टदो विभुः ।
तस्य[२] वामे सदा भाति लाकिनी परदेवता ॥ ९ ॥

उनका शरीर विभूति से भूषित है जो अपने भक्तों को अभीष्ट प्रदान करते हैं ऐसे रुद्र के वाम भाग में लाकिनी परदेवता सदैव विराजमान रहती हैं ॥ ९ ॥

चतुर्भुजा महादेवी त्रिनेत्रा सौख्यदायिनी ।
श्यामाङ्गी पीतवसना विचित्रालङ्कृतामरा[३] ॥ १० ॥

वह लाकिनी चार भुजाओं वाली त्रिनेत्रा तथा सौख्य देने वाली हैं । उनके शरीर का वर्ण श्याम है, वे पीताम्बर धारण की हुई हैं और विचित्र अलंङ्कारों से भूषित हैं ॥ १० ॥

सर्वसिद्धिप्रदा माता सर्वत्र सर्वपालिका ।
सदा रक्षतु मां देवी विद्याभिः कुलपालिका[४] ॥ ११ ॥

वह माता सारी सिद्धियों को देने वाली हैं । सर्वत्र सबकी रक्षा करती हैं । ऐसी कुलपालिका वह लाकिनी देवी विद्याओं के साथ हमारी रक्षा करें ॥ ११ ॥

एवं ध्यात्वा पूजयित्वा जपयागस्तवादिभिः ।
ततः सिद्धो भवेन्मन्त्री मणिपूरप्रसादतः ॥ १२ ॥

इस प्रकार ध्यान कर जप यज्ञ तथा स्तुतियों से उनकी पूजा करे । ऐसा करने से मणिपूर की कृपा से साधक सिद्ध हो जाता है ॥ १२ ॥

मणिपूरफलं वक्ष्ये समासेन शृणुष्व[५] तत् ।
कोटिवर्षशतेनापि फलं वक्तुं न शक्यते ॥ १३ ॥

---

१. वृद्धरूपी त्रिनेत्रश्च—ख० ।—ब्रह्मणो रूपमस्ति यस्य स ब्रह्मरूपी । अथवा ब्रह्मरूपयति बोधयति इति ब्रह्मरूपी, णिनिप्रत्ययः कर्तरि ।

२. तस्या—क० ।

३. अलङ्कृताम्बरा—ख० ।

४. कालिका—ख० ।

५. शृणु प्रभो—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मणिपूरानन्तरं हि प्रवक्तव्यमनाहतम्[१] ।
स्तोत्रं ध्यानं नामधेयं[२] सहस्रगुणशङ्करम् ॥ १४ ॥

हे सदाशिव ! संक्षेप में मणिपूर का फल कहूँगी । ऐसे तो करोड़ों वर्षों में भी उसका फल कथन शक्य नहीं है । मणिपूर के बाद अनाहत के विषय में भी कहना है, उसका स्तोत्र ध्यान तथा नामधेय सहस्रों गुना कल्याणकारी है ॥ १३-१४ ॥

फलमत्यन्तगुह्यं च[३] सुहृत्पद्मोपसिद्धिदम् ।
आत्मज्ञानं मोक्षसिद्धिं प्रेमभक्त्यादिलाभकम् ॥ १५ ॥
संहर्ता जनसङ्घानां पालकः कमलाकरः[४] ।
अकस्माज्ज्ञानसन्दोहलक्ष्मीं प्राप्नोति योगिराट् ॥ १६ ॥

॥ इति[५] श्रीरुद्रयामले उत्तरतन्त्रे सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे मणिपूरभेदो नाम पञ्चपञ्चाशत्तमः पटलः ॥ ५५ ॥



उसका फल तो अत्यन्त गोपनीय है, वह सबका सुहृत्पद्म है और शीघ्र ही सिद्धियाँ प्रदान करता है । उससे आत्मज्ञान, मोक्षसिद्धि तथा प्रेमाभक्ति का लाभ प्राप्त होता है । वह कमलाकर है जो जन समूहों का संहर्त्ता एवं पालक है, उसका उपासक योगिराज अकस्मात् ज्ञान संदोह की लक्ष्मी प्राप्त करता है ॥ १६ ॥

॥ श्रीरुद्रयामल के उत्तरतन्त्र में सिद्धमन्त्रप्रकरण में षट्चक्रप्रकाश में भैरवीभैरवसंवाद में मणिपूरभेद नामक पचपनवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ५५ ॥



---

१. अनाहतः—ख० । २. समाधेयम्—ख० ।
३. सृहृत्पद्मोपलब्धिगम्—ख० ।
४. कमलापतिः—ख० ।—अयमेव पाठो युक्ततरः । कमलाकर इति पाठे तु कृधातुः सम्पादने संवर्धने वा बोध्यः ।
५. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरव-संवादे मणिपूरभेदो नाम षट्पञ्चाशत्तमः पटलः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ षट्पञ्चाशत्तमः पटलः

श्रीआनन्दभैरव उवाच

वद कामिनि कौमारि सुरानन्दे कुलेश्वरि ।
हृदयाम्भोजविन्यासमधुना वक्तुमर्हसि ॥ १ ॥
यस्य विज्ञानमात्रेण नरो योगेश्वरो भवेत् ।
सर्वसिद्धिक्रियास्थानं योगिनामतिदुर्लभम् ॥ २ ॥
सर्वतत्त्वस्वरूपं च सिद्धिमार्गप्रकाशकम् ।
हृदयाम्भोज [1]विज्ञानान्मार्तण्डभैरवो भवेत् ॥ ३ ॥

श्रीआनन्दभैरव ने कहा—हे कामिनि ! हे कौमारि ! हे सुरानन्दे ! हे कुलेश्वरि ! अब हृदय स्थल में रहने वाले (अनाहत) पद्मचक्र का विन्यास कहिए, जिसके जान लेने मात्र से ही मनुष्य योगीश्वर बन जाता है । वह तो कमल सभी सिद्धियों का स्थान है और योगियों के लिए सर्वथा दुष्प्राप्य है । वह सभी तत्त्वों का स्वरूप है और सिद्धि मार्ग का प्रकाशक है, इस प्रकार हृदयाम्भोज स्थित कमल का ज्ञान हो जाने पर साधक मार्तण्डभैरव हो जाता है ॥ १-३ ॥

श्रोतुमिच्छामि तत्सर्वं [2]षट्चक्रसारमङ्गलम् ।
स्नेहाद्[3] दृष्टिक्रमेणैव भक्तियोगोद्भवेन च ॥ ४ ॥
भेदनं भावनं ज्ञानं चित्तदर्शनमेव च ।
मन्त्रोद्धारञ्च सङ्केतं सर्वज्ञादिगुणोदयम् ॥ ५ ॥
यजनं काकिनीदेव्या ईश्वरस्य गुणात्मनः ।
स्तवनं कवचं सर्वं सहस्रनाममङ्गलम् ॥ ६ ॥
वायूनां मण्डलज्ञानं समासेन वदस्व मे ।
त्वमेव शरणं देवि त्राहि मां दुःखसङ्कटात्[4] ॥ ७ ॥

मैं आपके स्नेह से, भक्तियोग से उत्पन्न, दृष्टिक्रम से षट्चक्रों के सारभूत, मङ्गलदायी उस अनाहत चक्र के विषय सुनना चाहता हूँ । उस अनाहत चक्र का भेदन ध्यान, ज्ञान, चित्त में संदर्शन, मन्त्रोद्धार, सङ्केत, सर्वज्ञादि गुण का उदय, काकिनी देवी की पूजा, गुणात्मा ईश्वर का स्तवन कवच, मङ्गल करने वाला सहस्र नाम, समस्त वायुओं के मण्डल का ज्ञान

---

१. हृदयाम्भोध—क० । २. षट्सु चक्रेषु मङ्गलम्—ख० ।
३. स्नेह—ख० ।
४. 'संप्रोदश्च कटच्' इति सूत्रेण संगतमित्यर्थे समुपसर्गात् कटच्प्रत्ययः । दुःखानां संकटात् संगमनात् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्यादि सभी बातें संक्षेप में कहिए । हे देवि ! हमारे लिए तो आपही शरणदात्री हैं अतः दुःख सङ्कट से मेरी रक्षा कीजिए ॥ ५-७ ॥

महाकाल [१]भयाभाव भक्तिभावपरायण ।
ममानन्दभैरवेश[२] शृणु वक्ष्यामि तत्त्वतः ॥ ८ ॥

श्री आनन्दभैरवी ने कहा—हे महाकाल! हे निर्भीक! हे भक्ति भावपरायण! हे मुझे आनन्द देने वाले भैरवेश! अब मैं यथार्थ रूप में उन सभी बातों को कहती हूँ सुनिए ॥ ८ ॥

यदुक्तं भवता चात्र चाश्रुतं [३]चाद्भुतं मतम् ।
नोक्तं कुत्रापि सर्वेश तव स्नेहात् प्रकाशितम् ॥ ९ ॥
अप्रकाश्यमिदं रत्नं दुःखजालनिवारणम् ।
सावधानेन सर्वेश कुरु त्वं योगसाधनम् ॥ १० ॥

अनाहतपद्मचक्रविन्यास—आपने इस समय जो जो प्रश्न किए हैं, ने अश्रुत एवं अद्भुत हैं, हे सर्वेश ! इस विषय में मैने अभी तक किसी से कुछ नहीं कहा था, किन्तु आपके स्नेह वश प्रकाशित करती हूँ । दुःख समूहों को विनष्ट करने वाला यह रत्न को किसी से प्रकाश के योग्य नहीं है, किन्तु हे सर्वेश ! आप मेरे द्वारा कहे गए इस योग साधन को सावधानी से कीजिए ॥ ९-१० ॥

मयि योगं महादेव कृत्वा कालवशं नय[४] ।
मयि योगं न [५]करोति सिद्धिभक्तिक्रियादिकम् ॥ ११ ॥
अकस्मान्मरणं तस्य कालभक्षो न संशयः ।

हे महादेव ! मेरे कहे गए योग का अनुष्ठान कर आप काल को अपने वश में कीजिए । जो लोग मेरे इस योग, सिद्धि, भक्ति तथा क्रियादिकों को नहीं करते वे काल के द्वारा भक्षण कर लिए जाते हैं तथा अकस्मात् मृत्यु प्राप्त करते हैं, इसमें संशय नहीं है ॥ ११-१२ ॥

केवलं मां हृदम्भोजे परिपूर्णफलोदये ॥ १२ ॥
सर्वाकारे[६] मनोराज्ये नानाकौतुकसङ्कुले ।
पूजयित्वा सदा ध्यायेत् काकिनीं मां न संशयः ॥ १३ ॥

हे महादेव ! साधक के परिपूर्ण फल का उदय है जिसमें इस प्रकार के हृत्कमल में अथवा अनेक प्रकार के कौतुकों से परिपूर्ण, सर्वाकार मनोराज्य वाली मुझ काकिनी का पूजन कर सदा ध्यान करे ॥ १२-१३ ॥

स[७] योगी जायते नाथ हृदम्बुजप्रसादतः ।
हृत्पङ्केरुहमध्यस्थाः सर्वे देवाः सवासवाः ॥ १४ ॥

---

१. महाभाग—ख० ।
२. महानन्द—ख० ।
३. परमाद्भुतम्—ख० ।
४. हर—ख० ।
५. करोषि—ख० ।
६. सर्वकाममनोब्राह्मे ..... सङ्कुलः—ख० ।
७. संयोगी ..... हृदम्भोज—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मामर्चयन्ति ते नित्यं भक्तिभावपरायणाः ।
ये ध्यायन्ति महावीर[१] ते पश्यन्ति सवासवान् ॥ १५ ॥

हे नाथ ! इसमें संशय नहीं कि वह हृदय स्थित उस कमल की कृपा से योगी हो जाता है । उस हृदय स्थित कमल पर इन्द्र सहित सभी देवता भक्तिभाव में परायण होकर नित्य मेरा अर्चन करते हैं । अतः उस हृत्कमल का जो ध्यान करते हैं । हे महावीर ! वे इन्द्रादि सभी देवताओं का दर्शन पा जाते हैं ॥ १४-१५ ॥

क्रमेण प्राणसंयोगान् मां पश्यन्ति न संशयः ।
मामेकं[२] काकिनीध्यानं स्थिरवायुं प्रचण्डकम् ॥ १६ ॥
पश्यन्ति योगिनः काये अष्टैश्वर्यं महाप्रभम् ।
केवलं भक्तियोगेन नित्ययोगे[३] स्युरुत्तमाः ॥ १७ ॥

इतना ही नहीं उसमें प्राणवायु के संयोग से वे क्रमशः मेरा दर्शन भी प्राप्त कर लेते हैं। (हे सदाशिव !) सभी योगी जन नित्य योग वाले इस शरीर में ही केवल भक्तियोग से अष्टैश्वर्य युक्त एवं तेज से उद्दीप्त स्थिर वायु वाली महाप्रचण्ड मुझ एक काकिनी का ध्यान करने से सर्वश्रेष्ठ हो जाते हैं ॥ १६-१७ ॥

पद्मध्यानं प्रथमतः कृत्वा सिद्धो [४]भवेन्नरः ।
तद्ध्यानं शृणु वीरेश योगिनामिह दुर्लभम् ॥ १८ ॥
हृत्पद्मं कुलपालितं सुललितं हंसेन संशोधितं
बन्धू[५]कामलदीप्तिकोटिजडितं सम्भावितं साधकैः ।
अत्युत्कृष्टमयूखपुञ्जमिलितं सिन्दूरपूरारुणं[६]
ध्यात्वा पश्यति यो नरः प्रतिदिनं काद्यारुणैरावृतम् ॥ १९ ॥

साधक सर्वप्रथम उस पद्म का ध्यान करने से सिद्ध हो जाता हैं । हे वीरेश ! योगियों के लिए भी अत्यन्त दुर्लभ उस ध्यान को सुनिए । शाक्त सम्प्रदायों द्वारा सुरक्षित, परमहंसों के द्वारा शुद्ध किए जाने वाले करोड़ों बन्धूक पुष्प की दीप्ति से जडित, साधकों के द्वारा संभावित, अत्यन्त तेजोमय किरणों से मिश्रित सिन्दूर के समान अरुण वर्ण वाले, ककारादि की अरुणिमा से आच्छन्न उस हृत् कमल का ध्यान कर लेने पर साधक उसका प्रत्यक्ष दर्शन करते हैं ॥ १८-१९ ॥

स स्यात्कोटिधनेश्वरो नरवरो भूयात्त्वभावार्णवे[७]
यो नित्यं लिपिभावनं प्रकुरुते नित्येश्वरालोकनात् ।

---

१. महावीरास्तपस्यन्ति च वासवान्—ख० । वासवेनेन्द्रेण सहितान् इन्द्रसहितान् देवान् । च वासवानिति पाठे तु अनेककल्पसंभूतान् वासवान् इन्द्रान् ।
२. मामैकम्—क० ।
३. नित्ययोगेन चोत्तमम्—ख० ।
४. न संशयः—ख० ।
५. वल्गुं कोमल—ख० ।
६. वर्णारुणम्—ख० ।
७. भूयस्त्वत्यं वक्षसि—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तद्ध्यानं क्रमतो वदामि सकलं येन प्रसिद्धो भवे-
दानन्दार्णवमध्यपद्मकलितं काद्यर्कवर्णोज्ज्वलम् ॥ २० ॥

जो साधक लिपि रूप में भावना करता है वह उसके रूप ईश्वर के अवलोकन से इस अभावग्रस्त जगत् रूप समुद्र में कोटि धनेश्वर हो जाता है और राजा हो जाता है । हे सदाशिव ! अब उस लिपि स्वरूप ईश्वर का क्रमपूर्वक ध्यान कहती हूँ जो आनन्द रूप समुद्र में विकसित कमल पर ककारादि रूप से विराजमान हैं, सूर्य के समान उज्ज्वल हैं और जिसके ध्यान करने से साधक भूमण्डल में प्रसिद्ध हो जाता है ॥ २० ॥

दले पूर्वे ध्यायेदतिविमलवर्णं कमिति वा
प्रभातार्कच्छायारुणकिरणयोगं युगमयम् ।
चतुर्बाहुं[1] नित्यं त्रिनयनमनन्तं रविगतं
भवाद्याशक्तिस्थं[2] स्वभवनघटाशोभिततनुम्[3] ॥ २१ कँ ॥

साधक अनाहत पद्म चक्र के पूर्व दिशा में स्थित दल पर अत्यन्त निर्मल 'क' वर्ण का ध्यान करे जो प्रातःकालीन सूर्य की छाया से अरुण (लाल) किरणों से युक्त है, युगमय है और सूर्य में चार बाहुओं एवं तीन नेत्रों से युक्त होकर निवास करता है । भव एवं आद्या शक्ति में निवास करने वाला है । अपने भवन में घटा के समान श्यामवर्ण जिसका शरीर है ॥ (कँ) ॥ २१ ॥

द्वितीये[4] पत्रेऽस्मिन् खमरुणसमूहाश्रयपदं
पदं श्रीतारिण्या अनिलगगनयोः प्रियकरम् ।
मुदा ध्यायेदेवं परममनिलं देवभुजगं
सुवर्णालङ्कारं त्रिनयनममौल्यं सुखमयम् ॥ २२ खँ ॥

उस अनाहत पद्मचक्र के द्वितीय पत्र पर अरुण समूह के आश्रय से व्याप्त 'ख' वर्ण का ध्यान प्रसन्नतापूर्वक करना चाहिए, जो श्री तारिणी का पद है । अनिल एवं आकाश का प्रिय करने वाला है, जो परम एवं अनिल (वायु स्वरूप) है, शेष देव है, सुवर्णालङ्कार से अलंकृत तीन नेत्रों वाला (अमौल्य) बिना मस्तक एवं सुखमय हैं ॥ २२ ॥ (खँ)

तृतीये[5] पत्रेऽस्मिन् विधुयुतकपालं त्रिनयनं
स्वसिन्दूराकारं[6] द्वियुगभुजशोभाभवमहम् ।
सदा ध्यायेदेवं परमपुरुषं श्रीगणपतिं
स्फुरद्रक्ताकारं[7] तरुणमणिमालं जितमदम् ॥ २३ गँ ॥

---

१. चतुर्धाङ्ग—ख० । २. शक्तिस्त्वं—ख० ।
३. स्वस्य भवने या घटा घटना तया शोभिता तनुर्यस्य तम् । स्वभवनघटास्थायिनी स्ववशगा भवति, परभवनघटा परतन्त्रा भवति ।
४. द्वितीये ..... सुखमयमिति श्लोकमिदं ख० पुस्तके नास्ति ।
५. द्वितीयं पत्रस्थं—ख० । ६. ससिन्दूराकारं ... त्रिगुणभुज—ख० ।
७. सुरत्नाकारं वै ..... मालं—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनाहत पद्म चक्र के इस तृतीय पत्र में गणपति स्वरूप 'ग' वर्ण का ध्यान करना चाहिए, जो विधु (चन्द्रमा) एवं कपाल से युक्त है, तीन नेत्रों वाला है, सिन्दूर के स्वरूप वाला, चार भुजाओं वाला तथा शोभा से उत्पन्न तेजो वाला है, ऐसे परम पुरुष, रक्त आकार वाले उद्दीप्त मणिमाला से विभूषित तथा मद को जीतने वाले श्री गणपति का ग वर्ण के रूप में ध्यान करना चाहिए ॥ २३ ॥ (गँ)

चतुः पत्रे ध्यायेद्यमरुणशतं[१] घोरनिनदं
क्रियादक्षं मूर्तिं त्रिनयनसरोजं युगभुजम् ।
वराभीतिप्रोच्छत्स्फटिकजपमालादिसहितं
फणालङ्काराङ्गं[२] शिव शिव मुखेशोत्तममहम् ॥ २४ घँ ॥

चतुर्थ पत्र पर 'घ' वर्ण का ध्यान करना चाहिए जो सैकड़ों अरुण के समान लाल है और घोर शब्द करने वाला है । जो क्रिया में दक्ष मूर्तिका स्वरूप है । जिसके कमल के समान तीन नेत्र हैं, दो भुजा हैं जो वर तथा अभय और अत्यन्त स्वच्छ स्फटिक की माला धारण किए हुए हैं । जिनका अङ्ग (शरीरावयव) सर्पों से अलंकृत है जो शिव शिव है, मुखेश है तथा उत्तम तेज वाला है ॥ २४ ॥ (घँ)

ङंबीजं सिन्दूरारुणममखिलनाथं त्रिनयनं
महामोक्षस्थानं [३]मणिकनकरत्नाद्यभरणम् ।
चतुर्बाहुं[४] रुद्रं जगति भवमेकं गुणविभुं
कपालं[५] श्रीमालं[६] वरमभयकं बिभ्रतमहम् ॥ २५ ङँ ॥

पञ्चम पत्र पर 'ङ' बीज वाले, सिन्दूर के समान अरुण वर्ण वाले, विश्वनाथ, तीन नेत्रों वाले, महामोक्ष के स्थान, मणि एवं सुवर्णादि निर्मित अलङ्कार धारण करने वाले, चतुर्बाहु रुद्र का ध्यान करना चाहिए जो संसार में भव नाम से अद्वितीय हैं, अपने गुणों से सर्वत्र व्यापक हैं, जो कपाल से संयुक्त है, श्री युक्त जिनका भाल है, जो वर अभय मुद्रा धारण किए हुए हैं ऐसे तेजःस्वरूप रुद्र का ध्यान करना चाहिए ॥ २५ ॥ (ङँ)

चतुर्बाहूल्लासं[७] कमलवरमालासिसहितं
विभुं तं ध्यायेऽहं विधुशतमुखं तं त्रिनयनम् ।
प्रभातार्कप्रायं सकलमणिरत्नाभरणकं
महाज्योत्स्नाजालं परमरसबिन्दूद्भवतनुम् ॥ २६ चँ ॥

हम षष्ठ पत्र पर 'च' स्वरूप उस व्यापक परमात्मा का ध्यान करते हैं जो चार बाहुओं

---

१. अमलमरुणम्—ख० ।
२. कलाऽलङ्काराङ्ग शिरसिंहमुखेशोत्तममहम्—क० । ३. शशि—ख० ।
४. चतुर्धाङ्गं ..... पतितजननाथम्—ख० । ५. क्रियानाथं देवं—ख० ।
६. श्रियं मिमीते या सा श्रीमा, तामलते भूषयति इति श्रीमालः, कर्तरि अण्प्रत्ययः, अल्घातोः ।
७. चतुर्धाङ्गं ..... कपालेष्वष्टसहितम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

से उल्लसित हैं, उन हाथों में कमल, वर, माला तथा असि (खड्ग) से संयुक्त हैं, जिनका मुख सैकड़ों चन्द्रमा के समान मनोहर है, जो तीन नेत्रों वाले प्रभातकालीन सूर्य के समान (लाल), सब प्रकार की मणियों एवं रत्नों के आभरण वाले हैं महती ज्योत्स्नाजाल से संयुक्त हैं किं बहुना जिनका शरीर (मानो) परम (आनन्द) रस के बिन्दुओं से निर्मित है ॥ २६ ॥ (चँ)

तमेकं नेत्रस्थं [१]छममलकरं नूतनरविं
चतुर्बाहुं[२] ध्याये वरतनुकपालेषु सहितम् ।
सुधाधारापानं कनकजपमालाऽवृततनुं
त्रिनेत्रं योगेन्द्रं वसुदलगतं चारुवदनम् ॥ २७ छँ ॥

मैं वसु (८ वें) दल पर रहने वाले नेत्र पर स्थित, स्वच्छ हाथों वाले सूर्य के समान देदीप्यमान मात्र एक 'छ' का ध्यान करता हूँ जिनकी चार भुजाएं वर, तनु, कपाल तथा बाण से सयुक्त हैं जो निरन्तर सुधा की धारा का पान करने वाले हैं तथा जिनका शरीर सुवर्ण एवं जपमाला से आवृत है, जो त्रिनेत्र और योगेन्द्र हैं ॥ २७ ॥ (छँ)

विमर्श—वसुदलगतं के स्थान पर सप्तदलगतं होना चाहिए । २९वें श्लोक में आठवें दल की पूजा का विधान है । सप्तम दल का विधान छूट है ॥ २७ ॥

चतुर्वक्त्रं ध्याये [३]जमजममरं सारुणतनुं
विशालाक्षं सूक्ष्मं [४]समरसमयं ब्रह्मवपुषम् ।
चतुर्बाहुं[५] देवं त्रिभुवनपदं सारघटितं
महाशङ्खं रुद्रं[६] वरमभयकं बिभ्रतबलम् ॥ २८ जँ ॥

हम चार मुख वाले 'ज' स्वरूप अज, अमर, अरुण वर्ण के शरीर वाले, विशाल नेत्रों वाले, अत्यन्त सूक्ष्म, युद्ध में अपनी प्रतिज्ञा का निर्वाह करने वाले, ब्रह्म शरीर रुद्र का ध्यान करते हैं । जो चार बाहुओं वाले, देव स्वरूप, त्रिभुवन रूप चरण वाले एवं सभी सार तत्त्वों से युक्त हैं । किं बहुना जो महाशंख, वर एवं अभयमुद्रा धारण करने वाले एवं (रुद्र) महाबलवान् है ॥ २८ ॥ (जँ)

महाकायं तेजोमयमपि चरुं बीजमखिलं
मुदा[७] ध्याये कामापहमतिमुखं चाष्टमदले ।
महासिन्दूराद्रिं दिनकरकलाकोटिविमलं
त्रिनेत्रं पञ्चास्यं दशभुजयुतं [८]सर्ववपुषम् ॥ २९ झँ ॥

मैं (उस अनाहत चक्र पद्म के) अष्टम दल पर महाकाय, तेजोमय, चरुस्वरूप,

---

१. छल—ख० । २. चतुर्धाङ्ग ..... कपालेष्वष्टसहितम्—ख० ।
३. अथ च मनसा चारुणतनुम्—ख० । ४. समयमनिशं चक्रवपुषम्—ख० ।
५. चतुर्धाङ्गं—ख० । ६. रुण्डं—क० ।
७. सदा—ख० ।
८. सर्व वपुर्यस्य तम् । सर्व जगत् तस्य भगवतो वपुं शरीरमेवेति भावः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समस्त संसार के बीज, कामनाओं को नष्ट करने वाले, महामुख वाले 'झ' स्वरूप सदाशिव का ध्यान करता हूँ जो बहुत बड़े सिन्दूर के पर्वत के समान लाल हैं, करोड़ों सूर्य की कला के समान निर्मल हैं, जिनके तीन नेत्र, पाँच मुख और दश भुजाएं हैं। जिनके शरीर में सारा जगत् समाविष्ट है ॥ २९ ॥ (झँ)

ञबीजं[१] सार्धेन्दूद्भव[२] शिखमखेशं त्रिनयनं
चतुर्बाहुं[३] ध्याये सुकमलगदाचक्रनियुतम् ।
महामालाव्याप्तं [४]सुकनकशुभाऽलङ्कृतगुरुं
प्रभातार्कं[५] विश्वार्चितजडिलरूपं रविदले ॥ ३० ञँ ॥

मैं रवि (१२) दल में चार बाहुओं वाले कमल, गदा, चक्र एवं नियुत धारण करने वाले, त्रिनेत्र 'ञ' बीज स्वरूप सदाशिव का ध्यान करता हूँ जो महामाला से व्याप्त, देदीप्यमान, उत्तम सुवर्ण के आभूषणों से अलंकृत, सब के गुरु, प्रातःकालीन सूर्य के समान अरुण वर्ण वाले एवं विश्वार्चित तथा जटाधारी हैं ॥ ३० ॥ (ञँ)

मनोरूपाच्छन्नं त्रिनयनमधीशारुणदले[६]
टबीजं बिन्द्विन्द्वं[७] जपवटिवराभीत्यसिधरम् ।
तमेकं सोमेशं [८]मणिमयचलत्कुण्डलधरं
मुदा ध्याये शम्भुं हृदि शिवदले सिद्धकमले ॥ ३१ टँ ॥

मैं हृदय के उस सिद्ध कमल स्वरूप अनाहत चक्र के ११ वें (शिव) दल में उन सदाशिव का प्रसन्नतापूर्वक ध्यान करता हूँ जो लाल कमल को अपने मनोरूप से आच्छन्न किए हुए हैं, त्रिनेत्र हैं तथा सबके अधीश्वर हैं। बिन्दु एवं इन्दु से युक्त टकार जिनका बीज है (ट)। जप करने की वटिका (मनियाँ), वर, अभीति तथा असि धारण किए हुए हैं, ऐसे सर्वप्रधान सोमेश्वर जो मणि निर्मित चञ्चल कुण्डल धारण किए हुए हैं, मैं उनका ध्यान करता हूँ ॥ ३१ ॥ (टँ)

त्रिनेत्रं कामाख्यं शिशुकरुणया सिद्धिफलदं
सुरत्नाऽलङ्कारच्छविरुचितनूनां समनघम् ।
ठकारं [९]बिन्द्विन्द्वं नवरविघटाकोटिकिरणं
दले चार्के ध्याये कमलवरमालाशिशुधरम् ॥ ३२ ठँ ॥

(मैं अनाहत पद्म चक्र के) १२ वें (अर्क) दल पर कमल की बनी हुई वरमाला (पहनकर) शिशुरूप धारण करने वाले, त्रिनेत्र, कामेश्वर (शिव) का ध्यान करता हूँ जो (उपमन्यु रूप) शिशु के ऊपर कृपा कर अभीष्ट फल देने वाले हैं। जो उत्तम रत्न के

---

१. ञं—ख० ।
२. सार्धचन्द्रोद्भव—ख० ।
३. चतुर्धाङ्गं....स्वकमल.....निविडम् ।
४. मालाङ्कितगुरुम्—ख० ।
५. प्रभातार्कम्—ख ।
६. अधीशं दशदले—ख० ।
७. टकारं विन्द्वाढ्यम्—ख० ।
८. कनकलसत्कुण्डलधरम्—ख० ।
९. विन्द्वाख्यम्.....विकलम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अलङ्कारों की छवि से जगमगाते शरीर को धारण करने वाले हैं। बिन्दु एवं इन्दु से युक्त ठकार (ठँ) जिनका बीज है, करोड़ों नवीन सूर्य समूहों के किरणों के समान जिनके शरीर की दीप्ति है ॥ ३२ ॥ (ठँ)

एतच्छुद्धमनोलयस्य भवनं[१] चैतन्यसंसिद्धये[२]
वर्णानां जपभावनं यदि सदा चिन्तामणेर्मण्डलम् ।
योगीन्द्रः कुरुते वशिष्ठसदृशो वाचां पतिर्भूतले
वाक्सिद्धिं चिरकालवासमखिले देवो हि नो मानुषः ॥ ३३ ॥

चेतना की संसिद्धि के लिए ऊपर कहे गए (कँ) से लेकर (ठँ) पर्यन्त (मातृकाओं का) ध्यान शुद्ध मन के विलय रूप भवन हैं। यह सदैव चिन्तामणि का मण्डल है जहाँ इन वर्णों के जप की भावना करनी चाहिए। जो योगीन्द्र इस प्रकार से तत्तद्दलों पर तत्तद्वर्णों का ध्यान करता है, वह भूतल पर (ऋषि) वशिष्ठ के समान वाक्पति हो जाता है। इस प्रकार वाक्सिद्धि प्राप्त कर वह चिरकाल पर्यन्त इस लोक में वास करता है तथा वह इस विश्व में मनुष्य न होकर देवता बन जाता है ॥ ३३ ॥

वाञ्छाचिन्तामणिगृहं[३] हृदयाम्भोजमण्डलम् ।
तन्मध्ये पवनस्थानं मण्डलाकारमुल्बणम् ॥ ३४ ॥
बुद्धिप्रतिभया व्याप्तं तन्मध्ये पवनाक्षरम् ।
आच्छन्नधूमसङ्काशं प्रसिद्धस्थानमुत्तमम् ॥ ३५ ॥

हृदयाम्भोज का मण्डल ही वाञ्छा का चिन्तामणि गृह है उसके मध्य में वायु का स्थान है जो मण्डल (गोलरूप) के आकार में अत्यन्त उग्र है। वह स्थान बुद्धि की प्रतिभा से व्याप्त है, जिसके मध्य में पवन का अक्षर (य बीज) है जो आच्छन्न धूम के सदृश हैं और श्रेष्ठ प्रसिद्ध स्थान हैं ॥ ३४-३५ ॥

तन्मध्ये देवतापीठं षट्कोणं मण्डलं परम् ।
तन्मध्ये भावयेदिष्टं स्वस्वकल्पोक्तसाधितम् ॥ ३६ ॥

उसके मध्य में देवता का पीठ है, जो षट्कोण मण्डल के समान उत्कृष्ट है। उसके मध्य में साधक अपने अपने कल्प में कहे गए इष्ट साधन वाले वायु का ध्यान करे ॥ ३६ ॥

वायोर्ध्यानं तत्र कुर्यादत्यन्तसूक्ष्मरूपिणम् ।
निराकारं परं ब्रह्म साकारं शब्दरूपिणम् ॥ ३७ ॥
निरक्षरं स्वाक्षराढ्यं महोग्रं[४] स्थिररूपिणम् ।
चतुर्बाहुं[५] जगद्व्याप्तं कृष्णसारासनं यवम् ॥ ३८ ॥

---

१. भुवने—ख० । २. चैतन्यस्य परतत्त्वस्य संसिद्धिस्तस्यै इति भावः।
३. मणेर्गेहं—ख० ।
४. महोग्रग्रन्थिरूपिणम्—ख० ।—स्थिरं रूपयति इति कर्तरि णिनिप्रत्ययः ।
५. चतुर्धङ्गं ..... वरम्—ख० ।—चत्वारो बाहवो यस्य तम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लोकत्रयाणां वरदं करुणासिन्धुरूपिणम् ।
पञ्चभूतात्मकं रौद्रं प्राणसञ्ज्ञं किरीटिनम् ॥ ३९ ॥

वायु का ध्यान—वहाँ वायु के इस प्रकार के स्वरूप का ध्यान करना चाहिए—जो अत्यन्त सूक्ष्म रूप वाला है, निराकार परब्रह्म है तथा शब्दरूप से वह साकार भी है । वह निरक्षर होते हुए भी स्वकीय अक्षर (यँ ?) से युक्त है, अत्यन्त उग्र होते हुए भी स्थिर रूप वाला है । उसकी चार भुजाएं हैं, फिर भी वह सारे जगत् में व्याप्त है, वह काले मृग की सवारी करता है, वेगवान् भी है । तीनों लोकों को वर देने वाला है, करुणा का तो वह समुद्र ही है, उसमें पञ्चभूतों की आत्मा सम्मिलित है, वह रौद्र है प्राण उसकी संज्ञा है तथा वह किरीट (मुकुट) धारण किए हुए है ॥ ३७-३९ ॥

संबिभ्रतं [१] वराभीतिघण्टाडमरुसेवकान् ।
ईशनाम्ना [२] परिचितं [३] परहंसं कुलेश्वरम् ॥ ४० ॥
सर्वाऽलङ्कारशोभाङ्गं [४] विवेकोदयकारणम् ।
विचिन्तयेत् साधकेन्द्रः परिवारगणावृतम् ॥ ४१ ॥

वर, अभय, घण्टा, डमरु तथा सेवकों को धारण करने वाले उन वायु को लोग ईश्वर नाम से पहचानते हैं, वह परमहंस हैं तथा शक्ति-मार्ग के ईश्वर हैं । उनके समस्त शरीरावयव अलङ्कार से शोभित हैं, वह ज्ञानोदय का कारण भी है, साधक परिकर समेत उन वायु का इस प्रकार ध्यान करे ॥ ४०-४१ ॥

तत्र पङ्केरुहे ध्यायेदीश्वरं वर्णरूपिणम् ।
त्रैलोक्यमङ्गलं नाथं [५] चतुर्बाहुं [६] किरीटिनम् ॥ ४२ ॥
रत्नमालाशोभिताङ्गं शुक्लवर्णं महाप्रभम् ।
ईश्वरं योगिनामीशं [७] वरदं परमेश्वरम् ॥ ४३ ॥

साधक को उस कमल पर (यँ) वर्णरूप वाले वायु को ईश्वर रूप में ध्यान करना चाहिए । जो तीनों लोकों का मङ्गल करने वाले हैं, सबके नाथ, चार भुजाओं वाले तथा किरीटधारी हैं । उनका शरीर रत्नों की माला से जगमगा रहा है । उनके शरीर का वर्ण शुक्ल है, महान् दीप्ति से संयुक्त है । वे ईश्वर तो हैं ही, योगीश्वर भी हैं, वरदाता तथा परमेश्वर भी हैं ॥ ४२-४३ ॥

वराभीतिशङ्खपद्मश्रिया [८] जुष्टं पुरातनम् ।
रत्नाभरणभूषाङ्गं हृदयाम्भोजवासिनम् ॥ ४४ ॥

---

१. डामर—ख० । २. ईशा—ख० । ३. परं हंसं—ख० ।
४. रविकोदयकारणम्—ख० । ५. नाथ—क० ।
६. चतुर्धाङ्गम्—ख० ।—चतुर्धा विभक्तानि अङ्गानि यस्य तम् ।
७. ध्यायेद् हृत्पद्ममण्डले—ख० ।
८. वराभीतीत्यत आरभ्य पद्ममण्डले पर्यन्तं—ख० नास्ति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वाञ्छातिरिक्तफलदं भावसिद्धिप्रकाशकम् ।
परमहंसमीशानं ध्यायेद् हृत्पद्ममण्डले ॥ ४५ ॥

वर, अभय, शंख तथा कमल की शोभा से युक्त हाथ वाले हैं । पुराण पुरुष हैं, उनके अङ्ग रत्न के आभूषणों से भूषित है तथा वह हृत्कमल के मध्य में निवास करने वाले हैं । वह मनुष्यों को उनकी अभिलाषा से भी अधिक फल देने वाले हैं । भाव की सिद्धि के प्रकाशक हैं ऐसे परमहंस ईश्वर का हृदय कमल के मण्डल में ध्यान करना चाहिए ॥ ४४-४५ ॥

तत्पार्श्वे ध्यानमाकुर्यात् काकिनीं परमेश्वरीम् ।
त्रैलोक्यपूजितां देवीं काकचञ्चुप्रकाशिनीम् ॥ ४६ ॥
चतुर्भुजां पीतवर्णां[1] पीतवस्त्रोपशोभिताम् ।
नवविद्युत्कोटिरूपां विलोलनेत्रपङ्कजाम् ॥ ४७ ॥

काकिनी ध्यान—तदनन्तर उन ईशान प्रभु के पार्श्वभाग में रहने वाली त्रैलोक्य पूजिता अपने काकचञ्चु से विश्व को प्रकाशित करने वाली काकिनी देवी का ध्यान करना चाहिए । जो चार भुजाओं वाली तथा पीले वर्ण की हैं, पीत वस्त्र से शोभित हैं, करोड़ों नवीन बिजलियों के प्रकाश के समान जिनके शरीर का प्रकाश है तथा जिनके नेत्र कमल निरन्तर चलायमान है ऐसी काकिनी देवी का ध्यान करना चाहिए ॥ ४६-४७ ॥

कपालशशिशूलास्त्रवरदानसमाकुलाम् ।
विचित्ररत्ननिर्माण[2]स्वर्णाऽलङ्कारभूषिताम् ॥ ४८ ॥
त्रैलोक्यललितां[3] सूक्ष्मां वराभयकराम्बुजाम् ।
सुधापानरतां मत्तां पूर्णरूपां कुलेश्वरीम् ॥ ४९ ॥

वे काकिनी देवी कपाल, चन्द्रमा के समान, शूल, अस्त्र तथा वरद मुद्रा धारण करने वाली हैं । विचित्र रत्नों से निर्मित तथा स्वर्ण निर्मित अलङ्कारों से भूषित हैं । वे तीनों लोकों में सर्वाधिक सुन्दरी हैं, सूक्ष्म हैं, हाथों में वर तथा अभय धारण किए हुए हैं, सुधा पान में संलग्न है, मस्ती से भरी हुई हैं, परिपूर्ण रूप वाली तथा शाक्तों की ईश्वरी हैं ॥ ४८-४९ ॥

रत्नकङ्कणमालाढ्यां परमानन्दभैरवीम् ।
हृदयाम्भोजमध्यस्थां ध्यायेऽहं हंसगामिनीम् ॥ ५० ॥

वे रत्न निर्मित कङ्कण तथा माला धारण किए हुए हैं, वह परमानन्द स्वरूपा भैरवी हैं । हृदय में रहने वाले कमल के मध्य में वास करने वाली ऐसी हंसगमना काकिनी का हम ध्यान करते हैं ॥ ५० ॥

तत्पीठमध्यनिकरे[4] त्रिकोणं परिचिन्तयेत् ।
पीठशक्तिं सुवर्णाढ्यां विद्युत्कोटिसमोदयाम् ॥ ५१ ॥

---

१. महादेवीं—ख० ।—पीतो वर्णो यस्याः । पीतवस्त्रेणोपशोभितामिति भावः ।
२. निर्माणाम्—ख० ।
३. त्रैगुण्य—ख० ।
४. ध्याननिकटे त्रिकोणाम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पीठशक्ति का ध्यान—इसके अनन्तर साधक उनके पीठ के मध्य में रहने वाले त्रिकोण का भी ध्यान करे । वह पीठ शक्ति सुवर्ण निर्मित तथा करोड़ों विद्युत् के प्रकाश के समान जगमगाहट से परिपूर्ण है ॥ ५१ ॥

काकिनीसदृशीं मत्तां पूर्णान्तः करणोद्यताम्[१] ।
सर्वाऽलङ्कारभूषाढ्यां परिवारगणावृताम् ॥ ५२ ॥
तद्दक्षिणे पार्श्वभागे [२]चिन्तयेत्त्वामलिङ्गकम् ।
सुवर्णशुद्धसङ्काशं निर्मलं चारुतेजसम् ॥ ५३ ॥

वह भी काकिनी के समान मस्ती से भरी हुई हैं, अन्तःकरण में परिपूर्ण है, सभी अलङ्कारों से भूषित तथा अपने परिचारक वर्गों से घिरी हुई हैं । उस पीठ शक्ति के दक्षिण भाग में बिना किसी विशेष लिङ्ग वाले आप सदाशिव का साधक को ध्यान करना चाहिए । वहाँ आप शुद्ध सुवर्ण के सदृश देदीप्यमान शरीर वाले, निर्मल तथा महान् तेजोमय हैं ॥ ५२-५३ ॥

महालक्ष्मीप्रियानन्दं सर्वाकारं निरञ्जनम् ।
ज्ञानयोगोदयं ब्रह्मरूपिणं बहुरूपिणम् ॥ ५४ ॥
प्रदीपकलिकाकारं चिन्तयेदीश्वरं शिवम् ।
एतेषां ज्ञानमाकृत्य[३] वागीशो भवति क्षणात् ॥ ५५ ॥

आप महालक्ष्मी के प्रिय, आनन्द स्वरूप, सर्वाकार तथा निरञ्जन हैं, ज्ञान तथा योग के उदीयमान स्वरूप हैं, ब्रह्मस्वरूप तथा बहुत रूपों वाले हैं । ऐसे प्रदीप की कली के समान आकार वाले आप ईश्वर सदाशिव का साधकों कं ध्यान करना चाहिए ॥ ५४-५५ ॥

वाक्यसिद्धिं[४] तत्र नाथ चिन्तयेत् प्रसिद्धये ।
तत्र भानोर्मण्डलञ्च चिन्तयेत् साधकाग्रणीः ॥ ५६ ॥
पद्मकिञ्जल्कमध्ये तु चिन्तयेदरुणायुतम् ।
मासैकसाधनादेव योगी स्याच्छीतलाङ्गधृक् ॥ ५७ ॥

हे नाथ ! वहाँ अपने को प्रसिद्ध करने के लिए वाक्य सिद्धि की अभिलाषा करनी चाहिए । वहीं साधकाग्रणी सूर्यमण्डल का भी ध्यान करे । वहीं उस कमल के केशर के मध्य में एक मास तक अयुत (दश हजार) अरुण से युक्त सूर्य के ध्यान की साधना करने से योगी शीतल शरीर वाला हो जाता है ॥ ५६-५७ ॥

द्विमासे ग्रन्थिभेदः [५]स्यादनन्तगुणवान् भवेत् ।
त्रिमासे[६] योगयोग्यः स्यात् सर्पादिविषनाशकृत् ॥ ५८ ॥

---

१. पूर्वान्तः—ख० ।

२. बाण—ख० ।—बाणलिङ्गं नार्मदं लिङ्गम्, तस्य चिन्ता कार्या, वामलिङ्गकमिति पाठे तु वामं सुन्दरं यल्लिङ्गं तस्य चिन्तेत्याद्यर्थः ।

३. ध्यानम्—ख० ।

४. राज्यसिद्धिम् ..... नाथम्—ख० ।

५. अत्यन्तगुणवान्—ख० ।

६. साधको—ख०, सर्वादि इति—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चतुर्मासे निर्मलात्मा भावकः स्थिरमानसः ।
पञ्चमे मासि सम्प्राप्ते वायवी कृपयान्विता ॥ ५९ ॥
स्थिरवायुः स्थिरा [1]दृष्टिरतीव सुखसम्पदः ।
ततो दिने दिने वृद्धिर्वायूनामनुकम्पया ॥ ६० ॥

दो महीना पर्यन्त ध्यान करने से हृदय ग्रन्थि टूट जाती है तथा साधक अनन्त गुण सम्पन्न हो जाता है । तीन महीना पर्यन्त ध्यान करने से योग की योग्यता प्राप्त होती है तथा वह सर्पों के विष को नाश करने वाला बन जाता है । चार मास पर्यन्त ध्यान करने से साधक निर्मलात्मा, भावना में निपुण तथा स्थिर चित्त वाला हो जाता है । पाँचवें महीने में उस पर वायु की कृपा होने लगती है । वह स्थिर वायु वाला तथा स्थिर दृष्टि से सम्पन्न हो जाता है । सुख सम्पत्ति प्राप्त करने लग जाता है । इस प्रकार वायु की अनुकम्पा प्राप्त हो जाने पर साधक की दिन प्रतिदिन वृद्धि होने लगती है ॥ ५८-६० ॥

षण्मासात् पापसंत्यक्तो मुक्तवद् भ्रमते चिरम् ।
जले चाग्नौ च भूगर्ते कदाचिन्न म्रियेत हि ॥ ६१ ॥
ईश्वरात्मा महाज्ञानी निःशङ्को [2]निरुपद्रवः ।
महाविवेकसिद्धान्तज्ञानी [3] भेदविवर्जितः ॥ ६२ ॥

छः महीना पर्यन्त ध्यान करने से पाप से मुक्ति हो जाती है तथा साधक मुक्त के समान सर्वत्र लोकों में भ्रमण करता है, वह जल, अग्नि तथा पाताल में कहीं भी नहीं मरता । वह ईश्वरात्मा, महाज्ञानी, निःशङ्क तथा उपद्रव से रहित हो जाता है । महाविवेक के सिद्धान्त में ज्ञानी तथा समदृष्टि वाला हो जाता है ॥ ६१-६२ ॥

स भूत्वा चिरजीवी च [4]भुक्तिभागी दिने दिने ।
सप्तमे कल्पसन्त्यक्तो मदनो [5]दोषविग्रहः ॥ ६३ ॥
नित्यानन्दगुणप्राप्तिर्भूमित्यागो दिने दिने ।
अष्टमे सर्वशत्रुघ्नो [6]रामनामविवर्जितः ॥ ६४ ॥

वह चिरञ्जीवी होकर प्रतिदिन उत्तमोत्तम भोगों का भोग करता है । सात मास के अभ्यास से वह विकल्प रहित तथा निर्दोष शरीर होकर काम के समान कमनीय कलेवर वाला बन जाता है । आठ महीने ध्यान के अभ्यास से साधक नित्य आनन्द के गुणों को प्राप्त करता है तथा पृथ्वी पर पैर नहीं रखता अपने समस्त शत्रुओं का विनाश कर देता है, यद्यपि उसका 'राम' नाम नहीं होता ॥ ६३-६४ ॥

अणिमादिदर्शनञ्च ब्रह्मगोविन्ददर्शनम् ।
नवमे क्षालनासिद्धिर्भूमित्यागस्त्रिहस्तकः [7] ॥ ६५ ॥

---

१. त्वतीव सुखसम्पदाम्—ख० ।
२. निरुपद्रवः—ख० ।
३. सिद्धिस्तु—ख० ।
४. मुक्तिभागी—क० ।
५. मदनोपमः—ख० ।
६. वाञ्छानाशविवर्जितः—ख० ।
७. पञ्चभूतमयाङ्गधृक्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दशमे[१] योगसिद्धिश्च षट्चक्रादिप्रदर्शनम् ।
ब्रह्मरन्ध्रभेदनज्ञो महाआनन्दविग्रहः ॥ ६६ ॥

उस साधक को अणिमादि सिद्धियों का दर्शन होने लगता है । केवल इतना ही नहीं उसे ब्रह्म तथा गोविन्द का साक्षात्कार होने लगता है । नौ मास के अभ्यास से उसे क्षालना सिद्धि होती है तथा वह भूमि त्याग कर ऊपर तीन हाथ आकाश पर वास करने लग जाता है । दश मास के अभ्यास से योग सिद्धि तथा षट्चक्रों का दर्शन प्राप्त होने लगता है, उसे ब्रह्मरन्ध्र (शिरः स्थित ब्रह्मरन्ध्र) के भेदन का ज्ञान हो जाता है, वह साधक महान् तथा आनन्दमय हो जाता है ॥ ६५-६६ ॥

एकादशे सर्वसिद्धिः पञ्चभूतमयाङ्गधृक् ।
सप्तस्वर्गालोकनञ्च षट्शिवप्रियदर्शनम् ॥ ६७ ॥
द्वादशे देवसन्मानं देवता-पाददर्शनम् ।
अत्यन्तं सुखसन्तानं मायाजालनिवारणम् ॥ ६८ ॥

ग्यारह मास पर्यन्त ध्यान के अभ्यास से उस साधक को सारी सिद्धियाँ प्राप्त होने लगती हैं, वह पञ्चभूतमय अङ्ग (पृथ्वीरूप, जलरूप, अग्निरूप, वायुरूप, आकाशरूप) को अलग-अलग धारण करने में समर्थ हो जाता है, उसे सातों स्वर्ग दिखाई पड़ने लग जाते हैं तथा षट्शिव का दर्शन प्राप्त होने लगता है । बारह मास के ध्यान के अभ्यास से देवताओं द्वारा सम्मान की प्राप्ति, देवता के चरणों का दर्शन, अत्यन्त सुख, संतान तथा माया जाल से निवृत्ति हो जाती है ॥ ६७-६८ ॥

सर्वविद्यासर्वसिद्धिर्दिव्यभक्तिः[२] शुभोदया ।
ते वीरास्ते च योगीन्द्रास्ते दिव्यास्ते च भैरवाः ॥ ६९ ॥

इस प्रकार से ध्यान करने वाला सभी महाविद्याओं, सभी सिद्धियों तथा दिव्य भक्ति को प्राप्त कर लेता है, उसके कल्याण का उदय हो जाता है, वही घोर है, वही योगीन्द्र है और वही भैरव है ॥ ६९ ॥

ते सर्वे मृत्युजेतारस्ते[३] भक्ता मुक्तिभागिनः ।
ये तिष्ठन्ति महारण्ये निर्जने पर्वते चिरम् ॥ ७० ॥
धारयन्ति साधयन्ति योगमेतत् कुलेश्वर ।
योगे[४] योगाद् भवेन्मोक्ष इति मे तत्त्वनिर्णयः ॥ ७१ ॥

ऐसे ही लोग मृत्यु को जीतने वाले भगवद्भक्त मुक्ति के भागी होते हैं । हे कुलेश्वर ! जो लोग घनघोर अरण्य में, सर्वथा निर्जन स्थान में तथा पर्वत पर चिरकाल पर्यन्त निवास

---

१. दशमे इत्यतो मयाङ्गधृगिति पर्यन्तं—ख० पु० नास्ति ।
२. सर्वा विद्याश्चतुर्दशसंख्याकाः, सर्वाः सिद्धयः यस्यां सा दिव्यभक्तिः शुभोदयकरी इति यावत् ।
३. मृत्युगोप्तार—ख० । ४. योगयोगाद्.....तत्त्वस्य निर्गमः—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

करते हैं वही इस प्रकार के योग को धारण करने में समर्थ होते हैं, योग में युक्त होने से ही मोक्ष होता है, ऐसा मेरा यथार्थ निर्णय है ॥ ७०-७१ ॥

संसारोत्तारणे[१] मुक्तिर्योगशब्देन कथ्यते ।
लोके हि दुर्लभं योगं योगात्परतरं नहि ॥ ७२ ॥

ससार सागर से पार उतर जाना ही योग शब्द का अर्थ है । अ ।: इस लोक में योग सर्वथा दुर्लभ है, योग से परे और कुछ नहीं है ॥ ७२ ॥

योगं पञ्चविधं प्रोक्तमेकं विषयसम्मतम् ।
द्वितीयञ्च द्विभेदञ्च पूजायोगं तृतीयकम् ॥ ७३ ॥
भक्तियोगं परं ब्रह्मयोगसारं कुलेश्वर ।
सर्वत्रापि मनोयोगाद्[२] बद्धो मुक्तो भवेद् ध्रुवम् ॥ ७४ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे
षट्चक्रप्रकाशे भैरवभैरवीसंवादेऽनाहतपद्मविन्यासो
नाम [३]षट्पञ्चाशत्तमः पटलः ॥ ५६ ॥

— ❖ —

योग पाँच प्रकार का कहा गया है । विषयों से संयुक्त होना प्रथम योग है, द्वित्व का भेद करना अर्थात् सब में एक समान बुद्धि रखना द्वितीय योग है । तृतीय योग का नाम पूजा योग है । हे कुलेश्वर ! इसके बाद भक्तियोग चौथा योग है और इसके बाद पाँचवाँ ब्रह्मयोग है । सभी प्रकार के योगों में मन को संयुक्त करने से बद्ध जीव निश्चित रूप से मुक्त हो जाता है ॥ ७३-७४ ॥

॥ श्रीरुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन में सिद्धमन्त्रप्रकरण में षट्चक्रप्रकाश में भैरवीभैरवसंवाद में अनाहतपद्मविन्यास नामक छप्पनवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ५६ ॥

— ❖ —

---

१. संसारोत्तारणात्—ख० ।

२. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्र ..... सप्तपञ्चाशत्तमः पटलः ।

३. मनसो योगो वृत्तिनिरोधः, तस्मांद् बद्धो भवति, यदि सांसारिकं विषयमाधृत्य मनोयोगो विधीयते । यदि तु परमेशस्वरूपे योगः क्रियते, तदा मोक्षः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ सप्तपञ्चाशत्तमः पटलः

श्रीआनन्दभैरवी उवाच

अथातः सम्प्रवक्ष्यामि विवेकगुणलक्षणम् ।
वर्णध्यानानन्तरं हि पूजनं तन्महाफलम्[1] ॥ १ ॥

श्री आनन्दभैरवी ने कहा—हे महाभैरव ! अब विवेक के गुण का लक्षण कहती हूँ । वर्णध्यान (द्र० ५६. २१-३२) के अनन्तर काकिनी पूजन महान् फलदायक होता है ॥ १ ॥

पूजया लभते पूजां विवेकं भावसम्भवम् ।
काकिनीश्वरसंयोगं भावं परमदुर्लभम् ॥ २ ॥

पूजा करने से अपनी भी पूजा प्राप्त होती है । विवेक तो भाव से उत्पन्न होता है, अतः काकिनी और ईश्वर के एकत्र योग में भावना करनी चाहिए जो परम दुर्लभ है ॥ २ ॥

यजनं काकिनीदेव्या ईश्वरस्यापि भावनम् ।
पूजाभावे महासिद्धिर्जायते तत्क्षणाच्छिव ॥ ३ ॥

काकिनी देवी तथा ईश्वर का एकत्र भावन (ध्यान) ही यजन है । हे शिव ! यदि पूजा न भी की जाय तो उनमें भावना मात्र से तत्क्षण महासिद्धि प्राप्त हो जाती है ॥ ३ ॥

भावेन लभ्यते पूजा विवेकं पूजया लभेत् ।
विवेकं[2] ब्रह्मभावं तु प्राप्नोति कोटिजन्मनि ॥ ४ ॥
अथवा लभ्यते शीघ्रं तवापि मदनुग्रहैः ।
तत्प्रकारं शृणु प्राणवल्लभ त्रिपुरेश्वर ॥ ५ ॥
यस्य विज्ञानमात्रेण भवेत् परमभावकः ।

ब्रह्मभाव से पूजा में प्रवृत्ति होती है, पूजा से विवेक का लाभ होता है और हमारा ही विवेक है जो करोड़ों जन्म में प्राप्त होता है, अथवा आपके अनुग्रह को प्राप्त करने पर शीघ्रता से ब्रह्मभाव प्राप्त हो जाता है, हे त्रिपुरेश्वर ! हे प्राणवल्लभ ! अब उसका प्रकार सुनिए, जिसके जान लेने मात्र से साधक परमभावुक हो जाता है ॥ ४-६ ॥

विचिन्तयेद्वर्णपार्श्वे चतुर्दिक्षु क्रमेण तु ॥ ६ ॥
सिद्धेश्वरान् योगयुक्तान् महापुरुषसंश्रितान्[3] ।

---

१. महत्फलम्—ख० ।
२. विवेकब्रह्माभावस्तु—ख० ।
३. संज्ञितान्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्रह्माणं परमं हंसं रुद्रं विश्वेश्वरं प्रभुम् ॥ ७ ॥

साधक वर्णों के पार्श्वभाग में चारो दिशाओं में क्रमशः इस प्रकार ध्यान करे । सिद्धेश्वरों का, जो योग से युक्त है, महापुरुषों का आश्रय लेने वालों का, ब्रह्मा का, परमहंसों का, रुद्र का तथा विश्वेश्वर प्रभु का ध्यान करे ॥ ६-७ ॥

मृत्युञ्जयं[१] महाकालं नीलकण्ठं सुरेश्वरम् ।
श्रीविष्णुं कमलानाथं पञ्चचूडं कुमारकम् ॥ ८ ॥

मृत्युञ्जय, महाकाल, नीलकण्ठ, सुरेश्वर, कमलानाथ, श्रीविष्णु पञ्चचूड़ा (शङ्कर) एवं कार्तिकेय का ध्यान करे ॥ ८ ॥

चन्द्रं सूर्यं [२]प्रजानाथं दक्षं मुनीन्द्रमेव च ।
प्रचेतसं[३] मरीचिञ्च कश्यपं पुलहं तथा ॥ ९ ॥

वह साधक चन्द्रमा, सूर्य, प्रजापति, दक्ष, मुनीन्द्र, प्रचेता, मरीचि, कश्यप तथा पुलह का ध्यान करे ॥ ९ ॥

वशिष्ठञ्च भृगुञ्चैव गौतमं कपिलं मुनिम् ।
पुलस्त्यञ्च क्रतुञ्चैव प्रह्लादं कर्दमं तथा ॥ १० ॥

साधक वशिष्ठ, भृगु, गौतम, कपिलमुनि, पुलस्त्य, क्रतु, प्रहलाद तथा कर्दम का ध्यान करे ॥ १० ॥

अथर्वाङ्गिरसर्षिञ्च[४] बालखिल्यान् मरीचिपान् ।
मानसञ्चान्तरीक्षञ्च[५] विद्याश्च पवनं विभुम् ॥ ११ ॥

अथर्वा, अंगिरा ऋषि, मरीचि का पान करने वाले बालखिल्यों का, ब्रह्मदेव के मानस पुत्रों का, अन्तरिक्ष का, विद्या का तथा सर्वत्र व्यापक पवन देव का ध्यान करें ॥ ११ ॥

तेजसञ्च जलञ्चैव महीस्पर्शञ्च शब्दकम् ।
तथा रूपं रसं गन्धं प्रकृतिञ्च विकारकम् ॥ १२ ॥

तेज, जल, मही, स्पर्श, शब्द, रूप, गन्ध (पञ्च तन्त्राओं का), प्रकृति का तथा उसके समस्त विकारों का ध्यान करे ॥ १२ ॥

यच्चान्यत् कारणं सर्वं [६]भुवाक्षयं चराचरम् ।
तत्पार्श्वगामिनो देवा सेन्द्रा [७]भ्रमन्ति नित्यशः ॥ १३ ॥

---

१. मृत्युं जयति इति मृत्युञ्जयः, 'संज्ञायां मृतृवृजिधारिसहितपिदमः' इति सूत्रेण खच्प्रत्ययः । 'अरुर्द्विषदजन्तस्य मुम्' इति मुम् ।

२. प्रभानाथम—ख० ।

३. प्रचेतारम्—क० ।

४. अङ्गिरसञ्चैव—ख० ।

५. मानसाश्चान्तरीक्षाश्च—ख० ।

६. भवाक्षय—ख० ।

७. सम्भान्ति—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इसके अतिरिक्त सृष्टि के जो अन्य कारण हैं उनका तथा पृथ्वी पर रहने वाले समस्त चराचर का ध्यान करे । उन काकिनी देवी के चारों ओर नित्य भ्रमण करने वाले इन्द्रादि देवताओं का भी ध्यान करना चाहिए ॥ १३ ॥

अगस्त्यश्च महातेजा मार्कण्डेयश्च वीर्यवान् ।
यमदग्निर्भरद्वाजः [1]संवर्तश्च्यवनस्तथा ॥ १४ ॥

महातेजस्वी अगस्त्य, वीर्यवान् मार्कण्डेय, यमदग्नि, भरद्वाज, संवर्त तथा च्यवन ऋषियों का भी ध्यान करना चाहिए ॥ १४ ॥

दुर्वासाश्च महाभाग ऋष्यशृगंश्च धार्मिकः ।
सनत्कुमारो भगवान् योगाचार्यो महातपाः ॥ १५ ॥

महाभाग्यवान् दुर्वासा, परम धार्मिक शृङ्गी ऋषि, भगवान् सनत्कुमार तथा महातपस्वी योगाचार्य का ध्यान करना चाहिए ॥ १५ ॥

असितो देवलश्चैव जैगीषव्यश्च तत्त्ववित् ।
ऋषभार्जितशक्रश्च [2] महावीर्यस्तथा मणिः ॥ १६ ॥

असित, देवल, तत्त्ववेत्ता जैगीषव्य, ऋषभ, अर्जित, शक्र और महावीर्यवान् मणि का ध्यान करना चाहिए ॥ १६ ॥

आयुर्वेदं [3] तथाष्टाङ्गमेते भान्ति स्वमूर्तयः ।
चन्द्रमाः सह नक्षत्रैरादित्यैश्च गभस्तिभिः ॥ १७ ॥

अष्टाङ्ग आयुर्वेद ये सभी मूर्तिमान् रूप से तथा नक्षत्रों के सहित चन्द्रमा और किरणों के सहित द्वादशादित्य का ध्यान करे ॥ १७ ॥

वायव ऋतवश्चैव सङ्कल्पः प्राण एव च ।
मूर्तिमन्तो महात्मानो महाव्रतपरायणाः ॥ १८ ॥

४९ वायु, ६ ऋतुयें, सङ्कल्प और पञ्च प्राण—ये सभी महात्मा जो मूर्तिमान् रूप से महाव्रत परायण हैं उनका ध्यान करे ॥ १८ ॥

एते चान्ये च बहव ईश्वरं समुपासते ।
एते पार्श्वे चिन्तनीया वर्णानां साधकोत्तमैः ॥ १९ ॥

ये तथा और अन्य बहुत से देवता गण ईश्वर की उपासना करते हैं । अतः उन-उन वर्णों के पार्श्वभाग में श्रेष्ठ साधकों को उनका ध्यान करना चाहिए ॥ १९ ॥

---

१. सर्वाभ्य—क० ।

२. शत्रुश्च—ख० ।

३. आयुर्वेदमित्यतः परायणाः पर्यन्तं—ख० पुस्तके नास्ति ।—अष्टावङ्गानि यस्मिन् स तम् । आयुः वेदयति प्रापयति ज्ञापयति वा इति आयुर्वेदः, तम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्पार्श्वस्थः प्रभाकोटिधारकः प्रतिभाति च ।
अर्थो[१] धर्मश्च कामश्च हर्षो द्वेषस्तथा दमः ॥ २० ॥
तत्र गन्धर्वमुख्याश्च सहिताप्सरसस्तथा ।
विंशतिः सप्त चैवान्ये लोकपालाश्च सर्वशः ॥ २१ ॥
शुक्रो बृहस्पतिश्चैव बुधोऽङ्गारक एव च ।
शनैश्चरश्च राहुश्च ग्रहाः सर्वे तथैव च ॥ २२ ॥
मन्त्रो रथन्तरश्चैव [२]हविष्मान् वसुमानपि ।
आदित्याः साधिराजानो नानावृन्दैरुपासिताः[३] ॥ २३ ॥

इतना ही नहीं उन वर्णों के पार्श्वभाग में करोड़ों प्रभाधारी सूर्य के समान तेजस्वी अर्थ, धर्म, काम, हर्ष, द्वेष, दम इसके अतिरिक्त २७ मुख्य मुख्य गन्धर्व, सात अप्सरायें तथा सभी लोकपाल, शुक्र, बृहस्पति बुध, मङ्गल, शनैश्चर, राहु एवं केतु आदि सभी ग्रह, मन्त्र, रथन्तर, साम, हविष्मान् (अग्नि), वसुमान् अधिराजों के सहित समस्त आदित्य ये सभी अनेक वृन्दों के द्वारा उपासित हैं ॥ २०-२३ ॥

मरुतो विश्वकर्मा च वसवश्च कपालिनः ।
तथा पितृगणाः सर्वे सर्वाणि च हवींष्यथ ॥ २४ ॥
ऋग्वेदः सामवेदश्च यजुर्वेदस्तथा विधिः[४] ।
अथर्ववेदश्च तथा सर्वशास्त्राणि चैव हि ॥ २५ ॥
इतिहासोपदेशश्च वेदाङ्गानि च सर्वशः ।
ग्रहा यज्ञाश्च[५] सोमाश्च दैवतानि च सर्वशः ॥ २६ ॥
सावित्री तारिणी[६] दुर्गा वाणी सप्तविधा तथा ।
मेधा धृतिः स्मृतिश्चैव प्रज्ञा बुद्धिर्यशः क्षमा ॥ २७ ॥
सामानि श्रुतिशास्त्राणि गाथास्तु विविधास्तथा ।
भाष्याणि तर्कयुक्तानि देहवन्ति विभान्ति च ॥ २८ ॥

मरुद्गण, विश्वकर्मा, अष्टवसु, कपालधारी भैरव, सभी पितृगण, सभी प्रकार की हवियाँ, ऋग्वेद, सामवेद, यजुर्वेद, विधि अर्थात् चार प्रकार की विधियाँ (१. उत्पत्ति, २. अधिकार, ३. विनियोग और ४. प्रयोग), अथर्ववेद, सभी शास्त्र (अर्थात् सांख्य, योग, न्याय, वैशेषिक, मीमांसा, वेदान्त तथा धर्मशास्त्र), इतिहास (रामायण, महाभारत), उपदेश (धर्मशास्त्र), वेदाङ्ग (१. शिक्षा, २. कल्प, ३. व्याकरण, ४. निरुक्त, ५. छन्द और

---

१. अर्थो धर्मश्चेत्यत एव चेति पर्यन्तं श्लोकद्वयं ख० पुस्तके नास्ति ।
२. हविमान्—क० ।
३. उपागताः—ख० ।
४. निधिः—क० ।
५. ग्रहा यज्ञश्च—क० ।
६. सावित्री दुर्गतरिणी—क० ।—तारिणीति पाठे तारयति या सा इति विग्रहे णिनिर्बाहुलकात् । दुर्गतरिणी इति पाठे तु दुर्गस्य संसारस्य तरणे तरिणी नौका इति यावत् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

६. ज्योतिष), ग्रह यज्ञ (सोमादि), सभी दैवत, सावित्री, तारिणी, दुर्गा, सात प्रकार की वाणी, मेघा, धृति, स्मृति, प्रज्ञा, बुद्धि, यश, क्षमा, अनेक प्रकार के साम, श्रुति शास्त्रादि, नाना प्रकार की गाथायें और तर्क से युक्त अनेक प्रकार के भाष्य—ये सभी देह धारण कर काकिनी तथा ईश्वर के सन्निधान में निवास करते हुए शोभा प्राप्त करते हैं ॥ २०-२८ ॥

नाटिका विविधाः कार्याः[१] कथाख्यायिककारिकाः ।
अत्र तिष्ठन्ति ये पुण्या ये पुण्या गुरुपूजकाः ॥ २९ ॥

अनेक प्रकार की नाटिकायें, कथायें, आख्यायिकायें, कारिकायें तथा सभी पुण्यात्मा लोग एवं पुण्यात्मा गुरुपूजक लोग उनके सन्निधान में निवास करते हैं ॥ २९ ॥

क्षणा लवा मुहूर्ताश्च दिवारात्रिश्च सर्वतः ।
अर्धमासास्तथामासाः ऋतवः षट् च शङ्कर ॥ ३० ॥
संवत्सराः [२]पञ्चयुगं मासा रात्रिश्चतुर्विधा ।
कालचक्रञ्च यद्दिव्यं नित्यमक्षयमव्ययम् ॥ ३१ ॥
धर्मचक्रस्तथा चापि नित्यमास्ते महेश्वर ।

हे शङ्कर! क्षण, लव, मूहूर्त, दिन, रात्रि, अर्धमास (पक्ष), मास, छः ऋतुयें, पाँचों संवत्सर, मास, चार प्रकार की रात्रि, दिन, देवताओं का नित्य तथा अक्षय एवं अव्यय कालचक्र, धर्मचक्र, हे महेश्वर ! वहाँ पर ये सभी विग्रह धारण कर नित्य स्थित रहते हैं ॥ ३०-३२ ॥

अदितिश्च[३] दितिश्चैव रुद्रश्च विनता तथा ॥ ३२ ॥
कालिका [४]युवती देवी सुरसा चाथ गौतमी ।
प्राधा[५] कद्रुश्च वै देव्यो देवतानाञ्च मातरः ॥ ३३ ॥
रुद्राणी श्रीश्च लक्ष्मीश्च भद्रा षष्ठी तथा परा ।
पृथिवीसञ्ज्ञिता देवी ह्रीः स्वाहा कीर्ति रेव च ॥ ३४ ॥
सुरा देवी शची चैव तथा पुष्टिररुन्धती ।
संसिद्धि[६] सिद्धिदा विद्या महादेवी रतिस्तथा ॥ ३५ ॥
एताश्चान्याश्च वै देव्य उपतस्थुरलङ्कृताः ।

अदिति, दिति, रुद्र, विनता, कालिका, सुरभी, देवी, सुरसा, गौतमी, प्राधा, कद्रू सभी

---

१. नाटका विविधा काव्या कथाख्यायिककारिकाः—क० ।
२. पञ्चयुग्मं—ख० ।
३. अदितिदिखतिर्दनुश्चैव सुरसा विनता इव—क० ।—दो—धातुरवखण्डने, ततः क्तिन्प्रत्ययः, न दितिरदितिखण्डिता, स्वविचारे विचला न भवति । दितिस्तु खण्डिता, मध्ये मध्ये स्वविचारं खण्डयति ।
४. सुरभी देवी शर्मा—ख० ।
५. एताश्चान्याश्च—ख० ।
६. संसिद्धिर्वासा नियतिर्विडीदेवीरतिस्तथा—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

देवियाँ तथा देवमाताएं, रुद्राणी, श्री, लक्ष्मीं, भद्रा, षष्ठी, परा देवी, पृथ्वी संज्ञा से प्रसद्धि देवी, ह्रीं देवी, स्वाहा, कीर्ति, सुरादेवी, शची, पुष्टि, अरुन्धती, संसिद्धि, सिद्धिदा, महाविद्यायें महादेवियाँ रति ये लोग तथा इनके अतिरिक्त अन्य देवियाँ सज-धज कर उन काकिनी सहित ईश्वर की उपासना करती हैं ॥ ३२-३६ ॥

आदित्यावसवो रुद्रा मरुतश्चाश्विनावपि ॥ ३६ ॥
विश्वेदेवाश्च साध्याश्च पितरश्च महर्षयः ।
राजर्षयस्तत्र भान्ति हरिश्चन्द्रादयः प्रभो ॥ ३७ ॥

हे प्रभो ! द्वादशादित्य, अष्टवसु, एकादश रुद्र, ४९ मरुद्गण, दोनों अश्विनी कुमार, विश्वेदेवगण, साध्य, पितृगण, सप्त महर्षिगण, हरिश्चन्द्रादि राजर्षि उन काकिनीश्वर के सन्निधान में शोभा पाते हैं ॥ ३६-३७ ॥

सर्वे हेमकुण्डलिनः सर्वाऽलङ्कारभूषिताः ।
भावुका गीतवाद्यादि [1]निस्वनैर्मग्नदेहिनः ॥ ३८ ॥
भावयन्ति महेशानीं काकिनीं परमेश्वरीम् ।
वर्णरूपां नित्यकलां महेश्वरपतिव्रताम् ॥ ३९ ॥
ईश्वरं भावयन्त्येते पूजयन्ति निरन्तरम् ।

उक्त सभी (देव देवियाँ अप्सरायें, महाविद्यायें तथा कालचक्रादि) हेम निर्मित कुण्डल धारण किए हुए, सभी प्रकार के अलङ्कारों से विभूषित, भाव में विभोर होकर गीत वाद्य आदि के शब्दों के साथ, शरीर का भाव छोड़कर महेशानी, काकिनी परमेश्वरी, वर्णस्वरूपादेवी, नित्यकला से युक्त महेश्वर की पतिव्रता उन काकिनी की तथा महेश्वर की भावना करते हैं तथा निरन्तर पूजा भी करते हैं ॥ ३८-४० ॥

वेष्टिताः सुन्दराकाराः [2] अष्टसिद्धिसमृद्धिदाः [3] ॥ ४० ॥
एताः पूज्या महाकाल वर्णपार्श्वचराः प्रभाः [4] ।

हे महाकाल ! (काकिनी के ककारादि) वर्णों के पार्श्व में रहने वाले उक्त सभी तेजस्वी देवी और देवताओं की पूजा करनी चाहिए । ये सभी सुन्दर स्वरूप धारण कर काकिनी और ईश्वर को वेष्टित (घेरकर) स्थित हैं तथा आठों प्रकार की सिद्धि एवं समृद्धि को देने वाले हैं ॥ ४०-४१ ॥

प्रसीद नाथ स्वामीति नाम्ना मनसि पूजयेत् ॥ ४१ ॥
'वर्णेश्वर प्रियानन्दां काकिनीं पूजयाम्यहम्'।

---

१. विश्व—क० ।—गीतं वाद्यमादिर्यस्य तादृशैः निस्वनैर्मग्ना देहिना । आनन्दसागरे निमग्ना भवन्ति, विलक्षणगीतादिश्रवणेनेति भावः ।

२. सुन्दरकराः—क० ।

३. समृद्धिदा—क० ।

४. प्रभो—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इति मन्त्रेणैव[१] पूज्या वर्णरूपा सरस्वती ॥ ४२ ॥
तदा प्रसन्नाः सिद्ध्यन्ति श्रीकाकिन्याः कलौ युगे ॥ ४३ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादे काकिनीश्वरवर्णपार्श्वे[२]चरयजनं नाम सप्तपञ्चाशत्तमः[३] पटलः ॥ ५७ ॥

— ❖ —

ईश्वर की पूजा, 'हे नाथ ! हे स्वामिन् ! प्रसन्न होईए', ऐसी भावना कर साधक को मन में पूजा करनी चाहिए । फिर 'वर्णेश्वर प्रियानन्दां काकिनीं पूजयाम्यहम्' इस मन्त्र से वर्णरूपा सरस्वती की पूजा करनी चाहिए । ऐसा करने से सभी काकिनी देवियाँ प्रसन्न हो कर सिद्ध होती है ॥ ४२-४३ ॥

॥ श्रीरुद्रयामल के उत्तर तन्त्र में महातन्त्रोद्दीपन में सिद्धमन्त्र प्रकरण में षट्चक्र प्रकाश में भैरवी भैरव संवाद में काकिनी ईश्वरवर्ण पार्श्वचरयजन नामक सत्तावनवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ५७ ॥

— ❖ —

१. वै पूज्या—ख० ।
२. पर्णपार्श्व—इति सं० पुस्तके पाठः ।
३. अष्टपञ्चाशत्तमः पटलः—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथाष्टपञ्चाशत्तमः पटलः

श्रीआनन्दभैरवी उवाच

काकिनीसिद्धिसाधनवर्णनम्

अथाष्टसिद्धिमाहात्म्यं शृणु श्रीचन्द्रशेखर ।
मन्त्रोद्धारं तथा न्यासं कवचाङ्ग तव प्रियम् ॥ १ ॥
स्तोत्रं सहस्रनामाख्यं साष्टोत्तरमनुप्रियम् ।
साकारध्यानमखिलं सालोक्यादिपदप्रदम् ॥ २ ॥

श्री आनन्दभैरवी ने कहा—हे चन्द्रशेखर! अब अष्टाङ्गसिद्धि का माहात्म्य, काकिनी देवी का मन्त्रोद्धार, न्यास, आपको प्रिय लगने वाले कवच, उसके अङ्गभूत न्यास, अष्टोत्तर सहस्रनाम वाला स्तोत्र, काकिनी के प्रिय मन्त्र तथा सालोक्यादि मुक्ति देने वाले उनके सब प्रकार के साकार रूप का ध्यान कहती हूँ, उसे सुनिए ॥ १-२ ॥

यस्य [१]करणमात्रेण [२]सुरो भवति मानुषः ।
वृक्षबीजाद् भवेद् वृक्षः श्रद्धयाश्च फलोदयः ॥ ३ ॥
तथा तथैव मन्त्राणामुदयो बीजयोगतः ।
बीजं तु परमं ज्ञानं बीजाधीनं चराचरम् ॥ ४ ॥

जिसके अनुष्ठान करने मात्र से मनुष्य साक्षात् देवता बन जाता है । जिस प्रकार वृक्ष के बीज से वृक्ष की उत्पत्ति होती है, (वैसे ही मन्त्र एवं देवता में) श्रद्धा से फल की उत्पत्ति होती है । उसी प्रकार बीज के योग से मन्त्रों की उत्पत्ति होती है । इस प्रकार बीज ही सर्वोत्तम ज्ञान है और यह सारा चराचर जगत् बीज से ही उत्पन्न हुआ है ॥ ३-४ ॥

बीजमाश्रित्य सर्वेन्द्राः प्रतिभान्ति महौजसः ।
कोटिसूर्यप्रतीकाशाः प्राणस्थाननिवासिनः ॥ ५ ॥

सभी इन्द्र (आदि देवता) बीज के आश्रय से अत्यन्त तेजस्वी बन कर शेभित हो रहे हैं । कोई करोड़ों सूर्य के समान भासमान होकर प्राणस्थान में निवास करते हैं ॥ ५ ॥

के चाप्ययुतसूर्याभाः शतसूर्यसमप्रभाः ।
केचिद् द्वादशसूर्याभाः को [३]जनश्चैकभासुराः ॥ ६ ॥

---

१. स्मरण—ख० ।
२. शिवो—ख० ।
३. केऽपि ज्वलत्प्रभाकराः—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कोपि [१]नाम मुनिर्दीप्तः कोपि चन्द्रसमप्रभः ।
कोपि श्रीकान्तिकिरणः शङ्खचक्रगदाधरः ॥ ७ ॥

कोई देव दशहजार सूर्य के समान, कोई सौ सूर्य के समान, कोई १२ सूर्य के समान, कोई मात्र एक सूर्य के समान, कोई मुनि के समान मात्र चमकते हुए, कोई चन्द्रमा के सदृश शीतल प्रकाश युक्त, कोई तो श्री के समान किरणों वाले, कोई देव शंख चक्र गदा धारण किए हुए हैं ॥ ६-७ ॥

एते बीजसमुद्भूता [२]निर्बीजाश्च पञ्चदेवताः ।
ब्रह्मविष्णुशिवानन्दभैरवाः [३] प्राणदेवताः ॥ ८ ॥

ये सभी प्रकार के देवता बीज से ही उत्पन्न हुए हैं । किन्तु १. ब्रह्मा, २. विष्णु, ३. शिव, ४. आनन्दभैरव और ५. प्राणदेवता—इन पाँचों देवताओं की उत्पत्ति बिना बीज के हुई है ॥ ८ ॥

ब्रह्माब्रह्मस्वरूपेण श्वासमार्गप्रवेशकः ।
विष्णुर्वैष्णवतत्त्वेन [४] कुम्भकान्तर्गतः प्रभुः ॥ ९ ॥
शिवः संहाररूपेण महाप्रलयगः प्रभुः ।
आनन्दभैरवः श्रीमान् मूलज्ञानीपरात्परः ॥ १० ॥

ब्रह्मा ब्रह्म के स्वरूप से श्वास मार्ग में प्रविष्ट हैं । विष्णु प्रभु वैष्णवतत्त्व से कुम्भक के भीतर विराजमान हैं । शिव संहार के स्वरूप से सृष्टि का प्रलय करते हैं और श्रीमान् आनन्दभैरव तो मूल के ज्ञाता तथा परात्पर हैं ॥ ९-१० ॥

मूलाम्भोजाद् ब्रह्मरन्ध्रं यावत्तत्र [५]प्रवेशिका ।
प्राणविद्यास्वरूपेण बीजरूपा सनातनी ॥ ११ ॥
सा भाव्या योगिभिर्नित्यं योगाङ्गैरतिभाव्यते ।
योगशास्त्रं विना नाथ के जानन्ति महर्षयः ॥ १२ ॥

मूलाधार से लेकर जहाँ तक ब्रह्मरन्ध्र का स्थान है वहाँ तक प्राणविद्या स्वरूप से प्रवेश करने वाली, सनातनी एवं बीजरूपा प्राणविद्या पाचवीं देवता कही गई हैं । योगी जनों के द्वारा वही नित्य भावना करने के योग्य हैं, वहीं शास्त्रों में योग के अङ्ग के रूप में कही गई हैं । हे नाथ ! उस प्राणदेवता को बिना योग के कौन महर्षि जान सकता है ? ॥ ११-१२ ॥

---

१. नानामनोर्दीप्तिः—ख० ।
२. बीजाश्च—क० ।—निर्गतं बीजं यासां ताः पञ्च देवताः । ब्रह्मा विष्णुः शिवः आनन्दो भैरवश्चेति प्राणापानसमानोदानव्यानाख्यपञ्चप्राणवासुदेवताः ।
३. भैरव इति समस्तपदात्मकः पाठः—ख० पुस्तके ।
४. विष्णुर्वैष्णवतन्त्रेणेति—ख० ।
५. प्रवेशकः—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत्यन्तदुःखसाध्या[1] सा योगिज्ञेया मनोयवा ।
नानारूपा बृहद्रूपा श्वासोच्छ्वासप्रकाशिनी ॥ १३ ॥
हृदयाम्भोजमध्यस्था ईश्वरस्थानवासिनी ।
कालचञ्चुप्रकाशा[2] सा सर्वभूतहृदिस्थिता ॥ १४ ॥

वह अत्यन्त दुःख के साथ साध्य हैं, योगियों द्वारा ज्ञान गम्य हैं, मन के समान वेगवर्ता और चञ्चल हैं । उनके अनेक रूप हैं, उनका स्वरूप भी बृहत् है । वह श्वास तथा उच्छ्वास से प्रकाश करने वाली हैं । वह हृदयकमल (अनाहत चक्र) में रहकर महेश्वर के स्थान में निवास करती हैं । कलाचञ्चु से प्रकाश करने वाली वह सभी के हृदय कमल पर स्थित हैं ॥ १३-१४ ॥

सर्वेषां ज्ञानकर्त्री च सर्वानन्दकरी हृदि ।
सा देवी काकिनी [3]विद्या ईश्वरी परमा कला ॥ १५ ॥
विभाव्या कोटिसूर्याभा कोटिचन्द्रसमानना ।
तस्या मन्त्रं महामन्त्रं ब्रह्ममन्त्रं हि योगिनाम् ॥ १६ ॥

जो सभी को ज्ञान देने वाली एवं हृदय में आनन्द करने वाली हैं वही काकिनी नाम की देवी है, महाविद्या ईश्वरी तथा परमा कला है । अतः सभी को करोड़ों सूर्य के समान प्रकाश करने वाली आह्लाद उत्पन्न करने वाले करोड़ों चन्द्रमा के समान मुख से शोभित उसी काकिनी का ध्यान करना चाहिए । उनका मन्त्र सभी मन्त्रों से उत्तम है । योगीजनों के लिए तो वह ब्रह्ममन्त्र है ॥ १५-१६ ॥

शृणुनाथ कुलानन्द भैरव्यादिमनुं मुदा ।
एतन्मन्त्रप्रभावेण[4] परात्मानं वशं नयेत् ॥ १७ ॥

हे शाक्त सम्प्रदाय को आनन्द देने वाले प्रभो ! अब आप उस भैरवी के आदि मन्त्र को प्रसन्नतापूर्वक सुनिए । इस मन्त्र के प्रभाव से साधक परमात्मा को भी अपने वश में कर लेता है ॥ १७ ॥

दीर्घप्रणवमुच्चार्य वामनेत्रं समुद्धरेत् ।
मायान्ते[5] वाग्भवं बीजं कामबीजं समुद्धरेत् ॥ १८ ॥
कामबीजं तथैश्वर्ये नमोऽन्ते[6] वह्निकामिनी ।
एतन्मन्त्रप्रसादेन भवेत् कालवशः क्षणात् ॥ १९ ॥

दीर्घ प्रणव (आँ ?) का उच्चारण कर वामनेत्र (ई) का उच्चारण करे, फिर माया

---

१. अनन्तसुख—ख० । २. काकचञ्चुप्रकाशा—ख० ।
३. देवीर्ति—ख० ।
४. प्रसादेन—ख० ।—एतस्य मन्त्रस्य भैरवमन्त्रस्य प्रभावेण प्रसादेन वा इति पाठद्वयीयो भावः ।
५. मायानामिति—क० । ६. नमोन्तवह्नि—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बीज (ह्रीं), फिर वाग्भव बीज (ऐं), फिर काम बीजं (क्लीं), पुनः काम बीज (क्लीं), फिर 'ऐश्वर्ये' के बाद 'नमः स्वाहा'—इस मन्त्र की कृपा हो जाने पर तत्क्षण साधक के वश में काल हो जाता है ॥ १८-१९ ॥

विमर्श—(क्लीं) आँ ईं ह्रीं ऐं क्लीं क्लीं ऐश्वर्ये नमः स्वाहा (ऐं) । यह भैरवी का प्रथम मन्त्र है । इसे क्लीं ओर ऐं से सम्पुटित करना चाहिए ॥ १८-१९ ॥

अत्यन्तसुखमाप्नोति[१] भयाज्ञानापहो भवेत् ।
कामेन पुटितं मन्त्रं वाग्भवेनापि वा प्रभो ॥ २० ॥
स्वमन्त्रपुटितं कृत्वा सिद्धिः स्यादचिरादिह ।
अथान्यमन्त्रं वक्ष्यामि [२]सावधानोऽवधारय ॥ २१ ॥

इतना ही नहीं, ऐसा साधक अत्यन्त सुख भी प्राप्त करता है । उसके सब प्रकार के भय तथा अज्ञान दूर हो जाते हैं । हे प्रभो ! यह मन्त्र काम बीज (क्लीं) अथवा वाग्भव (ऐं) के द्वारा सम्पुटित कर जप करने से थोडे ही समय में सिद्धि हो जाती है । इसके अतिरिक्त एक अन्य मन्त्र भी कहती हूँ, हे महाभैरव ! सावधानी से सुनिए ॥ २०-२१ ॥

भद्रकालीं समुद्धृत्य किङ्किणीबीजमुद्धरेत् ।
बालाबीजं[३] समुद्धृत्य माहेश्वर्यै नमो द्विठः ॥ २२ ॥

'भद्रकालीं' पद कहकर किङ्किणी बीज ? का उच्चारण करे, फिर बाला बीज (स्फैं ?) का उच्चारण कर 'माहेश्वर्यै नमः स्वाहा' ऐसा कहे ॥ २२ ॥

केवलं मूलमन्त्रेण पुटितं मूलमन्त्रकैः ।
पूजयेत् परया भक्त्या हृदयाम्भोजमण्डले ॥ २३ ॥

केवल मूलमन्त्र से (द्र०. ५८, १९-२०) अथवा सम्पुटित मूल मन्त्र से साधक अपने हृदयाम्भोज में अत्यन्त भक्ति भाव से उन काकिनी देवी का पूजन करे ॥ २३ ॥

विमर्श—भैरवी का अन्य मन्त्र— .. .. भद्रकाली .. .. माहेश्वर्यै नमः स्वाहा ।

अप्रकाश्यमिमं मन्त्रं सर्वतन्त्रेषु गोपितम् ।
लक्षजपेन सिद्धिः स्याद् हृदयाब्जे [४]स्थरो भवेत् ॥ २४ ॥

यह मन्त्र सभी तन्त्रों में गुप्त रखा गया है, क्योंकि अप्रकाश्य है । इस मन्त्र का एक लाख जप करने से सिद्धि होती है और साधक का मन हृदयाब्ज के अनाहत चक्र में स्थिर हो जाता है ॥ २४ ॥

अकस्माद्दीपकलिकाकारं जीवं[५] प्रपश्यति ।

---

१. अनन्तेति—ख० । २. सावधानावधारयेति—क० ख० ।
३. कलाबीजमिति—ख० । ४. शिवो—ख० ।
५. बीजमिति—ख० ।—दीपस्य कलिकाया आकारो यस्य तादृशं जीवं स्वस्वरूपं प्रपश्यति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ततो भवेन्महायोगी ईश्वरीमन्त्रसाधनात् ॥ २५ ॥

ऐसा साधक अकस्मात् दीप की कलिका के आकार में जीव का दर्शन प्राप्त कर लेता है। फिर तो ईश्वरी मन्त्र के साधन से वह महायोगी भी हो जाता है ॥ २५ ॥

ध्यानं वक्ष्यामि पूजाया गुह्याद् गुह्यतरं परम् ।
ध्यात्वा पाद्यादिभिर्नाथ मनःकल्पितपुष्पकैः ॥ २६ ॥

हे सदाशिव ! अब पूजा में विहित अत्यन्त गोपनीय (श्रीश्वरी काकिनी के) ध्यान को कहूँगी। सर्वप्रथम (काकिनी का) ध्यान करे, फिर उन देवी को पाद्यादि से पूजा कर तथा मानसिक पुष्प समर्पण करे ॥ २६ ॥

पूजयेत्परया भक्त्या मन्त्रध्यानपरायणः ॥ २७ ॥

साधक अत्यन्त भक्ति भाव से युक्त हो कर मन्त्र द्वारा इस प्रकार ध्यान परायण होकर पूजा करे ॥ २७ ॥

श्रीश्वरीकाकिनीध्यानकथनम्

शशधरशतकोटिश्रीमयूखप्रभायाः
या सुरतरुगुणशोभा निर्मला वेदहस्ता ।
अरुणकिरणभाला हारमाला विलोला
हृदयकमलमध्ये श्रीश्वरीं तां भजामि ॥ २८ ॥

जो सैकड़ों करोड़ चन्द्रमा की श्री वाली किरणों की प्रभा से युक्त हैं, जो कल्प वृक्ष के गुणों की शोभा से सम्पन्न हैं, सर्वथा निर्मल एवं वेदों को अपने हाथ में लिए हुए हैं, जिनके मस्तक से लाल किरणें निकल रही हैं तथा जो हार की माला से सुशोभित और चञ्चला हैं ऐसी श्रीश्वरी भगवती काकिनी का मैं अपने हृत्कमल के मध्य में ध्यान करता हूँ ॥ २८ ॥

एवं [1]सर्वस्वरूपां तां विभाव्य हृदयाम्बुजे ।
पुनः पुनः पूजयेद्वै त्रैलोक्योद्भवपुष्पकैः ॥ २९ ॥

इस प्रकार सर्वस्वरूपा उन काकिनी का हृदय कमल में ध्यान कर त्रिलोकी में उत्पन्न होने वाले अनेक पुष्पों द्वारा उनकी बारम्बार पूजा करनी चाहिए ॥ २९ ॥

अवश्यं सिद्धिमाप्नोति पूजायोगप्रभावतः ।
आयुरारोग्यजननं [2] पूजनं सुमहाफलम् ॥ ३० ॥
ततो जपेन्महामन्त्रं वर्णमालाक्रमेण तु ।
प्राणायामं ततः कृत्वा न्यसेत् सर्वाङ्गमध्यके ॥ ३१ ॥

इस पूजा योग के प्रभाव से साधक को अवश्य सिद्धि प्राप्त होती है। काकिनी का

---

१. सर्वात्मरूपामिति—ख० ।

२. जननीं सुमहत्फलसम्भवाम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पूजन महान् फल देने वाला है । इससे आयु तथा आरोग्य एवं श्री प्राप्ति तो होती ही है । इसके बाद वर्णमाला के क्रम से (द्र०. ५९, १७-२४) महामन्त्र का जप करे । प्रथम प्राणायाम करे फिर सर्वाङ्ग न्यास करे ॥ ३०-३१ ॥

न्यासकथनम्

मातृकाग्रन्थिनिकरे न्यसेत् पूर्वोक्तनामभिः ।
यदुक्तं पूर्वपटले तेषां नामाभिरेव च ॥ ३२ ॥
विन्यस्य मन्त्रपुटितं मन्त्रन्यासं ततश्चरेत् ।
काकिन्या अष्टशक्तीनां न्यासं कुर्यात्ततः परम् ॥ ३३ ॥

मातृका ग्रन्थि के निकट में कहे गए नामों से तथा पूर्वोक्त पटल में कहे गए उन-उन देवताओं के नाम से न्यास करें । तदनन्तर सम्पुटित मन्त्र द्वारा न्यास कर मन्त्रन्यास करे । तदनन्तर काकिनी की अष्टशक्तियों का भी न्यास करे ॥ ३२-३३ ॥

काकजिह्वाद्विकाण्डेशी[१] कामाख्या[२] काकिनी ध्वजा ।
काकिनी काकमाला च काकचञ्चुप्रकाशिनी ॥ ३४ ॥
कोकिलाचाष्टशक्तीनां नाम्ना विन्यस्य मस्तके ।
कण्ठकूपे न्यसेत्पश्चात् षोडशस्वरसम्पुटम् ॥ ३५ ॥
हृदये विन्यसेन्नाथ कादिद्वादशसम्पुटम् ।
मन्त्रं विन्यस्य विधिना नाभौ मन्त्रेण सम्पुटम्[३] ॥ ३६ ॥

१. काकजिह्वा, २. द्विकाण्डेशी, ३. कामाख्या, ४. काकिनी ध्वजा, ५. काकिनी, ६. काकमाला, ७. काकचञ्चुप्रकाशिनी तथा ८. कोकिला—ये उन आठ शक्तियों के नाम है । उक्त आठ नामों द्वारा मस्तक पर न्यास कर कण्ठकूप में षोडशस्वर से सम्पुटित मूल मन्त्र का न्यास करे । इसके बाद हे नाथ ! हृदय में क से लेकर ठ पर्यन्त द्वादश वर्णों का सम्पुट न्यास करे ॥ ३४-३६ ॥

डादिफान्तं तु विन्यस्य बादिलान्तं स्वलिङ्गके ।
मूलाधारे मूलमन्त्रपुटितं वादिसान्तकम् ॥ ३७ ॥

इसके बाद नाभि में ड से लेकर फ वर्णों द्वारा (१० वर्ण से) सम्पुटित न्यास करे । तदनन्तर 'ब से लेकर ल पर्यन्त (६) वर्णों से लिङ्गस्थान में न्यास करे । फिर व से लेकर स पर्यन्त ४ वर्णों से सम्पुटित मूल मन्त्र से मूलाधार में न्यास करे ।

विन्यस्य व्यापकं न्यासं कृत्वाङ्गानि च बन्धयेत् ।
ततः प्राणायाममेकं[४] कृत्वा प्राणान् समाश्रयेत् ॥ ३८ ॥

---

१. द्विकाकेशीति—ख० । २. काकाक्षा—ख० ।
३. नाभौ मन्त्रेण सम्पुटं मन्त्रं विधिना विन्यस्य जपेत् ।
४. प्राणायामत्रिकं कृत्वा प्राणायामं समाश्रयेत्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इसके बाद व्यापक न्यास कर अपने समस्त अङ्गों को मन्त्र से बाँधकर रक्षित करे। इसके बाद एक प्राणायाम कर प्राणों को स्थिर कर लेवे ॥ ३७-३८ ॥

ततः स्तोत्रं पठेद्धीमान् तत्सर्वं शृणु शङ्कर।
हविष्याशी[1] वशीभूत्वा साधयेदिह सिद्धये ॥ ३९ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे काकिनीसिद्धिसाधन
[2]नामाष्टपञ्चाशत्तमः पटलः ॥ ५८ ॥

हे शङ्कर ! इसके बाद धीमान् साधक को जिस स्तोत्र का पाठ करना चाहिए, उसे आप सुनिए क्योंकी स्तोत्र पाठ के अनुष्ठान में हविष्यान्न का भोजन कर जितेन्द्रिय हो सिद्धि के लिए देवता की साधना करनी चाहिए ॥ ३९ ॥

॥ श्री रुद्रयामल के उत्तरतन्त्र में काकिनी की सिद्धि के लिए साधन नामक
अट्ठावनवें पटल की डॉ० सुधाकर मालवीय कृत
हिन्दी व्याख्या पूर्ण हुई ॥ ५८ ॥

---

१. हविष्यमश्नाति तच्छीलो वशी स्वेन्द्रियविजेता भूत्वा सिद्धये सिद्धिमवाप्तुं साधयेत्।
२. ऊनषष्टितमः पटलः—ख०।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथैकोनषष्टितमः पटलः

काकिनीस्तोत्रविन्यासः
श्रीआनन्दभैरवी उवाच[१]

ज्ञानेश्वरी शुभकरी परिभावनीया
योगेश्वरैर्हरिहरैर्गुरुभिर्महेन्द्रैः ।
तां काकिनीं परशिवां[२] परमेशपत्नीं
संस्तौमि[३] चारुहृदयाम्बुजपीठमध्ये[४] ॥ १ ॥

श्रीआनन्दभैरवी ने कहा—जिन ज्ञानेश्वरी एवं शुभकरी काकिनी देवी का योगेश्वरों, हरिहरों, गुरुजनों तथा महेन्द्रादि देवताओं द्वारा ध्यान किया जाता है, उन परमेशपत्नी परशिवा काकिनी देवी की मैं अपने कोमल हृदय में रहने वाले कमल दल के मध्य पीठ में स्तुति करता हूँ ॥ १ ॥

एकाकिनी त्रिजगतामतिनाशकाले
त्वां काकिनीं [५]समरकार्णा(ण्ड)ककाकपत्नीम् ।
त्वं[६] साक्षिणी भुवनभङ्गविधौ सकास्ते
भूषण्डकाकमहिषीव वयं भजामः ॥ २ ॥

जो इस त्रिलोकी के संहार काल में मात्र अकेली रहती हैं, ऐसी समरकाण्डक (?) काकपत्नी आप काकिनी का हम भजन करते हैं । हे माता ! आप इन भुवनों के प्रलय काल की साक्षिणी हैं और इस भूखण्ड की काकमहिषी के समान ककार वर्ण से संयुक्त रहती हैं (ऐसे काकिनी के विग्रह का ध्यान करना चाहिए) ॥ २ ॥

एकाकिनीं सकलधारणकालयोगे
आधार्य देहसमये सति काकिनीं त्वाम् ।
वाय्वासने मनस आशु विकारनाशे
काकेन्द्रचञ्चुचलितामहमेवमीडे ॥ ३ ॥

हे समस्त विश्व के धारण काल में समर्थ माता ! मैं अपने देह के हृदय स्थान में आप काकिनी का ध्यान कर, मन के विकार शीघ्र नष्ट हो जाने पर वाय्वासन पर काकेन्द्र चञ्चु से चलायमान आपकी स्तुति करता हूँ ॥ ३ ॥

---

१. ख. पुस्तके नास्ति । २. प्रसविनीमिति—ख० । ३. तामिति—ख० ।
४. राजिमध्ये—ख० । ५. कालिक—ख० ।
६. त्वां साक्षिणीं भुवनभङ्गविधौ सकान्ते.....महिषीं सततं भजामीति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भावोदये प्रणयिनीमगतौ[१] च भावा
आह्लादयोगविभवे[२] भुवनेश्वरीं त्वाम् ।
मन्दारहाररुचिरे[३] परमेश्वरि त्वं
रक्षां कुरु प्रथमतो मतिमाश्रयामि ॥ ४ ॥

हे आह्लाद रूप योग से ऐश्वर्यशीले ! हे मन्दारहाररुचिरे ! हे परमेश्वरि ! आप अगतिक जनों पर (शरण देकर) कृपा करने वाली हैं । ऐसी भाव के उदय होने पर भावुक जनों से प्रणय करने वाली आप भुवनेश्वरी का मैं ध्यान करता हूँ, मैं प्रथमतः आपका आश्रय ग्रहण करता हूँ मेरी मति की रक्षा कीजिए ॥ ४ ॥

चन्द्रोदये[४] सुखमयी द्युतिकोटिदीप्ता
गोप्यागमे [५]सुमतिभिः स्वमनांसि शुद्धा ।
सा त्वं सुखात्वं[६] भव भावविपूजनीये
रक्षां कुरु प्रथमभास्करमङ्घ्रिमीडे ॥ ५ ॥

हे चन्द्रोदये ! आप सुखमयी हैं, करोड़ों प्रकाश से उद्दीप्त हैं, बुद्धिमानों के द्वारा आप आगम शास्त्र में गोपनीय हैं, स्वजनों के मानस को शुद्ध करने वाली हैं । अतः हे सदाशिव ! (की पत्नी) भावपूर्वक पूजा के योग्य एवं सुखदायिनी माता सर्वप्रथम मेरी रक्षा कीजिए । मैं सूर्य के समान प्रकाशित आपके चरण कमलों की स्तुति करता हूँ ॥ ५ ॥

ते पादपङ्कजमजस्रमहं भजामि
सानन्दबिन्दु विमलासनभावपुञ्जे[७] ।
गुञ्जावटी[८]विमलमाल्यसुशोभिताङ्गे
स्यामेव[९] मे चरमभावसमूहदात्री ॥ ६ ॥

हे आनन्द से युक्त बिन्दु के विमल आसन पर स्थित भाव समूहों वाली ! हे गुञ्जावटी की विमल माला धारण करने से शोभित अङ्गों वाली ! मैं आपके पाद पङ्कज की अजस्र सेवा करता हूँ और आगे भी इसी प्रकार करता रहूँ । आप मुझे अपने चरमभाव समूह को देने वाली होएँ ॥ ६ ॥

पञ्चानने दशभुजे सकलास्त्रयुक्ते
विद्ये भये नरहरे नरहारभूषे ।

---

१. विभवे—ख० ।
२. आह्लादाधायको योग आह्लादयोगस्तस्य विभव ऐश्वर्यम् ।
३. तृतीयचरणं मन्दारहारादि ख—पु० नास्ति ।
४. चन्द्रोदये इत्यादि प्रथमचरणं ख० पु० नास्ति ।
५. सुखकरी शुभदया शुद्धा—ख० ।
६. सुखानुभवकारिणि पूजनीये—ख० ।
७. ननहासपुञ्जे—ख० ।
८. गुञ्जात्कटी विमलमाल सुशोभिताङ्गे ।
९. श्यामे च मे.....धात्री—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रेतासने[१] त्रिनयने जननी त्वमेव
रक्षे[२] शुभे चरणपङ्कजमाश्रयामि ॥ ७ ॥

हे पञ्चानने ! हे दशभुजे ! हे सकलास्त्रयुक्ते ! हे विद्ये ! हे भये ! हे नरहरे ! हे कपालभूषे ! हे प्रेतासने ! हे त्रिनयने ! आप ही हमारी माता हैं, हे रक्षे ! हे कल्याणकारिणी ! मैं आपके चरण कमलों का आश्रय ग्रहण करता हूँ ॥ ७ ॥

श्री सुन्दरि प्रणतरक्षिणि वेदमात-
स्तारेश्वरी[३] त्वमपि रक्ष विनाशकाले ।
यद्येकभक्त[४] इतिहासपुराणवक्ता
नित्यानुरक्तहरपादसरोजमीडे ॥ ८ ॥

हे श्री ! हे सुन्दरि ! हे प्रणतरक्षिणि ! हे वेदमातः ! यतः आप तारेश्वरी हैं अतः मेरे इस विनाशकाल में आप मेरी रक्षा कीजिए । क्योंकि मैं एक सदाशिव का भक्त हूँ, इतिहास पुराण का वक्ता हूँ और नित्य अनुरक्त रह कर भगवान् सदाशिव के चरण कमलों की प्रार्थना करता हूँ ॥ ८ ॥

ते श्रीपदं भुवनसारमनन्तसेव्यं
योगास्पदं कृतिभिराश्रयमेकयोगम् ।
सर्वे भजन्ति निजमोक्षफलाय नित्यं
दीनोऽहमम्ब[५] भुवनेशि मुदा[६] भजामि ॥ ९ ॥

हे मातः ! आपका श्री युक्त पद भुवन का सार है, अनन्त श्री विष्णु का सेव्य है, योग का आस्पद है, पुण्यात्माओं का आश्रय स्थान है, एकमात्र योगस्वरूप है, सभी लोग मोक्ष फल की प्राप्ति के निमित्त उसका भजन करते हैं । इसलिए हे अम्ब ! हे भुवनेशि ! दीनता युक्त मैं भी प्रेम से उसी का भजन करता हूँ ॥ ९ ॥

त्रैलोक्यपूजितपदं हृदयाम्बुजस्थं
चित्तप्रकाशकमले[७] स्वसुखानुभूतम् ।
मायाश्रयं सकलसिद्धिनिदानरूपं
मञ्जीरहारविनतं वरमाश्रयामि ॥ १० ॥

हृदय कमल में रहने वाला आपका पद त्रैलोक्य पूजित है । हे चित्त को प्रकाशित करने वाली, कमला स्वरूपे ! वह पद आत्मानन्द के सुख का अनुभव करने वाला है, माया

---

१. श्वेतासने—ख० ।—प्रेत आसनं यस्याः सा तत्सम्बोधने, प्रेतासने त्रीणि नयनानि यस्याः सा, तत्सम्बोधने इति यावत् ।
२. दीनोऽस्मि ते—ख० ।
३. तारेश्वरीति—क० ।
४. यद्येक एव इतिहासपुराणरूपे नित्यं तवैव खलु पादसरोजमीडे—ख० ।
५. मद्य—ख० ।
६. मुदाश्रयामि—ख० ।
७. चित्तप्रकाशकमशेषसुखानुभूतमिति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

का आश्रय है, सारी सिद्धियों के निदान का स्वरूप है, मञ्जीर के हार से विनत है, ऐसे श्रेष्ठ आपके पद का मैं आश्रय ग्रहण कर रहा हूँ ॥ १० ॥

कौटीरहार[1]कमलप्रियमाल्यशोभे
शोभाकरे स्थिरतरा भव मे हृदब्जे ।
भूमण्डले हि बलवान्कृतकृत्य एव
त्वामीश्वरीं हृदि मुदा सुखमाश्रयामि ॥ ११ ॥

हे मणि माणिक्य के हारों वाली ! कमलों की प्रिय माला से शोभा धारण करने वाली। हे शोभाकरे ! आप मेरे हृदय कमल में स्थिरतापूर्वक निवास कीजिए । भूमण्डल में बलवान् तथा कृतकृत्यता के लिए मैं अपने हृदय में आप ईश्वरी का आश्रय लेता हूँ ॥ ११ ॥

नित्ये[2] पुरा भजति योगसुसिद्धयेऽसौ
शम्भुर्गिरीश इति चेश्वरपार्श्वगामि ।
सायुज्यनाथपदवीं गत ईशकान्ते
एकाकिनी कुलवताङ्घ्रियुगं किमन्यैः ॥ १२ ॥

हे ईश्वर को अपने पार्श्व में स्थापित करने वाली नित्ये ! पूर्वकाल में अपनी योग सिद्धि के लिए जिन्होंने आपका भजन किया, वे ईश्वर, गिरीश, सायुज्य प्राप्त कर आपके नाथ बन गए । हे ईशकान्ते ! एकमात्र शक्ति सम्प्रदाय वालों के लिए आपका चरण ही शरण है, अन्यों का सहारा प्राप्त करने से क्या ? ॥ १२ ॥

ध्यायन्ति योगिन [3]इहाघसमूहशैलं
संहार[4] हेतुकसदाघविनाशनाय ।
चित्तोत्सवाय विभवाय जयाय भूमेः
दीनोऽहमाशु विभजामि पदं श्रिये ते ॥ १३ ॥

हे मातः! योगीजन अघसमूह को चूर्ण करने के लिए शैल के समान आपके चरण कमल का मृत्यु के कारणीभूत पाप के विनाश के लिए ध्यान करते हैं । चित्त की प्रसन्नता के लिए, ऐश्वर्य प्राप्ति के लिए, पृथ्वी के विजय के लिए भी लोग उन्ही का ध्यान करते हैं । मैं तो अत्यन्त दीन हूँ, अतः शीघ्र ही श्री की प्राप्ति के लिए आपके चरणकमलों का भजन करता हूँ ॥ १३ ॥

कृष्णे सिते [5]विमलपीतनिभे सुरक्ते
वर्णाश्रिये त्वमव [6]मामतिदीनमेकम् ।

---

१. चन्द्रोदये सुखमयं द्युतिकोटिदीप्तमिति—ख० ।

२. नित्यं पुरा भवति वै खलु योगसिद्ध्यै ।—नितरां भवा नित्या ध्रुवा । 'त्यब् नेर्ध्रुवे' इति वार्तिकेन त्यपि सति नित्या इति । सम्बोधने नित्ये ।

३. इहैव तवाङ्घ्रियुग्मम् । ४. हेतुवडपाघविनाशनाय—क० ।

५. विमलपङ्कजकोशसंस्थे—ख० ।

६. मामिह—ख० ।—एकमतिदीनमतिहीनं मामित्यन्वयः । दीङ् क्षये इत्यस्माद्दीनशब्दो

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुत्रं तवैव चरणाम्बुजमेव[१] कान्तं
नीलाम्बुजे स्थिरतरं कुरु कामदात्रि ॥ १४ ॥

हे कृष्णे! हे श्वेते! हे निर्मले! हे पीतसदृशे! हे सुरक्ते! हे मातृकावर्णों में निवास करने वाली! मैं अत्यन्त दीन हूँ, अकेला निःसहाय आपका पुत्र हूँ अतः मेरी रक्षा कीजिए । हे कामदात्रि! हे नीलाम्बुजे ! आप मुझे अपने मनोहर चरण कमलों में स्थिर कीजिए ॥ १४ ॥

सर्वेश्वरी प्रियकरि[२] भवभावहन्त्रि
नाना[३]ध्वनिप्रणतकामदुघे विचित्रे ।
रत्नाम्बरे सुखपदं यदि देहि दास्यं
त्वं[४] चारुवर्णगलिते[५] पदमाश्रयामि ॥ १५ ॥

हे प्रियकरि ! हे जन्म के चक्कर का विनाश करने वाली ! हे विचित्रे ! हे अनेक प्रकार से आर्त पुकार करने वाले प्रणत जनों की कामधेनु ! आप सर्वेश्वरी हैं । हे रत्नाम्बरे ! हे चारुवर्णगलिते ! यदि मैं आपके चरण कमलों का आश्रय लेता हूँ तो आप मुझे सुख प्रदान करने वाला अपना दास्य भाव प्रदान कीजिए ॥ १५ ॥

रत्नाकरे सकरुणेऽरुणकोटिवर्णे
स्वर्णादिनिर्मित[६]सृजापविशोभिताङ्गी ।
त्वं काकिनी यदि कटाक्षनिपातमेकं
सर्वं[७] कुरुष्व सुखमोक्षपथप्रमोदी ॥ १६ ॥

हे रत्नाकरे ! हे सकरुणे ! हे अरुण कोटिवर्णे, आप स्वर्णादि से निर्मित आभूषणों के द्वारा सुशोभित अङ्गों वाली काकिनी हैं । आप ही सुख तथा मोक्षपथ में प्रमोद प्रदान करने वाली हैं । अतः एक बार मात्र अपने कटाक्ष के निक्षेप से मेरा समस्त कार्य पूर्ण कीजिए ॥ १६ ॥

हृत्पद्मादिवर्णध्यानम्

आद्ये प्रवालविमलेऽमलमाल्यशोभे
सूक्ष्मेऽतिसूक्ष्मनिकरे[८] करुणानिधाने ।
(क) बाले[९] वले प्रचले चपले प्रलापे
योगेशि पादकमलं कुलमाश्रयामि ॥ १७ ॥

हे आद्ये ! हे प्रवाल (मूँगा) के समान विमल वर्ण वाली ! हे अत्यन्त शुभ्र माला से

निष्ठान्तः, ओदितश्चेति तस्य नत्वे दीनः, क्षीण इत्यर्थः ।

१. संश्रृतं माम्—ख० । २. प्रियकरी—ख० ।
३. नानात्मिके सकलकामहरे विचित्रे—ख० । ४. तच्चारु—ख० ।
५. गणितम्—ख० । ६. स्वार्थादि—ख० ।
७. कर्णे कुरुष्व खलु मोक्षपदानुभेदी—ख० । ८. तनु देहि पदाब्जयुग्मम्—ख० ।
९. त्वं षोडशी इत्यारभ्य पटलान्तं श्लोक—कदम्बकं ख०—पुस्तके नास्ति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शोभित होने वाली ! हे सूक्ष्मे ! हे अतिसूक्ष्मनिकरे ! हे करुणानिधाने ! हे बाले ! हे बले ! हे प्रचले ! हे चपले ! हे प्रलापे ! हे योगेशि ! मैं आपके पाद कमल का जो कुल (शक्ति) स्वरूप हैं, उसका आश्रय लेता हूँ ॥ १७ ॥

(ख) त्वं षोडशी खरतरा खरखड्गहस्ते
खड्गेश्वरी प्रखरवाक्यमाथाढ्यवक्त्रे ।
म खर्जूरहाररुचिरे खलहन्त्रि तुभ्यं
नित्यं नमो नम उपेन्द्रगिरीन्द्रसेव्ये ॥ १८ ॥

हे तीक्ष्ण तलवार अपने हाथ में धारण करने वाली ! आप षोडशी खरतरा एवं खड्गेश्वरी हैं । हे आढ्यवक्त्रे ! आप प्रखर वाक्य वाली हैं । हे खर्जूर की माला के धारण से रुचिर शोभा वाली, हे खलहन्त्रि ! हे विष्णु तथा गिरीन्द्र से भी सेवनीय देवी ! आपको नित्य नमस्कार है नित्य नमस्कार है ॥ १८ ॥

(ग) गीतानते तरुतरे प्रणमामि नित्यं
गात्रेश्वरी गतिहरे गणनाथसेव्ये ।
गायन्ति ते चरणपङ्कजसारगीतं
रक्षाप्रचण्डकलुषादनुपेक्षणीयम् ॥ १९ ॥

अनाहत पद्म में 'ग' का स्वरूप—हे गीत से प्रसन्न होने वाली देवी ! हे तरुतरे ! हे गतिहरे ! हे गणेश जी से सेवनीय ! आप सबके गात्र की अधीश्वरी हैं । मैं आपको नित्य प्रणाम करता हूँ । सभी लोग आपके चरण पङ्कज का सारभूत गीत (यश) गायन कर रहे हैं । मैं अप्रचण्ड (छोटे) पापों के करने से आपकी उपेक्षा के योग्य नहीं हूँ अतः मेरी रक्षा कीजिए ॥ १९ ॥

(घ) दीर्घस्वरे घनवरे घनघोरनादे
घोरानने नवघने घटनाघनानाम् ।
घोरास्पदे घटगते घटशून्यकर्त्रि
त्वं काकिनी समवतु क्षितिदोषजालात् ॥ २० ॥

हे दीर्घ स्वरों वाली ! हे घनवरे ! हे घनघोर शब्द करने वाली ! हे भयानक मुख वाली ! हे नवघने ! आप बादलों के समूहों की संघटना हैं । हे घोर स्थान में निवास करने वाली ! हे सबके घटरूप शरीर में रहने वाली ! हे शरीर रूपी घट को शून्य करने वाली आप (सर्वसमर्थ) काकिनी देवी हैं । आप इस पृथ्वी के दुःख रूप जाल से मेरी रक्षा कीजिए ॥ २० ॥

(ङ) आनुस्वरे स्मरहरे ननु रूपविद्ये
संयोगिनीप्रबलशत्रुविनाशभूते ।
रक्षेऽतिरक्ष करुणां कुरु देहि मोक्षं
(च) चण्डि प्रचण्डनयने चरणं भजे ते ॥ २१ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हे 'ङ' रूप से अनुस्वार भूते ! हे स्मर को विनष्ट करने वाली ! हे मन्त्ररूप में महाविद्या स्वरूप वाली ! हे प्रबलशत्रुओं का विनाश करने वाली काकिनी ! आप संयोगिनी हैं । हे रक्षा करने वाली देवी ! मेरी विशेष रूप से रक्षा कीजिए । मुझ पर करुणा कीजिए और मुझे मोक्ष प्रदान कीजिए । हे चण्डि ! हे प्रचण्डनयने ! मैं आपके चरणों का भजन करता हूँ ॥ २१ ॥

(छ) छत्रप्रदे छलहरे छदवासिनी त्वं
छद्मस्थिते हृदयपङ्कजदक्षयोगे[1] ।
(ज) त्वां पूजये जयधरे यदुनाथजन्यो
जाये जयं यदिह देहि पदं भजामि ॥ २२ ॥

'छ', 'ज'—हे राज्य छत्र प्रदान करने वाली ! हे कपट को दूर करने वाली ! आप (कमल) पत्र में निवास करती हैं । हे हृदय पद्म में दक्षता पूर्वक रहने वाली देवी तथा (छल) छद्म में स्थित रहने वाली, यदुनाथ का जन्य (सेवक ?) मैं आपकी पूजा करता हूँ । हे जय धारण करने वाली देवी ! हे जाये ! आप मुझे इस लोक में जय प्रदान कीजिए । मैं आपके चरण कमलों की सेवा करता हूँ ॥ २२ ॥

(झ) झङ्के झनज्वलयतीह रिपुं पिबन्ति
त्वं कौशिकी सकलदेहविशोधनी त्वम् ।
(न) नित्येऽनुनासिकपदे सकलार्थदे त्वं
(ञ) रक्षां कुरुष्व विपदे कुलपुञ्जगुञ्जे ॥ २३ ॥

'झ', . . . 'ञ'—हे झङ्कार से देदीप्यमान ! हे शत्रुओं का रक्त पीने वाली ! आप कौशिकी हैं, सबके देह का शोधन करने वाली हैं । हे नित्य अनुनासिकपदे ! हे सकलार्थ देने वाली ! हे विपदे ! हे शाक्त सम्प्रदाय वालों की गुञ्जास्वरूपे ! आप मेरी रक्षा कीजिए ॥ २३ ॥

विमर्श—कौशिकी योगमाता हैं । .. .. ..

(ट) टङ्कारगेऽट्टहसने टललेऽट्टहासे
(ठ) ठाक्कारिणी सठहरा परिनिष्ठिता त्वम् ।
सिंहेष्टपृष्ठनिलयेऽस्थिरयोगभावं
हृत्पद्मके कुरु सदा सकलार्थदात्रि ॥ २४ ॥

'ठ'—हे टङ्कार में रहने वाली ! हे अट्टहास करने वाली ! हे टलले ! हे अट्टहासे ! आप ठक्कारिणी हैं । सठता का अपहरण करने वाली तथा परिनिष्ठिता हैं । हे सिंह के पीठ पर निवास करने वाली ! हे सकलार्थदात्रि ! आप मेरे हृदय रूपी पद्म में स्थिर रह कर योग की भावना कीजिए ॥ २४ ॥

---

१. हृदयं पङ्कजमिव, "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति समासः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

फलश्रुति

एतत्स्तोत्रं पठेद्धीमान् ध्यानन्यासपरायणः ।
विभाव्य स्तौति यो योगी स योगी मोक्षभाग्भवेत् ॥ २५ ॥
हृत्पङ्करुहमध्यस्थं स पश्यति जगत्त्रयम् ।
अष्टसिद्धियुतः[1] शीघ्रं जीवन्मुक्तो भवेन्नरः ॥ २६ ॥

॥ इति श्रीरुद्रयामले महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे काकिनीस्तोत्रविन्यासो नामोनषष्टितमः पटलः ॥ ५९ ॥

धीमान् साधक ध्यान तथा न्यास में परायण रह कर इस स्तोत्र का पाठ करे । इस प्रकार भावना पूर्वक इस स्तोत्र से स्तुति करे तो वह योगी बन कर मोक्ष का भागी बन जाता है । इतना ही नहीं वह इन तीनों लोकों को अपने हृदय कमल में ही देख लेता है । किं बहुना वह अष्टसिद्धि से युक्त रह कर शीघ्र जीवन्मुक्त हो जाता है ॥ २५-२६ ॥

॥ श्रीरुद्रयामल के मन्त्रोद्दीपन में सिद्धमन्त्रप्रकरण में काकिनीस्तोत्रविन्यास नामक उनसठवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ५९ ॥

---

१. अष्टौ सिद्धयोऽणिमाद्याः प्रसिद्धाः, ताभिर्युतोऽलङ्कृत इति यावत् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ षष्टितमः पटलः

आनन्दभैरव उवाच

वद कान्ते परानन्दे रहस्यं कुलसुन्दरि ।
यस्य विज्ञानमात्रेण भवेद् गङ्गाधरो हरिः ॥ १ ॥

आनन्दभैरव ने कहा—हे परानन्दे ! हे कुलेश्वरि ! हे कान्ते ! आप मुझसे उस रहस्य का वर्णन कीजिए जिसके जान लेने मात्र से साधक शिव शङ्कर तथा भगवान् विष्णु बन जाता है ॥ १ ॥

ईश्वरस्य स्तवब्रह्मपरं निर्वाणसाधनम् ।
शोभा[1]कोटियोगपतेर्योगेन्द्रस्य परापतेः ॥ २ ॥

उन भगवान् सदाशिव का स्तव (स्तुति) जो ब्रह्मपरक है, सबके मुक्ति का साधन है । जो करोड़ों शोभा से युक्त योग के पति हैं, योगेन्द्र हैं और पराशक्ति के पति हैं, उसे कहिए ॥ २ ॥

ईश्वरं के न मानन्ति ब्रह्मविष्णुशिवादयः ।
तस्य स्मरणमात्रेण महावाग्मी च मृत्युजित् ॥ ३ ॥

उन भगवान् ईश्वर को कौन नहीं मानता । ब्रह्मा, विष्णु, शिवादि सभी तो उनको मानते हैं । उस स्तव के स्मरण मात्र से मनुष्य महावाग्मी तथा मृत्यु पर विजय प्राप्त करने वाला बन जाता है ॥ ३ ॥

मन्त्री[2] वेदान्तसिद्धान्तं तं भजन्ति महर्षयः ।
देवा मनुष्या गन्धर्वास्तं भजन्ति महेश्वरम् ॥ ४ ॥
अकालमृत्युहरणं सर्वदा सर्वतोमुखम् ।
सदा तस्य स्तवं दिव्यं श्रोतुमिच्छामि शाङ्करि[3] ॥ ५ ॥

मन्त्रज्ञ साधक, महर्षि जन, देवता, मनुष्य एवं गन्धर्व सभी उन वेदान्तसिद्धान्तभूत महेश्वर का भजन करते हैं । हे शाङ्करि ! मैं उन महेश्वर के अकाल मृत्यु को हरण करने वाले, सर्वतोमुख तथा दिव्य स्तुति को सदैव सुनने की इच्छा करता हूँ ॥ ४-५ ॥

---

१. शोभा कोटियोगपते.....परागतिः—ख० ।
२. सर्ववेदान्तसिद्धान्तैस्तम्—ख० ।
३. शङ्करो—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुरस्तवनम्

श्रीआनन्दभैरवी उवाच

कौल त्वं शृणु शङ्करप्रियकरं स्तोत्रं तदीशस्य[१] च
श्रीनाथाय नमः कुलेश [२]परमप्राणेश तुभ्यं मुदा ।
सानन्दाय नमो भवाय पतये लोकेश्वरायो ॐ नमो
भूतेशाय गणाधिपाय यतये[३] श्रीशूलिने ते नमः ॥ ६ ॥

श्री आनन्दभैरवी ने कहा—हे कुलमार्ग के उपासक महाभैरव ! अब आप उन ईश्वर को प्रिय लगने वाले स्तोत्र को सुनिए । हे कुलेश ! हे परम प्राणेश ! आप श्रीनाथ के लिए प्रसन्नता पूर्वक मेरा नमस्कार है । सानन्द के लिए नमस्कार है, भव के लिए नमस्कार है, पालन करने वाले के लिए नमस्कार है, लोकेश्वर के लिये नमस्कार है । भूतेश्वर, गणाधिपति, यति स्वरूप श्री शूली आपको मेरा नमस्कार है ॥ ६ ॥

कान्ताय प्रणवाय[४] योगपतये योगेश्वरायो ॐ नमो
महारायाक्षरेश्वराय[५] महते नित्याय नित्यं नमः ।
स्वाधिष्ठानविभेदकाय हरये मूलाब्जसम्भेदिने
नाभेरम्बुजभेदिने[६] हृदयाम्भोद्विभेदकायों नमः ॥ ७ ॥

कान्त के लिए, प्रणव के लिए, योगपते तथा योगेश्वर के लिए, ॐ स्वरूप वाले के लिए नमस्कार है । महाराय (विपुल सम्पत्ति वाले) के लिए, अक्षरेश्वर, महान् तथा नित्य स्वरूप वाले के लिए मेरा नित्य नमस्कार है । स्वाधिष्ठान चक्र के भेदन करने वाले के लिए, हरि के लिए, मूलाधार कमल के संभेदन करने वाले के लिए, नाभि पर स्थित मणिपूर नामक कमल के भेदन करने वाले के लिए तथा हृदय में स्थित अनाहत कमल भेदन करने वाले के लिए ॐ नमः ॥ ७ ॥

कालाय प्रणवाय मायवशिने नित्यं नमो भास्वते
मोक्षाय प्रमथेश्वराय कवये खट्वाङ्गहस्ताय ते ।
भक्तिश्रीनिधये[७] महेन्द्रखचराय[८] मायाश्रयार्यो नमो
विज्ञानाय शिवाय सूक्ष्मगतये गूढाय भूयो नमः ॥ ८ ॥

काल के लिए, प्रणव के लिए, ? और म के लिए, इन्द्रियों पर विजय प्राप्त करने वाले के लिए नित्य नमस्कार है । भास्वान् के लिए, मोक्षस्वरूप, प्रमथेश्वर, कवि, खटाङ्ग

---

१. मदीशस्य च—ख० । २. सततम्—ख० ।
३. सततम्—ख० ।—यतिः यन्यासिराट्, तस्मै, श्रिया सहितः शूली, तस्मै इति भावः।
४. प्रभवाय—ख० ।
५. ओङ्काराय, कवीश्वराय—ख० ।—भोगानामायो वृद्धिः, तत्रान्तर्यागिणे इति यावत् ।
६. ओम्नमोऽम्बुजभेदिने हृत्पद्मोद्भेदकाय ओं नमः—ख० ।
७. निलये—ख० । ८. खचरैर्माया....ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धारण करने वाले के लिए, भक्ति रूपी श्री के निधान वाले के लिए, महेन्द्र तथा आकाशचारी के लिए, माया को आश्रय देने वाले के लिए मेरा ॐ नमः (स्वीकार होए)। विज्ञान स्वरूप वाले के लिए, सबका कल्याण करने वाले के लिए, सूक्ष्मगति वाले के लिए तथा गूढ़ रूप वाले के लिए मेरा बारम्बार नमस्कार है ॥ ८ ॥

सर्वज्ञाय जयाय भूतिपतये[१] भूतेश्वराय प्रभो
पञ्चास्याय हराय देवपतये गौरीश्वराय श्रिये ।
भोगायान्तरगामिने[२] हरिहरायानन्दचिद्रूपिणे
कल्याणाय भगाय शुद्धमतिभिर्नित्यं नमस्ते नमः ॥ ९ ॥

सर्वज्ञ के लिए, सर्वत्र जय प्राप्त करने वाले के लिए, भूतिपति तथा भूतेश्वर के लिए, प्रभु के लिए, पञ्चमुख के लिए, हर के लिए, देवेश्वर के लिए, गौरीश्वर के लिए, श्री स्वरूप वाले के लिए, भोग स्वरूप वाले के लिए, सबके अन्तःकरण में रहने वाले के लिए, हरिहर स्वरूप वाले के लिए तथा आनन्द एवं चिद्रूप वाले के लिए, कल्याणकारी के लिए तथा ऐश्वर्यशाली के लिए समस्त शुद्धि युक्त मन वाले साधकों के द्वारा किया गया नित्य का नमस्कार, पुनः नमस्कार है ॥ ९ ॥

गोविन्दप्रियवल्लभाय विधये ब्रह्मादिकोत्पत्तये
उत्पत्तिस्थितिसंहृतिप्रकृतये [३]बाह्याय विश्वेश्वर ।
तुभ्यं काल नमो नमः प्रलययोगोल्लासिने भूभृते
विज्ञाताय[४] गिरीन्द्रपूजित विभो भूताधिपायानिशम्[५] ॥ १० ॥

गोविन्द श्री कृष्ण के प्रियवल्लभ के लिए, विधि के लिए ब्रह्मादि देवों की उत्पत्ति करने वाले के लिए, उत्पत्ति, स्थिति तथा संहार रूप प्रकृति वाले के लिए और सबसे वाह्य स्वरूप और वाले के लिए नमस्कार है ! हे विश्वेश्वर ! हे काल ! आपको नमस्कार है, पुनः नमस्कार है । हे गिरीन्द्र पूजित विभो ! प्रलय योग काल में उल्लास वाले, पृथ्वीधारण करने वाले, विज्ञात तथा भूतों के अधिपति स्वरूप में विराजमान आपको निरन्तर नमस्कार है ॥ १० ॥

गौरीशाय गणार्चिताय मनसे[६] मान्याय[७] भूवासिने
भूतोत्साहमहीशनाथशशिचूडाय प्रधानाय ते ।
नित्यं नित्यकलाकुलाय फणिचूड़ाय[८] प्रबुद्धाय ते
तेजःशान्तिपते सतां[९] पतिपते निर्वाससे ते नमः ॥ ११ ॥

---

१. भूतपतये—ख० ।
२. ओंभोगान्तरगामिने—ख० ।
३. बाम्यायेति—क० ।
४. विख्याताय—ख० ।
५. भूतानामधिपाय स्वामिने ।
६. मनवे—ख० ।
७. मन्याय—क० ।
८. बुद्धायेति—ख० ।
९. संजलपतिनिर्वासशे नमः—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गौरीश्वर के लिए, गणों द्वारा पूजा प्राप्त करने वाले के लिए, मन तथा मान्य के लिए, पृथ्वी पर (नाना रूपों से) निवास करने वाले के लिए, प्राणियों में उत्साह पैदा करने वाले महीश्वरों के नाथ के लिए, चन्द्रमा को अपने चूडा में धारण करने वाले के लिए और उन प्रधान के लिए नमस्कार है । नित्य कला के कुल से पूर्ण, सर्प की माला धारण करने वाले, ज्ञानस्वरूप ! आपको नित्य नमस्कार है । हे तेजःस्वरूप ! हे शान्तिपते ! हे सतांपतिपते ! वस्त्र से रहित नग्न स्वरूप वाले ! आपके लिए नमस्कार है ॥ ११ ॥

शोभाकोटियुताय चन्द्रकिरणाह्लादाय सूक्ष्माय ते
तुभ्यं नाथ नमो नमः प्रणमतामानन्दसिन्धूत्सवा ।
हेरम्ब[१] श्रयकार्तिकेयजनकानन्दप्रियाय प्रभो
पित्रे सर्वसुखाय सर्वपतये श्रीनीलकण्ठेश्वर ॥ १२ ॥

करोड़ों शोभा वाले के लिए, चन्द्रकिरणों के समान आह्लाद करने वाले के लिए तथा सूक्ष्म शरीर धारण करने वाले के लिए नमस्कार है । आपको हे नाथ ! नमस्कार है, पुनः नमस्कार है । हे प्रभो ! आपको प्रणाम करने वालों के लिए आनन्द सिन्धु के समान अनेक उत्सव प्राप्त होते हैं । आनन्द से प्रेम करने वाले, गणेश तथा कार्तिकेय के जनक, सर्वपति तथा समस्त चराचर जगत् के स्वामी एवं पिता रूप हे प्रभो ! हे श्री नीलकण्ठेश्वर ! सबको सुख देने वाले सर्वपति आप के लिए नमस्कार है ॥ १२ ॥

त्रिब्रह्मार्पितभूतये सुरतये[२] श्रीभास्वते योगिना-
मानन्दोदयकारिणे कुलपते ते[३] नाथ तुभ्यं नमः ।
ब्रह्मानन्दकुलाय रौप्यगिरये सौन्दर्यसंसिद्धये
सर्वानन्दकराय सम्परतरायाढ्याय सत्यं[४] नमः ॥ १३ ॥

त्रिब्रह्मस्वरूप के लिए, सबको विभूति (ऐश्वर्य) प्रदान करने वाले के लिए, सुरति वाले के लिए, श्री भास्वान् के लिए और योगीयों के आनन्दोदय करने वाले के लिए नमस्कार है । हे कुलपते ! हे नाथ ! आपको नमस्कार । ब्रह्मानन्द के सर्वस्व के लिए, चाँदी के पहाड़ के समान विग्रह धारण करने वाले के लिए, सौन्दर्य की संसिद्धि प्राप्त करने वाले के लिए, सबको आनन्द प्रदान करने वाले के लिए, परात्पर (ब्रह्म) के लिए और आढ्य स्वरूप वाले आप के लिए मेरा संत्यतः नमस्कार है ॥ १३ ॥

काशीशं कौशिकीशं सुरतरुकिरणं कारणाख्यं सुखाख्यं[५]
गौरीशं [६]गङ्गिरीशं गुरुमगुरुगिरिश्रेणिलिप्ताङ्गवङ्गम् ।

---

१. हेरमबाश्रयकार्तिकेशजनका....ख० ।
२. सुरपते—ख० ।
३. हे—ख० ।
४. सत्यमिति—क० ।
५. सुधाख्यमिति—ख० ।
६. सर्वमीशं गुरुगिरिनमितं श्रोणिलिप्ताङ्गभस्ममिमति—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

घोषाख्यं मञ्जुघोषं घनगणघटितं घोरसङ्घट्टनादं
चार्वीशं[१] राघवेशं घनहृदि घटमामीश्वरं घौटकेशम्[२] ॥ १४ ॥

हे नाथ ! मेरे तमोगुण के कारण घने हृदय में काशीश्वर एवं कौशिकीश्वर को स्थापित कीजिए । कल्पतरु के समान किरणों वाले, सबके कारणभूत, सुखस्वरूप, गौरीश, गं गिरीश, गुरु, अगुरु, गिरि की श्रेणी से विलिप्त अङ्ग वाले, घोष, मञ्जुघोष, अनेक घनों (बादलों) से घटित, घोर सङ्कट युक्त नाद वाले, चार्वीश, राघवेश, ईश्वर तथा घुटाए हुए केश वाले ईश्वर को घने हृदय में स्थापित कीजिए ॥ १४ ॥

लाक्षाभाण्ड[३] विशालो वसति तव करे स्थावरो जङ्गमो वा
भूताध्यक्षो[४] वशिष्ठः स्वपरिजनकुले सर्वदा पाहि शम्भो ।
भक्तिज्ञानं [५]न दातुं चपलमलमणिश्रेणिमाला विलोला
लोकाभीतो[६] कलङ्की विधिशतमुकुटश्रीपदाम्भोरुहं ते ॥ १५ ॥

चाहे यह लाक्षा की आभा वाला और विशाल समस्त ब्रह्माण्ड हो, चाहे स्थावर का समुदाय हो या फिर जङ्गम का समुदाय हो, सभी आपके हाथ में निवास करते हैं । हे शम्भो ! आप भूताध्यक्ष हैं एवं वशी हैं । मैं आपके परिजन कुल में हूँ, आप मेरी सर्वदा रक्षा कीजिए । हे देवि ! आप चञ्चल, अमल, मणि माला की श्रेणी से युक्त हैं, चञ्चला हैं, लोक से निर्भीक किन्तु कलङ्की मैंने सैकड़ों ब्रह्मदेवों के मुकुट मणियों से धृष्ट आपके चरण कमलों का आश्रय लिया है । क्या आप मुझे भक्ति ज्ञान प्रदान नहीं करेंगी ? ॥ १५ ॥

धूर्तः शौरिः प्रशान्तो विमलमधुरसामोदमानोऽप्रमत्तो[७]
मायामोहापदेवी[८] सुरमदमदनो दानसम्मानदाता ।
त्वं[९] नाथं श्रीपदाम्भोरुहविमलतले[१०] ते कथं ना सुरक्षे
पूर्वास्यो दक्षिणास्यो धनपतिवदनः पश्चिमास्यो [११]मुनिस्त्वम् ॥ १६ ॥

धूर्त, शौरि, प्रशान्त, विमल तथा मधुर रस से सब प्रकार से संतुष्ट रहने वाले

---

१. अर्धीशं ..... जनघटनया चेश्वरमिति .... ख० ।
२. घोटकानामीशं घोटकेशमित्यनेन तीव्रगतिकानां मनांसि ईशयति इति यावत् ।
३. नित्यं वै त्वं विशालो वसति तव करे ... ख० ।
४. भूताध्यक्षं वाशिष्ठमिति—ख० ।
५. न दत्तमिति ख० ..... चपलसितमणि .... विलोलो .... ख० ।
६. लोकातीतः कलङ्कीविद्युशत ..... अम्भोरुहस्ते—ख० ।—अकलङ्की इति पदच्छेदो भाति । 'अतो रोरप्लुतादप्लुते' इति सूत्रेण रोरुत्त्वम् ।
७. मोदमानः प्रमत्तो—ख० ।
८. प्रणाशो .... सर्वसम्मानदाता—ख० ।
९. ते नाथ ।
१०. तलेऽहं कथं चाशु वक्ष्ये—ख० ।
११. मुनीन्द्र—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वदा सावधान, माया तथा मोह को दूर करने वाले, सुरमद में प्रसन्न रहने वाले, दान सम्मान के देने वाले और देवताओं के हर्ष से हर्षित होने वाले आप है । ऐसे हे नाथ ! आपके चरण कमल के विमल तल में मेरी सुरक्षा क्यों नहीं होगी । क्योंकि आपका मुख पूर्व की ओर, दक्षिण की ओर, उत्तर की ओर तथा पश्चिम की ओर है । आप मन्त्रद्रष्टा मुनि भी हैं ॥ १६ ॥

भेदी[१] सिद्धान्त[२]विद्याधरनिधिकिरणः कारणोऽनन्तशक्ति-
र्यः साक्षात् कामधेनुः स च धनपतिपः सर्वभोगानुरागी ।
पादाम्भोजे हि नित्यं [३]कलगिरिसुतानाथ ते योगिपत्वं
चित्तं मे चञ्चलाख्यं शशिधरकिरणो वाक्पते[४] योगसिद्धिः ॥ १७ ॥

जो सबका भेदन करने वाले हैं, सिद्धान्त विद्या को धारण करने वाली निधियों को प्रकाशित करने वाले हैं, सब के कारण हैं और अनन्त शक्ति सम्पन्न हैं, ऐसे आप साक्षात् कामधेनु हैं, धनपति कुबेर के रक्षक हैं और समस्त भोगों में अनुराग प्रगट करने वाले हैं । ऐसे हे मनोहर पार्वती के पति ! आपके चरण कमलों में योगियों के रक्षण का भार है । योगसिद्धि भी है । हे वाक्पते ! आप चन्द्रमा के किरणों के समान आह्लाद उत्पन्न करते हैं, अतः मेरे चञ्चलता युक्त चित्त का सुधार कीजिए और योगसिद्धि प्रदान कीजिए ॥ १७ ॥

कपर्दी[५] श्रीखड्गासिवरगदया वेदभुजया
घनच्छायासङ्कोचरचनावशच्छद्मविजयः[६] ।
जयी जेता जायेर्जयमनुकरोतु श्रियतमो
ज्वलज्झंझावाते क्षणधर इह क्रोध इति मे ॥ १८ ॥

हे प्रभो ! आपकी कपर्द्द, श्री खड्ग, असि, वर, गदा तथा वेदरूपी भुजा की धनच्छाया के संकोच की रचना से विजय प्राप्त कर मैं जयी जेता बन जाऊँ । ऐसी आप कृपा करें और उस जलते हुए झञ्झावात में नाशवान् मेरा क्रोध विनष्ट हो जावे ॥ १८ ॥

अथाऽऽज्ञा[७]चक्रान्तर्गतविवरमाच्छन्नजटिलः
प्रतिज्ञाभङ्गस्थकटकशतकोटिप्रकटितः ।

---

१. भेदे—ख० । २. विधु ।
३. समरगिरि...योगपत्रमिति—क० ।
४. वाक्पतेर्योगसिन्धो—ख० ।—'वाक्पते, योगसिन्धो' इति पदद्वयस्य संबोधने औचित्यम्, अथवा वाक्पते ! हे भगवन् ! तदा योगसिद्धिर्भवति, इत्यन्वयः ।
५. कापर्दी श्रीखड्गासिवरगदयावेद भुजगो ।
धनच्छायां संकोचय मम सदा कायनिचये । जयी जेता जातेर्ज ....—ख० ।
६. स्थूलविजयः—ख० ।
७. सदाज्ञाचक्रान्तर्गतविषधरमाच्छन्नजटिलः—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुठारस्ते[१] क्रोधी कमठकटवासी[२] कठिनहा
ककाराद्यं[३] नत्वा दशकिरणमानोऽवतु सदा ॥ १९ ॥

आज्ञाचक्र के अन्तर्गत रहने वाले, विवर को आच्छादित करने वाले, अत्यन्त टेढ़ा, प्रतिज्ञा भङ्ग करने वाले, सैकड़ों करोंड़ कटक (सेना) के लिए आपके द्वारा प्रकट किया जाने वाला क्रोध, कमठ रूप आसन पर निवास करने वाला, कठिन लोगों का वध करने वाला, आपका कुठार जो दश किरणों से युक्त है वह आपके ककारादि द्वादश (क से ठ पर्यन्त) वर्णों को नमस्कार करने वाले हमारी सर्वदा रक्षा करें ॥ १९ ॥

सुधाखण्डादेव्याः[४] स्तवनपठनेन प्रियकरं
पदाम्भोजं चेति प्रचयति[५] स्वभाग्यं कुलपते[६] ।
प्रधाने[७] भूखण्डे जयति यदि मृत्युञ्जयपदं
विनोदं भूयोगं पचति[८] सहसा [९]प्रेमतरलः ॥ २० ॥

हे कुलपते ! इस स्तोत्र के पाठ से साधक को सुधाखण्ड वाली देवी को प्रिय लगने वाले आपके पदाम्भोज में प्रीति होती है । स्वभाग्योदय होता है । प्रधान भूखण्ड में वह विजय प्राप्त करता है । किं बहुना मृत्युञ्जय पद प्राप्त करता है । यदि वह सहसा प्रेम में तरल (आर्द्र) होकर इसका पाठ करता है तो विनोद तथा भूयोग (पृथ्वी) भी प्राप्त करता है ॥ २० ॥

यद्येवं प्रपठेदिदमनियतं[१०] कौलावलीसंयुतं[११]
स्तोत्रं[१२] साररहस्यभारपरमानन्दैकचित्तस्थलम् ।
योगीन्द्रावगतित्वमुक्तफलदं[१३] सर्वेश्वरत्वं पदं
चन्द्रादित्यसमागतं परपदाह्लादैकमात्रं लभेत् ॥ २१ ॥

साधक बिना नियम के भी यदि कौलावली ('क से लेकर 'ठ' पर्यन्त ? वर्णों की स्तुति) से संयुक्त, सार तथा रहस्य से भरे चित्त के परमानन्द का एकमात्र स्थल, योगीन्द्रों को गति से युक्त मुक्ति फल देने वाले इस स्तोत्र का पाठ करे तो वह चन्द्र तथा आदित्य के समान तेजस्वी तथा एकमात्र परमपद का आह्लाद एवं सर्वेश्वरत्व पद प्राप्त कर लेता है ॥ २१ ॥

---

१. कुठारास्त्रः—ख० । २. तट—ख० ।
३. ककाराद्यणोर्द्वादशकिरणयुक्तोऽवतु सदा—ख० ।
४. सुधाखण्डं हुत्वा स्तवनपठने न प्रिय....ख० । ५. प्रचरति—ख० ।
६. कुलपतेः—ख० ।
७. प्रधाने—ख० ।—अयमेव पाठो युक्तः प्रतिभाति, अर्थसंगतेः ।
८. पठति—ख० । ९. तरणः—ख० ।
१०. न्तु—ख० । ११. सम्मतमिति—ख० ।
१२. संसारे सरहस्यकं भवभयानन्दैकचित्तस्थलमिति—ख० ।
१३. मुक्तिफलदमिति—ख० ।—अर्थसंगत्या अयमेव पाठो युक्ततरो भाति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ते शम्भो यदि पादाम्भोरुहमङ्गलवल्लिका[1] ।
पूज्यते[2] सर्वदा योगी निर्वाणगुणसिद्धये ॥ २२ ॥
किन्न सिद्ध्यति भ्रूमध्ये शिवभक्तिप्रसादतः ॥ २३ ॥

॥ इति श्री रुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने अनाहत पद्मे [3]सुरस्तवनं नाम षष्टितमः पटलः ॥ ६० ॥

हे शम्भो ! आपके चरण कमलों की मङ्गल वल्लिका रूप इस स्तोत्र का निर्वाणगुण सिद्धि के लिए योगी यदि पाठ करे तो वह सर्वदा पूजित होता है । बहुत क्या कहें ? भ्रूमध्य में (साधना से) शिवभक्ति की कृपा से कौन सी सिद्धि प्राप्त नहीं होती ॥ २२-२३ ॥

॥ श्रीरुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन में अनाहत पद्म में सुरस्तवन नामक साठवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ६० ॥

१. पाद एव अम्भोरुहं कमलम्, अथवा पादोऽम्भोरुहमिव, तत्र मङ्गलवल्लिका ।
२. स्तौति वै सर्वदा....ख० ।—पूज्यते सर्वदा योगी, इति मूलपाठो युक्ततरः प्रतिभाति ।
३. अत्र क—खपुस्तकयोः पटलसंख्या समाना जाता ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथैकषष्टितमः पटलः

श्रीआनन्दभैरव उवाच

वद कल्याणि कामेशि त्रैलोक्यपरिपूजिते ।
ब्रह्माण्डानन्तनिलये[१] कैलासशिखरोज्ज्वले ॥ १ ॥
कालिके कालरात्रिस्थे महाकालनिषेविते ।
शब्दब्रह्मस्वरूपे त्वं वक्तुमर्हसि सादरात् ॥ २ ॥
सहस्रनामयोगाख्यम्[२] अष्टोत्तरमनन्तरम् ।

श्रीआनन्दभैरव ने कहा—हे कल्याण करने वाली देवि ! हे कामेशि ! हे त्रिलोक से परिपूजित ! हे अनन्त ब्रह्माण्ड की निवासभूमि ! हे कैलास को उज्ज्वल शिखर बनाने वाली ! हे कालिका देवी ! हे कालरात्रि में स्थिति वाली ! हे महाकाल से सेवित देवि ! हे शब्द ब्रह्मस्वरूपा देवि ! आप आदरपूर्वक (ईश्वर एवं शक्ति के) काकिन्यष्टोत्तर सहस्रनाम-योगाख्य स्तोत्र कहने में समर्थ हैं ॥ १-३ ॥

अनन्तकोटिब्रह्माण्डं सारं परममङ्गलम् ॥ ३ ॥
ज्ञानसिद्धिकरं साक्षाद् अत्यन्तानन्दवर्धनम् ।
सङ्केतशब्दमोक्षार्थं[३] काकिनीश्वरसंयुतम् ॥ ४ ॥

यह सहस्रनाम योग नामक स्तोत्र अनन्त कोटिब्रह्माण्ड का सार स्वरूप है और परम मङ्गल कारक है । यह स्तोत्र ज्ञान की सिद्धि प्रदान करने वाला, साक्षात् रूप से अत्यन्त आनन्द को बढ़ाने वाला, संकेत रूप शब्द के द्वारा मोक्ष प्रदान करने वाला और काकिनी देवी एवं ईश्वर से संयुक्त है ॥ ३-४ ॥

परानन्दकरं ब्रह्म निर्वाणपदलालितम्[४] ।
स्नेहादभिसुखानन्दादादौ[५] ब्रह्म वरानने ॥ ५ ॥
इच्छामि सर्वदा मातर्जगतां सुरसुन्दरि ।
स्नेहानन्दरसोद्रेकसम्बन्धान्[६] कथय द्रुतम् ॥ ६ ॥

---

१. आनन्द—ख० ।
२. इदं पद्यार्ध ख० पु० नास्ति ।
३. शङ्केत—क० ।
४. मादितमिति—क० ।
५. स्नेहादतिसुखा .... श्रोतुं वरानने—ख० ।
६. सम्बन्धान्कवचं द्रुतमिति—ख० ।—स्नेहेनानन्दः स्नेहानन्दः, स चासौ रसश्च तस्योद्रेको वर्धनम्, तेन जनिताः सम्बन्धास्तान् । स्नेहानन्दः सत्त्वगुणजनितो भवति, रजस्तमोभ्यां तु आनन्दस्य विखण्डनं भवति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यह सहस्रनाम उत्कृष्ट आनन्द को देने वाला और ब्रह्मरूप निर्वाण के पद को प्राप्त कराने वाला है । अतः हे वरानने ! पहले स्नेहपूर्वक आपके मुख से आनन्द रूप सुख को देने वाले स्तोत्र को मैं सुनना चाहता हूँ । हे सुरसुन्दरि ! हे जगत् की माता ! सर्वदा जीव का कल्याण करने वाली आप स्नेह रूप आनन्द रस से पूर्ण सहस्रनाम स्तोत्र को शीघ्र कहिए ॥ ५-६ ॥

श्रीआनन्दभैरवी उवाच

ईश्वर श्रीनीलकण्ठ नागमालाविभूषित ।
नागेन्द्रचित्रमालाढ्य नागाधिपरमेश्वर ॥ ७ ॥
काकिनीश्वरयोगाढ्यं सहस्रनाम मङ्गलम् ।
अष्टोत्तरं[1] वृताकारं कोटिसौदामिनीप्रभम् ॥ ८ ॥
आयुरारोग्यजननं शृणुष्वावहितो मम ।

आनन्दभैरवी ने कहा—हे ईश्वर ! हे श्रीनीलकण्ठ ! हे नागमाला से विभूषित ! हे चित्र विचित्र नागेन्द्रों की मालाओं से समृद्ध ! हे नागाधिपरमेश्वर ! अष्टोत्तर सहस्रनाममङ्गल स्तोत्र काकिनी देवी और ईश्वर के संयुक्त नाम से समृद्ध है । यह वृत्ताकार और करोड़ों विद्युत् की प्रभा से सम्पन्न है । यह स्तोत्र अयुष्य को बढ़ाने वाला तथा आरोग्य प्रदान करने वाला है । इसे आप सावधान होकर मुझसे सुनें ॥ ७-९ ॥

अनन्तकोटिब्रह्माण्डसारं नित्यं परात्परम् ॥ ९ ॥
साधनं ब्रह्मणो ज्ञानं [2]योगानां योगसाधनम् ।
सार्वज्ञगुह्यसंस्कारं संस्कारादिफलप्रदम् ॥ १० ॥

यह स्तोत्र अनन्तकोटि ब्रह्माण्डों का सार स्वरूप है । यह सहस्रनामयोग नित्य एवं श्रेष्ठों में श्रेष्ठ है । यह स्तोत्र ब्रह्म-ज्ञान का साधन है और योगों का साधन भी है । यह सर्वज्ञता प्रदान करने वाला, रहस्य की बात का संस्कारक है और संस्कार आदि फलों को देने वाला है ॥ ९-१० ॥

वाञ्छासिद्धिकरं साक्षान्महापातकनाशनम् ।
महादारिद्र्यशमनं महैश्वर्यप्रदायकम् ॥ ११ ॥

यह सहस्रनामयोग सभी मनोरथों को सिद्ध करने वाला और साक्षात् रूप से महान् पापों को नष्ट करने वाला है । यह स्तोत्र साधक की दरिद्रता को नष्ट करने वाला और महान् ऐश्वर्यों को देने वाला है ॥ ११ ॥

जपेद्यः[3] प्रातरि प्रीतो मध्याह्नेऽस्तमिते रवौ ।
नमस्कृत्य जपेन्नाम ध्यानयोगपरायणः ॥ १२ ॥

इस स्तोत्र का जो साधक प्रातःकाल, मध्याह्न एवं सायंकाल नमस्कार करके

---

१. अष्टोत्तरं विभाकरमिति—क० । २. योगिनामिति—ख० ।
३. पठेद्य प्रातरुत्थाय .... मध्याह्ने वा तथाविधः—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत्यन्त प्रसन्नता पूर्वक ध्यान एवं योगपरायण होकर पाठ करता है (उसकी दरिद्रता नष्ट हो जाती है) ॥ १२ ॥

काकिनीश्वरसंयोगं ध्यानं ध्यानगुणोदयम् ।
आदौ ध्यानं समाचर्य निर्मलोऽमलचेतसा ॥ १३ ॥

काकिनी और ईश्वर का संयुक्त ध्यान और ध्यान में उनके गुणोदय इसमें विहित है । पहले इन दोनों का संयुक्त ध्यानकर विषयों से विमुख होकर निर्मल एवं (रागद्वेष रूप) मलरहित चित्त से इनकी पूजा करनी चाहिए ॥ १३ ॥

ध्यायेद् देवीं महाकालीं काकिनीं कालरूपिणीम् ।
परानन्दरसोन्मत्तां श्यामां कामदुघां पराम् ॥ १४ ॥
चतुर्भुजां खड्गचर्मवरपद्मधरां हराम्[1] ।
शत्रुक्षयकरीं रत्नाऽलङ्कारकोटिमण्डिताम् ॥ १५ ॥
तरुणानन्दरसिकां पीतवस्त्रां मनोरमाम् ।
केयूरहारललितां ताटङ्कद्वयशोभिताम् ॥ १६ ॥
ईश्वरीं कामरत्नाख्यां काकचञ्चुपुटाननाम् ।
सुन्दरीं वनमालाढ्यां चारुसिंहासनस्थिताम् ॥ १७ ॥
हृत्पद्म[2]कर्णिकामध्याकाशसौदामिनीप्रभाम् ।

इसके बाद महाकाली कालस्वरूपिणी काकिनी देवी का इस प्रकार ध्यान करना चाहिए ।

काकिनी का ध्यान—परमानन्द के रस में मग्न, श्याम वर्ण वाली, कामनाओं की पूर्ति करने वाली, श्रेष्ठ, चार भुजाओं वाली, हाथों में तलवार, ढाल, अभयमुद्रा और कमल धारण करने वाली, दुःखों का हरण करने वाली, शत्रु का विनाश करने वाली, करोड़ों रत्नों एवं अलङ्कारों से मण्डित, तरुण आनन्द में रस लेने वाली, पीले-पीले वस्त्रों को धारण करने वाली, मनोरमा, हाथ में बाजूबन्द एवं गले में हार पहने हुए, दोनों कानों में कुण्डलों से सुशोभित, ईश्वर की प्रिया, कामरत्न नाम वाली, कौऐ के चोंच के समान मुखमुद्रा वाली, सुन्दरी, वनमाला से सुशोभित, सुन्दर सिंहासन पर स्थित और योगियों के हृत्कमल की कर्णिका के बीच में आकाशीय विद्युत के समान प्रभा वाली महाकाली काकिनी का ध्यान करना चाहिए ॥ १४-१८ ॥

एवं ध्यात्वा पठेन्नाममङ्गलानि पुनः पुनः ॥ १८ ॥

इस प्रकार से ध्यान कर पुनः पुनः इस सहस्रनाम के मङ्गलदायक नामों को पढ़ना चाहिए ॥ १८ ॥

ईश्वरं कोटिसूर्याभं [3]ध्यायेद्धृदयमण्डले ।

---

१. परामिति—ख० ।—हरामिति पाठे हरतीति हरा, पचादजन्तता ज्ञेया। परामिति पाठे तु उत्कृष्टामित्यर्थो ज्ञेयः ।

२. हृत्पद्मकर्णिकामध्यकोटि सौदामिनि प्रभामिति—ख० । ३. हृन्मण्डले परम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चतुर्भुजं वीररूपं लावण्यं भावसम्भवम् ॥ १९ ॥
श्यामं हिरण्यभूषाङ्गं चन्द्रकोटिसुशीतलम् ।
अभयं वरदं पद्मं[1] महाखड्गधरं विभुम् ॥ २० ॥
किरीटिनं महाकायं स्मितहास्यं[2] प्रकाशकम् ।
हृदयाम्बुजमध्यस्थं नूपुरैरुपशोभितम् ॥ २१ ॥
कोटिकालानलं दीप्तं काकिनीदक्षिणस्थितम्[3] ।

ईश्वर का ध्यान—हृदय मण्डल में करोड़ों सूर्यों की प्रभा वाले, चतुर्भुज, वीररूप, लावण्य से युक्त, भावगम्य, श्याम वर्ण के, स्वर्ण से विभूषित अङ्गों वाले, करोड़ों चन्द्रों की कौमुदी से शीतल, अभय मुद्रा एवं वरमुद्रा धारण किए हुए, महान् तलवार एवं कमल को अपने हाथ में धारण करने वाले, सर्वत्र व्याप्त, मुकुट पहने हुए, महाकाय, स्मित हास वाले, (ज्ञान के) प्रकाशक, हृदय-कमल के मध्य स्थित, नूपुरों से सुशोभित, प्रलयकालीन अग्नियों के समान प्रदीप्त तथा दक्षिण भाग में आसीन काकिनी देवी से युक्त ईश्वर का ध्यान करना चाहिए ॥ १९-२२ ॥

एवं विचिन्त्य मनसा योगिनं[4] परमेश्वरम् ॥ २२ ॥
ततः पठेत् सहस्राख्यं[5] वदामि शृणु तत्प्रभो ॥ २३ ॥

इस प्रकार योगी को परमेश्वर का मन से ध्यान करके इस सहस्रनाम को पढ़ना चाहिए, जिसे हे प्रभो ! मैं कहती हूँ, आप कृपया सुनिए ॥ २२-२३ ॥

काकिनीश्वरसहस्रनामस्तोत्रम्

अस्य श्रीकाकिनीश्वरसहस्रनामस्तोत्रस्य ब्रह्माऋषिर्गायत्रीच्छन्दो जगदीश्वर काकिनी देवता निर्वाणयोगार्थ सिद्ध्यर्थे जपे[6] विनियोगः

विनियोग—इस काकिनी एवं ईश्वर से युक्त सहस्रनाम स्तोत्र के ऋषि ब्रह्मा हैं, गायत्री छन्द हैं तथा जगदीश्वर एवं काकिनी देवता हैं, इस स्तोत्र का निर्वाणयोगार्थ की सिद्धि के लिए विनियोग है ॥

ॐ ईश्वरः[7] काकिनीशान ईशान कमलेश्वरी ।
ईशः काकेश्वरीशानी[8] ईश्वरीशः कुलेश्वरी ॥ २४ ॥
ईशमोक्षः[9] कामधेनुः कपर्दीशः कपर्दिनी ।

---

१. पद्ममहा....ख० ।
२. स्मितहास्यप्रकाशकम्—ख० ।
३. दक्षिणे—ख० ।
४. योगिनाम्—ख० ।
५. सहस्रास्यम्—ख० ।
६. जपे—ख० पु० नास्ति ।
७. ॐ ॐ ईश्वरः काकिनीशा ईशानः कुलेश्वरी । ईशः साक्षी कामधेनुः कपर्दिर्न्नाकपद्मिनी—ख० ।
८. ईश सामर्थ्ये इत्यस्माद् धातोः 'स्थेशभासपिसकसो वरच्' इति कर्त्तरि वरच्, ततः प्रयोगे ङीष् ।
९. इदं पद्यार्ध ख० पुस्तके न दृश्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कौलः कुलीनान्तरगा कविः [१]काव्यप्रकाशिनी ॥ २५ ॥
कलादेशः सुकविता कारणः[२] करुणामयी ।
कञ्जपत्रेक्षणः काली कामः [३]कोलावलीश्वरी ॥ २६ ॥
किरातरूपी कैवल्या किरणः[४] कामनाशना ।
कार्णाटेशः[५] सकर्णाटी कलिकः कालिकापुटा ॥ २७ ॥
किशोरः कीशुनमिता[६] केशवेशः कुलेश्वरी ।
केशकिञ्जल्ककुटिलः[७] कामराजकुतूहला[८] ॥ २८ ॥
करकोटिधरः कूटा क्रियाक्रूरः क्रियावती ।
कुम्भहा[९] कुम्भहन्त्री च कटकच्छकलावती ॥ २९ ॥
कञ्जवक्त्रः[१०] कालमुखी कोटिसूर्यकरानना ।
कम्रः कलपः समृद्धिस्था कुपोऽन्तस्थः कुलाचला ॥ ३० ॥

१. ॐईश्वर, काकिनीशान, ईशान, कमलेश्वरी, ईश, काकेश्वरीशानी, ईश्वरीश, कुलेश्वरी, ईशमोक्ष, कामधेनु, कपर्दीश, कपर्दिनी, कौल, कुलीनान्तरगा, कवि, काव्यप्रकाशिनी, कलादेश, सुकविता, कारणकरुणामयी, कञ्जपत्रेक्षण, काली, कामकोलावलीश्वरी, किरातरूपी-कैवल्या, किरण, कामनाशना, कार्णाटेश, सकर्णाटी, कलिक, कालिकापुटा, किशोर, कीशुनमिता, केशवेश, कुलेश्वरी, केशकिञ्जल्ककुटिल, कामराजकुतूहला, करकोटिधर, कूटा, क्रियाक्रूर, क्रियावती, कुम्भहा, कुम्भहन्त्री, कटकच्छकलावती, कञ्जवक्त्र, कालमुखी, कोटिसूर्यकरानना, कम्र, कलप, समृद्धिस्था, कुपोऽन्तस्थ, कुलाचला ॥ २४-३० ॥

कुणपः[११] कौलपाकाशा स्वकान्तः कामवासिनी[१२] ।
सुकृतिः शाङ्करी विद्या [१३]कलकः कलनाश्रया ॥ ३१ ॥
कर्कन्धुस्थः[१४] कौलकन्या कुलीनः कन्यकाकुला ।
कुमारः केशरी विद्या कामहा कुलपण्डिता ॥ ३२ ॥

---

१. कविकाव्य ... ख० ।
२. कारणा—ख० ।
३. कौलावली—ख० ।
४. केवलं कमलासना—ख० ।
५. किन्नटेशः सुकेशाक्षी कपिलः कलिप्रस्फुटः—ख० ।
६. कीशरसिका कौलकेशः—ख० ।
७. केशकिञ्जल्को जटिलः—ख० ।—केशानां किञ्जल्कोऽस्यास्ति स केशकिञ्जल्की । अत इनिः । षष्ठीतत्पुरुषे सति मत्वर्थीय इनिः ।
८. बीज—ख० ।
९. कष्टहा कुष्ठहन्त्री च कटकास्या कलावती—ख० ।
१०. कम्नवक्रः कामसुखी कोटिसूर्यवरानना—ख० ।
कम्पः कम्पसुबुद्धिस्थः कल्पान्तस्थः—ख० ।
११. कुलपः—ख० ।
१२. काञ्ची—ख० ।
१३. कामहा कुलपण्डिता—ख० ।—कामे वास इति कामवासः, सोऽस्या अस्ति सा । कामाधिष्ठात्री इत्यर्थः ।
१४. अयं श्लोकः ख० पु० नास्ति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कल्कीशः[१] कमनीयाङ्गी कुशलः कुशलावती ।
केतकीपुष्पमालाढ्यः केतकीकुसुमान्विता ॥ ३३ ॥
कुसुमानन्दमालाढ्यः कुसुमामलमालिका ।
कवीन्द्रः काव्यसम्भूतः काममञ्जीररञ्जिनी ॥ ३४ ॥
कुशासनस्थः कौशल्याकुलपः कल्पपादपा ।
कल्पवृक्षः कल्पलता विकल्पः कल्पगामिनी ॥ ३५ ॥

कुणप, कौलपाकाशा, स्वकान्त, कामवासिनी, सुकृति, शाङ्करी, विद्याकलक, कलनाश्रया, कर्कन्धुस्थ, कौलकन्या, कुलीन, कन्यकाकुला, कुमार, केशरी, विद्या, कामहा, कुलपण्डिता, कल्कीश, कमनीयाङ्गी, कुशल, कुशलावती, केतकीपुष्पमालाढ्या, केतकीकुसुमान्विता, कुसुमानन्दमालाढ्या, कुसुमामलमालिका, कवीन्द्र, काव्यसम्भूत, काममञ्जीररञ्जिनी, कुशासनस्थ, कौशल्याकुलप, कल्पपादपा, कल्पवृक्ष, कल्पलता, विकल्प, कल्पगामिनी ॥ ३१-३५ ॥

कठोरस्थः[२] काचनिभा करालः कालवासिनी ।
कालकूटाश्रयानन्दः कर्कशाकाशवाहिनी ॥ ३६ ॥
कटधूमाकृतिच्छायो[३] विकटासनसंस्थिता ।
कायधारी[४] कूपकरी करवीरागतः[५] कृषी ॥ ३७ ॥
कालगम्भीरनादान्ता[६] विकलालापमानसा[७] ।
प्रकृतीशः[८] सत्प्रकृतिः प्रकृष्टः कर्षिणीश्वरी ॥ ३८ ॥
भगवान् वारुणीवर्णा विवर्णो वर्णरूपिणी[९] ।
सुवर्णवर्णो हेमाभो महान्[१०] महेन्द्रपूजिता ॥ ३९ ॥
महात्मा महतीशानी महेशो मत्तगामिनी ।
महावीरो महावेगा महालक्ष्मीश्वरो मतिः ॥ ४० ॥

कठोरस्थ, काचनिभा, कराल, कालवासिनी, कालकूटाश्रयानन्द, कर्कशाकाशवाहिनी, कटधूमाकृतिच्छाया, विकटासनसंस्थिता, कायधारी, कूपकरी, करवीरागत, कृषी, कालगम्भीरनादान्ता, विकलालपमानसा, प्रकृतीश, सत्प्रकृति, प्रकृष्ट, कर्षिणीश्वरी, भगवान्, वारुणीवर्णा, विवर्ण, वर्णरूपिणी, सुवर्णवर्ण, हेमाभ, महान्, महेन्द्रपूजिता, महात्मा, महतीशानी, महेश, मत्तगामिनी, महावीर, महावेगा, महालक्ष्मीश्वर, मति ॥ ३६-४० ॥

---

१. कंकेशः।—कर्कः शुक्लोऽश्वः । सोऽस्यास्ति स कर्की, रलयोरभेदे लत्वम्। स चासौ ईशश्चेति कर्मधारयः । कल्की इति कलियुगान्ते भगवदवतारः ।
२. कठिनमा—ख० ।
३. छाया—ख० ।
४. काल—ख० ।
५. भगः कृषा—ख० ।
६. नादन्तो—ख० ।
७. मानुषा—ख० ।
८. प्रकृतिस्थः—ख० ।
९. वर्णो वर्णस्वरूपिणी—ख० ।
१०. महामहेन्द्र—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महादेवो महादेवी महानन्दो महाकला ।
महाकालो महाकाली महाबलो महाबला ॥ ४१ ॥
महामान्यो महामान्या महाधन्यो[१] महाधनी ।
महामालो महामाला महाकाशो महाकाशा[२] ॥ ४२ ॥
महायशो[३] महायज्ञा महाराजो महारजा[४] ।
महाविद्यो महाविद्या महामुख्यो महामखी[५] ॥ ४३ ॥
महारात्रो महारात्रिर्महाधीरो[६] महाशया ।
महाक्षेत्रो महाक्षेत्रा कुरुक्षेत्रः कुरुप्रिया ॥ ४४ ॥
महाचण्डो महोग्रा च महामत्तो महामतिः ।
महावेदो महावेदा महोत्साहो महोत्सवा ॥ ४५ ॥

महादेव, महादेवी, महानन्द, महाकला, महाकाल, महाकाली, महाबल, महाबला, महामान्य, महामान्या, महाधन्य, महाधनी, महामाल, महामाला, महाकाश, महाकाशा, महायश, महायज्ञा, महाराज, महारजा, महाविद्य, महाविद्या, महामुख्य, महामखी, महारात्र, महारात्रिर्महाधीर, महाशया, महाक्षेत्र, महाक्षेत्रा, कुरुक्षेत्र, कुरुप्रिया, महाचण्ड, महोग्रा, महामत्त, महामति, महावेद, महावेदा, महोत्साह, महोत्सवा ॥ ४१-४५ ॥

महाकल्पो महाकल्पा महायोगो[७] महागतिः ।
महाभद्रो महाभद्रा महासूक्ष्मो महाचला ॥ ४६ ॥
महावाक्यो महावाणी महायज्वा[८] महाजवा ।
महामूर्तिमहाकान्ता[९] महाधर्मो महाधना[१०] ॥ ४७ ॥
महामहोग्रो महिषी महाभोग्यो[११] महाप्रभा ।
महाक्षेमो[१२] महामाया महामाया महारमा ॥ ४८ ॥
महेन्द्रपूजिता माता विभालो[१३] मण्डलेश्वरी ।
महाविकालो[१४] विकला प्रतलस्थललामगा[१५] ॥ ४९ ॥
कैवल्यदाता कैवल्या कौतुकस्थो विकर्षिणी[१६] ।
वालाप्रतिर्वालपत्नी[१७] बलरामो वलाङ्गजा ॥ ५० ॥

---

१. महाधन्या—ख० ।—प्रकरणदृष्ट्या तु 'महाधन्या' इत्येव पाठो युक्ततरः प्रतिभाति, धनमैश्वर्यं लब्धवती धन्या, महती चासौ धन्या चेति विशेषणसमासः ।
२. महावियत्—ख० ।
३. महायज्ञो—ख० ।
४. महेश्वरी—ख० ।
५. महामुखी—ख० ।
६. महारात्री—क० ।
७. महायोगी—ख० ।
८. महाजल्पा महाज्वली—ख० ।
९. महामूर्ति महाकान्तो—ख० ।
१०. महाधमा—क० ।
११. महाभाग्यो—ख० ।
१२. महाक्षोमो—क० ।
१३. विभाण्डो—ख० ।
१४. महाविकारी—ख० ।
१५. प्रवलस्यः स्यलायता—ख० ।
१६. विकल्पिनी—ख० ।
१७. बाला पतिं बाला पानो पत्नी बालो—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महाकल्प, महाकल्पा, महायोगो, महागति, महाभद्र, महाभद्रा, महासूक्ष्म, महाचला, महावाक्य, महावाणी, महायज्वा महाजवा, महामूर्ति, महाकान्ता, महाधर्म, महाधना, महामहोग्र, महिषी, महाभोग्यो महाप्रभा, महाक्षेम, महामाया, महारमा, महेन्द्रपूजिता, माता, विभालो, मण्डलेश्वरी, महाविकाल, विकला, प्रतलस्थललामगा, कैवल्यदाता, कैवल्या, कौतुकस्थ, विकर्षिणी, वालाप्रति, वालपत्नी, बलराम, वलाङ्गजा ॥ ४६-५० ॥

अवलेशः[१] कामवीरा प्राणेशः प्राणरक्षिणी ।
पञ्चमाचारगः पञ्चापञ्चमः[२] पञ्चमीश्वरी ॥ ५१ ॥
प्रपञ्चः पञ्चरसगा[३] निष्प्रपञ्चः कृपामयी ।
कामरूपी कामरूपा कामक्रोधविवर्जिता ॥ ५२ ॥
कामात्मा कामनिलया कामाख्या[४] कामचञ्चला ।
कामपुष्पधरः कामा कामेशः[५] कामपुष्पिणी ॥ ५३ ॥
महामुद्राधरो मुद्रा सन्मुद्रः काममुद्रिका[६] ।
चन्द्रार्धकृतभालाभो विधुकोटिमुखाम्बुजा ॥ ५४ ॥
चन्द्रकोटिप्रभाधारी चन्द्रज्योतिःस्वरूपिणी ।
सूर्याभो वीरकिरणा[७] सूर्यकोटिविभाविता[८] ॥ ५५ ॥

अवलेश, कामवीरा, प्राणेश, प्राणरक्षिणी, पञ्चमाचारग, पञ्चापञ्चम पञ्चमीश्वरी, प्रपञ्च, पञ्चरसगा, निष्प्रपञ्च, कृपामयी, कामरूपी, कामरूपा, कामक्रोधविवर्जिता, कामात्मा, कामनिलया, कामाख्या, कामचञ्चला, कामपुष्पधर, कामा, कामेश, कामपुष्पिणी, महामुद्राधर, मुद्रा, सन्मुद्र, काममुद्रिका, चन्द्रार्धकृतभालाभ, विधुकोटिमुखाम्बुजा, चन्द्रकोटिप्रभाधारी, चन्द्रज्योतिस्वरूपिणी, सूर्याभ, वीरकिरणा, सूर्यकोटिविभाविता ॥ ५१-५५ ॥

मिहिरेशो[९] मानवका अन्तर्ग्गामी[१०] निराश्रया ।
प्रजापतीशः कल्याणी[११] दक्षेशः कुलरोहिणी ॥ ५६ ॥
अप्रचेताः[१२] प्रचेतस्था व्यासेशो व्यासपूजिता ।
काश्यपेशः काश्यपेशी भृग्वीशो[१३] भार्गवेश्वरी ॥ ५७ ॥

---

१. अवनीशः कालवीरा—ख० । २. प्रपञ्चः—ख० ।
३. रसना—ख० । ४. कामाख्यः—ख० ।
५. कटकस्यः कलावती—ख० ।
६. कम्रवक्रः काममुखी कोटिसूर्यकराननना । कुनपः कीलपाकाशा सुकान्तः काञ्चवासिनी ॥ सुकृतिः शाङ्करी विन्ध्या कामहा कुलपालिता । ख० ।
७. सूर्याभः सूर्यकिरणा—ख० ।
८. विभासिता—ख० ।—सूर्याणां कोटयस्ताभिर्विभाविता ।
९. महेन्द्रेणो मीनवक्रा—ख० । १०. अन्तर्यामी—ख० ।
११. श्रीकन्या—ख० ।
१२. स्वचेतः स्यःस्वचेतः स्था—ख० ।—अविद्यमानं प्रचेतो यस्य सः ।
१३. भृगुपः—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वशिष्ठः प्रियभावस्थो वशिष्ठबाधितापरा ।
पुलस्त्यपूजितो देवः पुलस्त्यचित्तसंस्थिता ॥ ५८ ॥
अगस्त्यार्च्योऽगस्त्यमाता प्रह्लादेशो वलीश्वरी ।
कर्दमेशः कर्दमाद्या बालको बालपूजिता ॥ ५९ ॥
मनस्थश्चान्तरिक्षस्था शब्दज्ञानी सरस्वती ।
रूपातीता[१] रूपशून्या विरूपो रूपमोहिनी ॥ ६० ॥

मिहिरेश, मानवका, अन्तर्गामी निराश्रया, प्रजापतीश, कल्याणी दक्षेश, कुलरोहिणी, अप्रचेता प्रचेतस्था, व्यासेश, व्यासपूजिता, काश्यपेश, काश्यपेशी, भृग्वीश, भार्गवेश्वरी, वशिष्ठ, प्रियभावस्थ, वशिष्ठबाधितापरा, पुलस्त्यपूजित, देव, पुलस्त्यचित्तसंस्थिता, अगस्त्यार्च्योऽगस्त्यमाता, प्रह्लादेश, वलीश्वरी, कर्दमेश, कर्दमाद्या, बालक, बालपूजिता, मनस्थश्चान्तरिक्षस्था, शब्दज्ञानी, सरस्वती, रूपातीतारूपशून्या, विरूप, रूपमोहिनी ॥ ५६-६० ॥

विद्याधरेशो विद्येशी वृषस्थो वृषवाहिनी[२] ।
रसज्ञो रसिकानन्दा विरसो रसवर्जिता ॥ ६१ ॥
सौनः सनत्कुमारेशी योगचर्येश्वरः प्रिया ।
दुर्वाशाः[३] प्राणनिलयः साङ्ख्ययोगसमुद्भवा ॥ ६२ ॥
असङ्ख्येयो[४] मांसभक्षा सुमांसाशी मनोरमा ।
नरमांसविभोक्ता च नरमांसविनोदिनी ॥ ६३ ॥
मीनवक्त्रप्रियो[५] मीना मीनभुङ्मीनभक्षिणी ।
रोहिताशी मत्स्यगन्धा मत्स्यनाथो[६] रसापहा ॥ ६४ ॥
पार्वतीप्रेमनिकरो[७] विधिदेवाधिपूजिता ।
विधातृवरदो वेद्या वेदो वेदकुमारिका ॥ ६५ ॥

विद्याधरेश, विद्येशी, वृषस्थ, वृषवाहिनी, रसज्ञ, रसिकानन्दा, विरस, रसवर्जिता, सौन, सनत्कुमारेशी, योगचर्येश्वर, प्रिया, दुर्वाशा, प्राणनिलय, साङ्ख्ययोगसमुद्भवा, असङ्ख्यमांसभक्षा, सुमांसाशी, मनोरमा, नरमांसविभोक्ता, नरमांसविनोदिनी, मीनवक्त्रप्रिय, मीना, मीनभुङ्, मीनभक्षिणी, रोहिताशी, मत्स्यगन्धा, मत्स्यनाथ, रसापहा, पार्वतीप्रेमनिकर, विधिदेवाधिपूजिता, विधातृवरद, वेद्या, वेद, वेदकुमारिका ॥ ६१-६५ ॥

श्यामेशो सितवर्णा च चासितोऽसितरूपिणी ।
महामत्ताऽऽसवाशी च महामत्ताऽऽसवप्रिया ॥ ६६ ॥
आसवा[८]ढ्योऽमनादेवी निर्मलासवपामरा[९] ।

---

१. वाहना—ख० । २. मौनः ..... योगाचार्यो—ख० ।
३. दुर्वासा—ख० । ४. असङ्ख्या मांसभक्षा चेति—ख० ।
५. मत्स्यमत्तासवप्रिया—ख० । ६. पद्यार्ध ख० पु० नास्ति ।
७. पार्वतीप्रेमनिकर इत्यारभ्य महामत्तासवप्रियान्तं—श्लोकयुगलं—ख० पु० नास्ति ।
८. अमला—ख० । ९. सुप्रिया—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विसत्तो[१] मदिरामत्ता मत्तकुञ्जरगामिनी ॥ ६७ ॥
मणिमालाधरो मालामातृकेशः[२] प्रसन्नधीः ।
जरामृत्युहरो गौरी गायनस्थो जरामरा ॥ ६८ ॥
सुचञ्चलोऽतिदुर्धर्षा कण्ठस्थो हृद्गता[३] सती ।
अशोकः शोकरहिता मन्दरस्थो[४] हि मन्त्रिणी ॥ ६९ ॥
मन्त्रमालाधरानन्दो मन्त्रयन्त्रप्रकाशिनी ।
मन्त्रार्थचैतन्यकरो मन्त्रसिद्धिप्रकाशिनी ॥ ७० ॥

श्यामेश, सितवर्णा, असित, असितरूपिणी, महामत्ता, आसवाशी, महामत्ता, आसवप्रिया, आसवाढ्य, अमनादेवी, निर्मलासवपामरा, विसत्त, मदिरामत्ता, मत्तकुञ्जरगामिनी, मणिमालाधर, मालामातृकेश, प्रसन्नधी, जरामृत्युहर, गौरी, गायनस्थ, जरामरा, सुचञ्चल, अतिदुर्धर्षा, कण्ठस्थ, हृद्गता, सती, अशोक, शोकरहिता, मन्दरस्थ, मन्त्रिणी, मन्त्रमालाधारानन्द, मन्त्र- यन्त्र-प्रकाशिनी, मन्त्रार्थचैतन्यकर, मन्त्रसिद्धिप्रकाशिनी ॥ ६६-७० ॥

मन्त्रज्ञो मन्त्रनिलया [५]मन्त्रार्था मन्त्रमन्त्रिणी ।
बीजध्यानसमन्तस्था मन्त्रमालेऽतिसिद्धिदा ॥ ७१ ॥
मन्त्रवेत्ता मन्त्रसिद्धिर्मन्त्रस्थो मान्त्रिकान्तरा ।
बीजस्वरूपो बीजेशी बीजमालेऽति[६] बीजिका ॥ ७२ ॥
बीजात्मा बीजनिलया बीजाढ्या[७] बीजमालिनी ।
बीजध्यानो बीजयज्ञा बीजाढ्या बीजमालिनी[८] ॥ ७३ ॥
महाबीजधरो[९] बीजा बीजाढ्या बीजवल्लभा ।
मेघमाला मेघमालो वनमाली हलायुधा ॥ ७४ ॥
कृष्णाजिनधरो रौद्रा रौद्रा[१०] रौद्रगणाश्रया ।
रौद्रप्रियो रौद्रकर्त्री रौद्रलोकप्रदः[११] प्रभा ॥ ७५ ॥

मन्त्रज्ञ, मन्त्रनिलया, मन्त्रार्था, मन्त्रमन्त्रिणी, बीजध्यानसमन्तस्था, मन्त्रमालेऽतिसिद्धिदा, मन्त्रवेत्ता, मन्त्रसिद्धि, मन्त्रस्थ, मान्त्रिकान्तरा, बीजस्वरूप, बीजेशी, बीजमालेऽति, बीजिका, बीजात्मा, बीजनिलया, बीजाढ्या, बीजमालिनी, बीजध्यान, बीजयज्ञा, बीजाढ्या, बीजमालिनी, महाबीज- धर, बीजा, बीजाढ्या, बीजवल्लभा, मेघमाला, मेघमाल, वनमाली, हलायुधा, कृष्णाजिनधर, रौद्रा, रौद्रारौद्रगणाश्रया, रौद्रप्रिय, रौद्रकर्त्री, रौद्रलोकप्रद, प्रभा ॥ ७१-७५ ॥

---

१. विमुक्तो—ख० । २. महाकेशः—ख० ।
३. कण्ठस्य हृद्गता—ख० ।—प्रकरणदृष्ट्या 'कण्ठस्थः' इत्येव पाठो युक्तः । कण्ठे तिष्ठतीति कण्ठस्थो भगवान् शिवः । ४. मन्त्रस्थो यतिमन्त्रिणी—ख० ।
५. मन्त्रार्था—क० । ६. बीजमालातिबीजिका—ख० ।
७. बीजगो—ख० । ८. बीजसुन्दरी—ख० ।
९. बीजतातो बीजमाता बीजज्ञो बीजमालिनी ।,ख० पु० नास्ति ।
१०. रुद्रो रुद्रगणप्रिया—ख० । ११. रुद्रलोकप्रदः प्रभो—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विनाशी सर्वगानां[१] च सर्वाणी सर्वसम्पदा ।
नारदेशः प्रधानेशी वारणेशो[२] वनेश्वरी ॥ ७६ ॥
कृष्णेश्वरः केशवेशी कृष्णवर्णस्त्रिलोचना[३] ।
कामेश्वरो[४] राघवेशी बालेशी वा बाणपूजितः ॥ ७७ ॥
भवानीशो भवानी च भवेन्द्रो भववल्लभा ।
भवानन्दोऽतिसूक्ष्माख्या भवमूर्तिर्भवेश्वरी ॥ ७८ ॥
भवच्छायो भवानन्दो भवभीतिहरो वला ।
भाषाज्ञानीभाषमाला[५] महाजीवोऽतिवासना ॥ ७९ ॥
लोभापम्दो लोभकर्त्री प्रलोभो लोभवर्धिनी ।
मोहातीतो मोहमाता मोहजालो महावती[६] ॥ ८० ॥

विनाशी, सर्वगानां, सर्वाणी, सर्वसम्पदा, नारदेश, प्रधानेशी, वारणेश, वनेश्वरी, कृष्णेश्वर, केशवेशी, कृष्णवर्णः, त्रिलोचना, कामेश्वर, राघवेशी, बालेशी, बाणपूजित, भवानीश, भवानी, भवेन्द्र, भववल्लभा, भवानन्द, अतिसूक्ष्माख्या, भवमूर्ति, भवेश्वरी, भवच्छाय, भवानन्द, भवभीतिहर, वला, भाषाज्ञानीभाषमाला, महाजीवोऽतिवासना, लोभापम्द, लोभकर्त्री, प्रलोभ, लोभवर्धिनी, मोहातीत, मोहमाता, मोहजाल, महावती ॥ ७६-८० ॥

मोहमुद्गरधारी[७] च मोहमुद्गरधारिणी ।
मोहान्वितो[८] मोहमुग्धा कामेशः कामिनीश्वरी ॥ ८१ ॥
कामलापकरोऽकामा[९] सत्कामो कामनाशिनी ।
बृहन्मुखो[१०] बृहन्नेत्रा पद्माभोऽम्बुजलोचना ॥ ८२ ॥
पद्ममालः पद्ममाला श्रीदेवो देवरक्षिणी ।
असितोऽप्यसिता चैव आह्लादो[११] देवमातृका ॥ ८३ ॥
नागेश्वरः शैलमाता नागेन्द्रो वै नगात्मजा ।
नारायणेश्वरः कीर्तिः सत्कीर्तिः कीर्तिवर्धिनी ॥ ८४ ॥
कार्तिकेशः[१२] कार्तिकी च विकर्ता गहनाश्रया ।
विरक्तो[१३] गरुडारूढा गरुडस्थो हि गारुडी ॥ ८५ ॥

---

१. सर्वगतानां शर्वाणी सर्वसम्पदाम्—ख० । २. रावणेशो रणेश्वरी—ख० ।
३. कृष्णवर्णोऽतितिचञ्चलः—ख० । पाठद्वयमपि युक्तं प्रतिभाति । कृष्णवर्णः श्रीशिवः, त्रिलोचना भगवती । क्षीरसागराद् विनिःसृतस्य विषस्य पानेन भगवान् शिवो नीलकण्ठ इत्युच्यते । ४. रामेश्वरो रामवेशी बाणेशो बाणपूजिता—ख० ।
५. भाषमाना महाजिह्वोऽतिवामना—ख० । ६. अमरावती—ख० ।
७. मोहमुद्गरक्षो बीजा—ख० । ८. महान्वितो महामुक्ता—ख० ।
९. कामलोपकरो.....सत्कामा—ख० । १०. बृहन्मख—क० ।
११. साह्लादी नाशमातृका—ख० । १२. कृत्तिवेशः ..... कलहप्रिया—ख० ।
१३. विरक्त इत्यारभ्य प्राङ्गणेश्वरी इत्यन्तं—ख० पु० नास्ति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मोहमुद्गरधारी, मोहमुद्गरधारिणी, मोहान्वित, मोहमुग्धा, कामेश, कामिनीश्वरी, कामलापकर, अकामा, सत्काम, कामनाशिनी, बृहन्मुख, बृहन्नेत्रा, पद्माभ, अम्बुजलोचना, पद्ममाल, पद्ममाला, श्रीदेव, देवरक्षिणी, असित, असिता, आह्लाद, देवमातृका, नागेश्वर, शैलमाता, नागेन्द्र, नगात्मजा, नारायणेश्वर, कीर्ति, सत्कीर्ति, कीर्तिवर्धिनी, कार्तिकेश, कार्तिकी, विकर्ता, गहनाश्रया, विरक्त, गरुडारूढा, गरुडस्थ, गारुडी ॥ ८१-८५ ॥

गरुडेशो गुरुमयी गुरुदेवो गुरुप्रदा ।
गौराङ्गेशो गौरकन्या गङ्गेशः प्राङ्गणेश्वरी ॥ ८६ ॥
प्रतिकेशो[१] विशाला च निरालोको निरीन्द्रिया ।
प्रेतबीजस्वरूपश्च प्रेताऽलङ्कारभूषिता ॥ ८७ ॥
प्रेमगेहः[२] प्रेमहन्त्री हरीन्द्रो हरिणेक्षणा ।
कालेशः कालिकेशानी कौलिकेशश्च काकिनी ॥ ८८ ॥
कालमञ्जीरधारी च कालमञ्जीरमोहिनी ।
करालवदनः काली कैवल्यदानदः कथा[३] ॥ ८९ ॥
कमलापालकः कुन्ती कैकेयीशः सुतः[४] कला ।
कालानलः[५] कुलज्ञा च कुलगामी कुलाश्रया ॥ ९० ॥

गरुडेश, गुरुमयी, गुरुदेव, गुरुप्रदा, गौराङ्गेश, गौरकन्या, गङ्गेश प्राङ्गणेश्वरी, प्रतिकेश, विशाला, निरालोक, निरीन्द्रिया, प्रेतबीजस्वरूप, प्रेताऽलङ्कारभूषिता, प्रेमगेह, प्रेमहन्त्री, हरीन्द्र, हरिणेक्षणा, कालेश, कालिकेशानी, कौलिकेश, काकिनी, कालमञ्जीरधारी, कालमञ्जीरमोहिनी, करालवदन, काली, कैवल्यदानद, कथा, कमलापालक, कुन्ती, कैकेयीश, सुत, कला, कालानल, कुलज्ञा, कुलगामी, कुलाश्रया ॥ ८६-९० ॥

कुलधर्मस्थितः कौला कुलमार्गः कुलातुरा[६] ।
कुलजिह्वः[७] कुलानन्दा[८] कृष्णः कृष्णसमुद्भवा[९] ॥ ९१ ॥
कृष्णेशः[१०] कृष्णमहिषी काकस्थः काकचञ्चुका ।
कालधर्मः कालरूपा कालः कालप्रकाशिनी ॥ ९२ ॥
कालजः कालकन्या[११] च कालेशः कालसुन्दरी ।
खड्गहस्तः खर्पराढ्या खरगः खरखड्गिनी[१२] ॥ ९३ ॥
खलबुद्धिहरः[१३] खेला खञ्जनेशः सुखाञ्जनी ।

---

१. प्रतिष्ठेश—ख० ।
२. प्रेमगः—ख० ।
३. सदा—ख० ।
४. कैकेयज्ञः सुतः—क० ।
५. कलाननहू—ख० ।
६. कुलान्तरा—ख० ।
७. कुलजिह्वा—ख० ।
८. कुलानन्दा—क० ।
९. तनूद्भवा इति—ख० ।
१०. कालानलः कृष्णकेशा काकुत्स्थ—ख० ।
११. कालजन्या—ख० ।
१२. खञ्जनी—ख० ।
१३. खरबुद्धि—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गीतप्रियो गायनस्था गणपालो गृहाश्रया[१] ॥ ९४ ॥
गर्गप्रियो[२] गयाप्राप्तिर्गर्गस्थो हि गभीरिणा ।
गारुडीशो[३] हि गान्धर्वी गतीशो गार्हवह्निजा ॥ ९५ ॥

कुलधर्मस्थित, कौला, कुलमार्ग, कुलातुरा, कुलजिह्व, कुलानन्दा, कृष्ण, कृष्णसमुद्भवा, कृष्णेश, कृष्णमहिषी, काकस्थ, काकचञ्चुका, कालधर्म, कालरूपा, काल, कालप्रकाशिनी, कालज, कालकन्या, कालेश, कालसुन्दरी, खड्गहस्त, खर्पराढ्या, खरग, खरखड्गिनी, खलबुद्धिहर, खेला, खञ्जनेश, सुखाञ्जनी, गीतप्रिय, गायनस्था, गणपाल, गृहाश्रया, गर्गप्रिय, गयाप्राप्ति, गर्गस्थ, गभीरिणा, गारुडीश, गान्धर्वी, गतीश, गार्हवह्निजा ॥ ९१-९५ ॥

गणगन्धर्वगोपालो गणगन्धर्वगो गता ।
गभीरमानी[४] सम्भेदो गभीरकोटिसागरा ॥ ९६ ॥
गतिस्थो गाणपत्यस्था[५] गणनाद्यो गवा तनूः ।
गन्धद्वारो गन्धमाला गन्धाढ्यो गन्धनिर्गमा ॥ ९७ ॥
गन्धमोहितसर्वाङ्गो गन्धचञ्चलमोहिनी[६] ।
गन्धपुष्पधूपदीपनैवेद्यादिप्रपूजिता ॥ ९८ ॥
गन्धागुरुसुकस्तूरी[७] कुङ्कुमादिविमण्डिता[८] ।
गोकुला मधुरानन्दा पुष्पगन्धान्तरस्थिता[९] ॥ ९९ ॥
गन्धमादनसम्भूतपुष्पमाल्यविभूषितः[१०] ।
रत्ना[११]द्यशेषालङ्कारमालामण्डितविग्रहः ॥ १०० ॥

गणगन्धर्वगोपाल, गणगन्धर्वग, गता, गभीरमानी, सम्भेद, गभीरकोटिसागरा, गतिस्थ, गाणपत्यस्था, गणनाद्य, गवा, तनू, गन्धद्वार, गन्धमाला, गन्धाढ्य, गन्धनिर्गमा, गन्धमोहितसर्वाङ्गी, गन्धचञ्चलमोहिनी, गन्धपुष्पधूपदीपनैवेद्यादिप्रपूजिता, गन्धागुरुसुकस्तूरी, कुङ्कुमादिविमण्डिता, गोकुला, मधुरानन्दा, पुष्पगन्धान्तरस्थिता, गन्धमादनसम्भूतपुष्पमाल्यविभूषित, रत्नाद्यशेषालङ्कारमालामण्डितविग्रह ॥ ९६-१०० ॥

स्वर्णाद्यशेषालङ्कारहारमालाविमण्डिता ।
करवीरा[१२]युतप्रख्यरक्तलोचनपङ्कजः ॥ १०१ ॥
जवाकोटिकोटिशत चारुलोचनपङ्कजा ।
घनकोटिमहानास्य[१३] पङ्कजालोलविग्रहा ॥ १०२ ॥

---

१. गणाधीशो गुहप्रिया—ख० ।
२. गमप्राप्ति ..... गकीरिणी—ख० ।
३. गारुडेशो हि गन्धर्वपती—ख० ।
४. नाद ..... ख० ।
५. गाणपतयस्थो—ख० ।
६. चन्दन—ख० ।
७. चन्दनागुरु—ख० ।
८. सुमण्डिता—ख० ।
९. स्थित—ख० ।
१०. विभूषिता—ख० ।
११. मणि—ख० ।
१२. कुसुमप्रख्या—ख० ।
१३. समानास्य—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

घर्घरध्वनिमानन्दकाव्याम्बुधिमुखाम्बुजा ।
घोरचित्रसर्पराज मालाकोटिशताङ्कभृत् ॥ १०३ ॥
घनघोरमहानाग[1] चित्रमालाविभूषिता ।
घण्टाकोटिमहानादमानन्दलोलविग्रहः ॥ १०४ ॥
घण्टाडमरुमन्त्रादि[2]ध्यानानन्दकराम्बुजा ।
घटकोटिकोटिशतसहस्रमङ्गलासना[3] ॥ १०५ ॥

स्वर्णाद्यशेषालङ्कारहारमालाविमण्डिता, करवीरायुतप्रख्यरक्तलोचनपङ्कज, जवाकोटिकोटिशतचारुलोचनपङ्कजा, घनकोटिमहानास्य, पङ्कजालोलविग्रहा, घर्घरध्वनिमानन्दकाव्याम्बुधिमुखाम्बुजा, घोरचित्रसर्पराज, मालाकोटिशताङ्कभृत्, घनघोरमहानाग, चित्रमालाविभूषिता, घण्टाकोटिमहानादमानन्दलोलविग्रह, घण्टाडमरुमन्त्रादिध्यानानन्दकराम्बुजा, घटकोटिकोटिशतसहस्रमङ्गलासना ॥ १०१-१०५ ॥

घण्टाशङ्खपद्मचक्रवराभयकराम्बुजा ।
घातको रिपुकोटीनां शुम्भादीनां[4] तथा सताम् ॥ १०६ ॥
घातिनीदैत्यघोराश्च[5] शङ्खानां सततं तथा ।
चार्वाकमतसङ्घातचतुराननपङ्कजः ॥ १०७ ॥
चञ्चलानन्दसर्वार्थसारवाग्वादिनीश्वरी ।
चन्द्रकोटिसुनिर्माल[6] मालालम्बितकण्ठभृत् ॥ १०८ ॥
चन्द्रकोटिसमानस्य पङ्केरुहमनोहरा ।
चन्द्रज्योत्स्नायुतप्रख्यहारभूषितमस्तकः ॥ १०९ ॥
चन्द्र[7]बिम्बसहस्राभायुतभूषितमस्तकः[8] ।
चारुचन्द्रकान्तमणिमणिहारायुताङ्गभृत् ॥ ११० ॥

घण्टाशङ्खपद्मचक्रवराभयकराम्बुजा, रिपुकोटीनां, घातक, शुम्भादीनां, सताम्, घातिनीदैत्यघोरा, चार्वाकमतसङ्घातचतुराननपंकज, चञ्चलानन्दसर्वार्थसारवाग्वादिनीश्वरी, चन्द्रकोटिसुनिर्माल, मालालम्बितकण्ठभृत्, चन्द्रकोटिसमानस्य, पङ्केरुहमनोहरा, चन्द्रज्योत्स्नायुतप्रख्यहारभूषितमस्तक, चन्द्रबिम्बसहस्राभायुतभूषितमस्तक, चारुचन्द्रकान्तमणिमणिहारायुताङ्गभृत् ।

चन्दनागुरुकस्तूरी — कुङ्कुमासक्तमालिनी ।
चण्डमुण्डमहामुण्डायुतनिर्मलमाल्यभृत्[9] ॥ १११ ॥
चण्ड[10]मुण्डघोरमुण्डनिर्माणकुलमालिनी[11] ।

---

१. ख० पु० नास्ति । २. यन्त्रादि—ख० ।
३. पद्यार्ध ख० पु० नास्ति । ४. कुम्भादीनां तथा सती—ख० ।
५. घोरात्मभयानां नाशिनी तथा सर्वशत्रुविनाशाय..... ख० ।
६. निर्माण—क० । ७. चन्द्र—ख० ।
८. मस्तका—ख० । ९. निर्माल्य—ख० ।
१०. महामुण्ड—ख० । ११. निर्माल्य—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चण्डाट्टहासघोराढ्यवदनाम्भोजचञ्चलः ॥ ११२ ॥
चलत्खञ्जननेत्राम्भोरुहमोहितशङ्करा[1] ।
चलदम्भोजनयनानन्दपुष्पकरमोहितः ॥ ११३ ॥
चलदिन्दुभाषमाणावग्रहखेदचन्द्रिका[2] ।
चन्द्रार्धकोटिकिरणचूडामण्डलमण्डितः ॥ ११४ ॥
चन्द्रचूडाम्भोजमाला उत्तमाङ्गविमण्डितः[3] ।
चलदर्कसहस्रान्त[4] रत्नहारविभूषितः ॥ ११५ ॥

चन्दनागुरुकस्तूरी-कुङ्कुमासक्तमालिनी, चण्डमुण्डमहामुण्डायुतनिर्मलमाल्यभृत्, चण्डमुण्ड-घोरमुण्डनिर्माणकुलमालिनी, चण्डाट्टहासघोराढ्यवदनाम्भोजचञ्चल, चलत्खञ्जननेत्राम्भोरुह-मोहितशङ्करा, चलदम्भोजनयनानन्दपुष्पकरमोहित, चलदिन्दुभाषमाणावग्रहखेदचन्द्रिका, चन्द्रार्ध-कोटिकिरणचूडामण्डलमण्डित, चन्द्रचूडाम्भोजमाला, उत्तमाङ्गविमण्डित, चलदर्कसहस्रान्त, रत्नहारविभूषित ॥ १११-११५ ॥

चलदर्ककोटिशतमुखाम्भोजतपोज्ज्वला[5] ।
चारुरत्नासनाम्भोजचन्द्रिकामध्यसंस्थितः ॥ ११६ ॥
चारुद्वादशपत्रादि[6] कर्णिकासुप्रकाशिका ।
चमत्कार —[7]ग—टङ्कारधुनर्बाणकराम्बुजः ॥ ११७ ॥
चतुर्थवेदगाथादि स्तुतिकोटिसुसिद्धिदा ।
चलदम्बुजनेत्रार्कवह्निचन्द्रत्रयान्वितः ॥ ११८ ॥
चलत्सहस्रसङ्ख्यात[8] पङ्कजादिप्रकाशिका ।
चमत्काराट्टहासास्य स्मितपङ्कजराजयः ॥ ११९ ॥
चमत्कारमहाघोरसाट्टाट्टहासशोभिता ।
छायासहस्रसंसारशीतलानिलशीतलः ॥ १२० ॥

चलदर्ककोटिशतमुखाम्भोजतपोज्ज्वला, चारुरत्नासनाम्भोजचन्द्रिकामध्यसंस्थित, चारुद्वादश-पत्रादिकर्णिकासुप्रकाशिका, चमत्कारागटङ्कारधुनर्बाणकराम्बुज, चतुर्थवेदगाथादि, स्तुतिकोटिसु-सिद्धिदा, चलदम्बुजनेत्रार्कवह्निचन्द्रत्रयान्वित, चलत्सहस्रसङ्ख्यात-पङ्कजादिप्रकाशिका, चमत्काराट्टहासास्य, स्मितपङ्कजराजय, चमत्कारमहाघोरसाट्टाट्टहासशोभिता, छायासहस्र-संसारशीतलानिलशीतल ॥ ११६-१२० ॥

छदपद्मप्रभामानसिंहासनसमास्थिता ।
छलत्कोटिदैत्यराजमुण्डमालाविभूषितः ॥ १२१ ॥

---

१. शङ्करः—ख० । २. स्वेद—ख० ।
३. विमण्डिता—ख० । ४. सहस्राभ—ख० ।
५. भयोज्वला—ख० । ६. पुत्रादि—ख० ।
७. चमत्कारघटाङ्कारवधूर्बालकराम्बुजः—ख० ।
८. चलस्त्रदलपङ्केरुहादिप्रकाशिका—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

छिन्नादिकोटिमन्त्रार्थज्ञानचैतन्यकारिणी ।
चित्रमार्गमहाध्वान्तग्रन्थिसम्भेदकारकः ॥ १२२ ॥
अस्त्रकास्त्रादिब्रह्मास्त्रसहस्रकोटिधारिणी ।
अजामांसादिसद्भक्ष-रसामोदप्रवाहगः ॥ १२३ ॥
छेदनादिमहोग्रास्त्रे भुजवामप्रकाशिनी ।
जयाख्यादिमहासाम ज्ञानार्थस्य प्रकाशकः ॥ १२४ ॥
जायागणहृदम्भोज बुद्धिज्ञानप्रकाशिनी ।
जनार्दनप्रेमभाव महाधनसुखप्रदः ॥ १२५ ॥

छदपद्मप्रभामानसिंहासनसमास्थिता, छलत्कोटिदैत्यराजमुण्डमालाविभूषित, छिन्नादिकोटिमन्त्रार्थज्ञानचैतन्यकारिणी, चित्रमार्गमहाध्वान्तग्रन्थिसम्भेदकारक, अस्त्रकास्त्रादिब्रह्मास्त्रसहस्रकोटिधारिणी, अजामांसादिसद्भक्ष-रसामोदप्रवाहग, छेदनादिमहोग्रास्त्रे, भुजवामप्रकाशिनी, जयाख्यादिमहासाम ज्ञानार्थस्य प्रकाशक, जायागणहृदम्भोज, बुद्धिज्ञानप्रकाशिनी, जनार्दनप्रेमभाव, महाधनसुखप्रद ॥ १२१-१२५ ॥

जगदीशकुलानन्दसिन्धुपङ्कजवासिनी ।
जीवनास्थादिजनकः परमानन्दयोगिनाम् ॥ १२६ ॥
जननी योगशास्त्राणां भक्तानां पादपद्मयोः ।
रुक्षपवननिर्वातमहोल्कापातकारुणः ॥ १२७ ॥
झर्झरीमधुरी वीणा वेणुशङ्खप्रवादिनी ।
झनत्कारौघसंहारकरदण्डविशानधृक् ॥ १२८ ॥
झर्झरीनायिकार्य्यादिकराम्भोजनिषेविता ।
टङ्कारभावसंहारमहाजागरवेशधृक् ॥ १२९ ॥
टङ्कासिपाशुपातास्त्रचर्मकार्मुकधारिणी ।
टलनानलसङ्घट्टपट्टाम्बरविभूषितः ॥ १३० ॥

जगदीशकुलानन्दसिन्धुपङ्कजवासिनी, जीवनास्थादिजनक, परमानन्दयोगिनाम्, जननी, योगशास्त्राणां, भक्तानां पादपद्मयः रुक्षपवननिर्वातमहोल्कापातकारुण, झर्झरीमधुरी, वीणा, वेणुशङ्खप्रवादिनी, झनत्कारौघसंहारकरदण्डविशानधृक्, झर्झरीनायिकार्य्यादिकराम्भोजनिषेविता, टङ्कारभावसंहारमहाजागरवेशधृक्, टङ्कासिपाशुपातास्त्रचर्मकार्मुकधारिणी, टलनानलसङ्घट्टपट्टाम्बरविभूषित ॥ १२६-१३० ॥

टुल्टुनी किङ्किणी कोटि विचित्रध्वनिगामिनी ।
ठं ठं ठं मनुमूलान्तः स्वप्रकाशप्रबोधकः ॥ १३१ ॥
ठं ठं ठं प्रखराह्लादनादसम्वादवादिनी ।
ठं ठं ठं कूर्मपृष्ठस्थः कामचाकारभासनः ॥ १३२ ॥
ठं ठं ठं बीजवह्निस्थ हातुकभ्रूविभूषिता ।
डामरप्रखराह्लादसिद्धिविद्याप्रकाशकः ॥ १३३ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

डिण्डिमध्वानमधुरवाणीसम्मुखपङ्कजा ।
डं डं डं खरकृत्यादि मारणान्तःप्रकाशिका ॥ १३४ ॥
ढक्कारवाद्यभूपूरतारसप्तस्वराश्रयः ।
ढौं ढौं ढौं ढौकढक्कलं वह्निजायामनुप्रियः ॥ १३५ ॥

टुल्लुनी, किङ्किणी, कोटि, विचित्रध्वनिगामिनी, ठं, ठं, ठं, मनुमूलान्त, स्वप्रकाशप्रबोधक, ठं, ठं, ठं, प्रखराह्लादनादसम्वादवादिनी, ठं, ठं, ठं, कूर्मपृष्ठस्थ, कामचाकारभासन, ठं, ठं, ठं, बीजवह्निस्थ, हातुकभूविभूषिता, डामरप्रखराह्लादसिद्धिविद्याप्रकाशक, डिण्डिमध्वानमधुरवाणीसम्मुखपङ्कजा, डं, डं, डं, खरकृत्यादि, मारणान्तप्रकाशिका, ढक्कारवाद्यभूपूरतारसप्तस्वराश्रय, ढौं, ढौं, ढौं, ढौकढक्कलं, वह्निजायामनुप्रिय ॥ १३१-१३५ ॥

ढं ढं ढं ढौं ढ ढं ढ कृत्येत्थाहेति वासिनी ।
तारकब्रह्ममन्त्रस्थः श्रीपादपद्मभावकः ॥ १३६ ॥
तारिण्यादिमहामन्त्र सिद्धिसर्वार्थसिद्धिदा ।
तन्त्रमन्त्रमहायन्त्र वेदयोगसुसारवित् ॥ १३७ ॥
तालवेतालदैतालश्रीतालादिसुसिद्धदा ।
तरुकल्पलतापुष्पकलबीजप्रकाशकः ॥ १३८ ॥
डिन्तिडीतालहिन्तालतुलसीकुलवृक्षजा ।
अकारकूटविन्द्विन्दुमालामण्डितविग्रहः ॥ १३९ ॥
स्थातृप्रस्थप्रथागाथास्थूलस्थित्यन्तसंहरा ।
दरीकुञ्जहेममालावनमालादिभूषितः ॥ १४० ॥

ढं, ढं, ढं, ढौं, ढ, ढं, ढ, कृत्येत्थाहेति वासिनी, तारकब्रह्ममन्त्रस्थश्रीपादपद्मभावक, तारिण्यादिमहामन्त्र, सिद्धिसर्वार्थसिद्धिदा, तन्त्रमन्त्रमहायन्त्र, वेदयोगसुसारवित्, तालवेतालदैतालश्रीतालादिसुसिद्धदा, तरुकल्पलतापुष्पकलबीजप्रकाशक, डिन्तिडीतालहिन्तालतुलसीकुलवृक्षजा, अकारकूटविन्द्विन्दुमालामण्डितविग्रह, स्थातृप्रस्थप्रथागाथास्थूलस्थित्यन्तसंहरा, दरीकुञ्जहेममाला वनमालादिभूषित ॥ १३६-१४० ॥

दारिद्र्यदुःखदहनकालानलशतोपमः[1] ।
दशसाहस्रवक्त्राम्भोरुहशोभितविग्रहः ॥ १४१ ॥
पाशाभयवराह्लादधनधर्मादिवर्धिनी ।
धर्मकोटिशतोल्लाससिद्धिऋद्धिसमृद्धिदा ॥ १४२ ॥
ध्यानयोगज्ञानयोगमन्त्रयोगफलप्रदा ।
नामकोटिशतानन्तसुकीर्तिगुणमोहनः ॥ १४३ ॥
निमित्तफलसद्भावभावाभावविवर्जिता ।

---

१. दरिद्रस्य भावो दारिद्र्यम्, तस्य दुःखम्, तस्य दहने कालानलशतोपम इत्यन्वयः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परमानन्दपदवी दानलोलपदाम्बुजः ॥ १४४ ॥
प्रतिष्ठासुनिवृत्तादि समाधिफलसाधिनी ।
फेरवीगणसन्मानवसुसिद्धिप्रदायकः ॥ १४५ ॥

दारिद्र्यदुखदहनकालानलशतोपम, दशसाहस्रवक्त्राम्भोरुहशोभितविग्रह, पाशाभयवराह्लादधनधर्मादिवर्धिनी, धर्मकोटिशतोल्लास सिद्धिऋद्धिसमृद्धिदा, ध्यानयोगज्ञानयोगमन्त्रयोगफलप्रदा, नामकोटिशतानन्तसुकीर्तिगुणमोहन, निमित्तफलसद्भावभावाभावविवर्जिता, परमानन्दपदवी दानलोलपदाम्बुज, प्रतिष्ठासुनिवृत्तादि, समाधिफलसाधिनी, फेरवीगणसन्मानवसुसिद्धिप्रदायक ॥ १४१-१४५ ॥

फेत्कारीकुलतन्त्रादि फलसिद्धिस्वरूपिणी ।
वराङ्गनाकोटिकोटिकराम्भोजनिसेविता ॥ १४६ ॥
वरदानज्ञानदान मोक्षदातिचञ्चला ।
भैरवानन्दनाथाख्य शतकोटिमुदान्वितः ॥ १४७ ॥
भावसिद्धिक्रियासिद्धि साष्टाङ्गसिद्धिदायिनी ।
मकारपञ्चकाह्लादमहामोदशरीरधृक् ॥ १४८ ॥
मदिरादिपञ्चतत्त्वनिर्वाणज्ञानदायिनी ।
यजमानक्रियायोगविभागफलदायकः ॥ १४९ ॥
यशः सहस्रकोटिस्थ गुणगायनतत्परा ।
रणमध्यस्थकालाग्नि क्रोधधारसुविग्रहः ॥ १५० ॥

फेत्कारीकुलतन्त्रादि, फलसिद्धिस्वरूपिणी, वराङ्गनाकोटिकोटिकराम्भोजनिसेविता, वरदानज्ञानदान, मोक्षदातिचञ्चला, भैरवानन्दनाथाख्य, शतकोटिमुदान्वित, भावसिद्धिक्रियासिद्धिसाष्टाङ्गसिद्धिदायिनी, मकारपञ्चकाह्लादमहामोदशरीरधृक्, मदिरादिपञ्चतत्त्वनिर्वाणज्ञानदायिनी, यजमानक्रियायोगविभागफलदायक, यशसहस्रकोटिस्थ, गुणगायनतत्परा, रणमध्यस्थकालाग्नि, क्रोधधारसुविग्रह ॥ १४५-१५० ॥

काकिनीशाकिनीशक्तियोगादि काकिनीकला ।
लक्षणायुतकोटीन्दुललाटतिलकान्वितः ॥ १५१ ॥
लाक्षाबन्धूकसिन्दूरवर्णलावण्यलालिता[1] ।
वातायुतसहस्राङ्गघूर्णायमानभूधरः ॥ १५२ ॥
विवस्वत्प्रेमभक्तिस्थ चरणद्वन्द्वनिर्मला ।
श्रीसीतापतिशुद्धाङ्ग व्याप्तेन्द्रनीलसन्निभः ॥ १५३ ॥
शीतनीलाशतानन्दसागरप्रेमभक्तिदा ।
षट्पङ्केरुहदेवादिस्वप्रकाशप्रबोधिनी ॥ १५४ ॥
महोर्मिस्थषडाधारप्रसन्नहृदयाम्बुजा ।

---

१. लाक्षाबन्धूकसिन्दूरवर्णस्य लावण्येन सौन्दर्येण लालिता । भगवत्या इदं स्वरूपवर्णनम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्यामप्रेमकलाबन्धसर्वाङ्गकुलनायकः ॥ १५५ ॥

काकिनीशाकिनीशक्तियोगादि, काकिनीकला, लक्षणायुतकोटीन्दुललाटतिलकान्वित, लाक्षाबन्धूकसिन्दूरवर्णलावण्यलालिता, वातायुतसहस्राङ्गघूर्णायमानभूधर, विवस्वत्प्रेमभक्तिस्थ, चरणद्वन्द्वनिर्मला, श्रीसीतापतिशुद्धाङ्ग, व्याप्तेन्द्रनीलसन्निभ, शीतनीलाशतानन्दसागरप्रेमभक्तिदा, षट्पङ्केरुहदेवादिस्वप्रकाशप्रबोधिनी, महोर्मिस्थषडाधारप्रसन्नहृदयाम्बुजा, श्यामप्रेमकलाबन्धसर्वाङ्गकुलनायक ॥ १५१-१५५ ॥

संसारसारशास्त्रादि सम्बन्धसुन्दराश्रया ।
ह्सौः प्रेतमहाबीजमालाचित्रितकण्ठधृक् ॥ १५६ ॥
हकारवामकर्णाढ्य चन्द्रबिन्दुविभूषिता ।
लयसृष्टिस्थितिक्षेत्रपानपालकनामधृक् ॥ १५७ ॥
लक्ष्मीलक्षजपानन्दसिद्धिसिद्धान्तवर्णिनी ।
क्षुन्निवृत्तिक्षपारक्षा क्षुधाक्षोभनिवारकः ॥ १५८ ॥
क्षत्रियादिकुरुक्षेत्रारुणाक्षिप्तत्रिलोचना ।
अनन्त इतिहासस्थ आज्ञागामी च ईश्वरी ॥ १५९ ॥
उमेश उटकन्येशी ऋद्धिस्थ ह्स्थगोमुखी ।
गकारेश्वरसंयुक्त त्रिकुण्डदेवतारिणी ॥ १६० ॥

संसारसारशास्त्रादि सम्बन्धसुन्दराश्रया, ह्सौ, प्रेतमहाबीजमालाचित्रितकण्ठधृक्, हकारवामकर्णाढ्यचन्द्रबिन्दुविभूषिता, लयसृष्टिस्थितिक्षेत्रपानपालकनामधृक्, लक्ष्मीलक्षजपानन्द सिद्धिसिद्धान्तवर्णिनी, क्षुन्निवृत्तिक्षपारक्षा, क्षुधाक्षोभनिवारक, क्षत्रियादिकुरुक्षेत्रारुणाक्षिप्तत्रिलोचना, अनन्त, इतिहासस्थ, आज्ञागामी, ईश्वरी, उमेश, उटकन्येशी, ऋद्धिस्थ ह्स्थगोमुखी, गकारेश्वरसंयुक्त, त्रिकुण्डदेवतारिणी ॥ १५५-१६० ॥

एणाचीशप्रियानन्द ऐरावतकुलेश्वरी ।
ओढ्रपुष्पानन्तदीप्त ओढ्रपुष्पानखाग्रका ॥ १६१ ॥
ऐह्त्यशतकोटिस्थ औ दीर्घप्रणवाश्रया ।
अङ्गस्थाङ्गदेवस्था अर्यस्थश्चार्यमेश्वरी ॥ १६२ ॥
मातृकावर्णनिलयः सर्वमातृकलान्विता ।
मातृकामन्त्रजालस्थः[१] प्रसन्नगुणदायिनी ॥ १६३ ॥
अत्युत्कटपथिप्रज्ञा गुणमातृपदे स्थिता ।
स्थावरानन्ददेवेशो विसर्गान्तरगामिनी ॥ १६४ ॥
अकलङ्को निष्कलङ्को निराधारो निराश्रया ।
निराश्रयो निराधारो निर्बीजो बीजयोगिनी ॥ १६५ ॥

एणाचीशप्रियानन्द ऐरावतकुलेश्वरी, ओढ्रपुष्पानन्तदीप्त, ओढ्रपुष्पानखाग्रका, ऐह्त्यशत-

---

१. मातृकामन्त्राणां जाले तिष्ठति इति, "सुपि स्थः" इति कर्तरि कप्रत्ययः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कोटिस्थ, औ, दीर्घप्रणवाश्रया, अङ्गस्थाङ्गदेवस्था अर्यस्थश्चार्यमेश्वरी, मातृकावर्णनिलय, सर्वमातृकलान्विता, मातृकामन्त्रजालस्थ, प्रसन्नगुणदायिनी, अत्युत्कटप्रथिप्रज्ञा, गुणमातृपदे स्थिता, स्थावरानन्ददेवेश, विसर्गान्तरगामिनी, अकलङ्क, निष्कलङ्क, निराधार, निराश्रया, निराश्रय, निराधार, निर्बीज, बीजयोगिनी ॥ १६१-१६५ ॥

निःशङ्को निस्पृहानन्दो सिन्धूरत्नावलिप्रभा ।
आकाशस्थः खेचरी च स्वर्गदाता शिवेश्वरी ॥ १६६ ॥
सूक्ष्मातिसूक्ष्मात्वैर्ज्ञेया[1] दारापदुःखहारिणी ।
नानादेशसमुद्भूतो नानालङ्कारलङ्कृता ॥ १६७ ॥
नवीनाख्यो नूतनस्थ नयनाब्जनिवासिनी ।
विषयाख्यविषानन्दा विषयाशी विषापहा ॥ १६८ ॥
विषयातीतभावस्थो विषयानन्दघातिनी ।
विषयच्छेदनास्त्रस्थो विषयज्ञाननाशिनी ॥ १६९ ॥
संसारछेदकच्छायो भवच्छायो भवान्तका ।
संसारार्थप्रवर्तश्च संसारपरिवर्तिका ॥ १७० ॥

निशङ्क, निस्पृहानन्द, सिन्धूरत्नावलिप्रभा, आकाशस्थ, खेचरी, स्वर्गदाता, शिवेश्वरी, सूक्ष्मातिसूक्ष्मात्वैर्ज्ञेया, दारापदुखहारिणी, नानादेशसमुद्भूत, नानालङ्कारलङ्कृता, नवीनाख्य, नूतनस्थ, नयनाब्जनिवासिनी, विषयाख्यविषानन्दाविषयाशी, विषापहा, विषयातीतभावस्थ, विषयानन्दघातिनी, विषयच्छेदनास्त्रस्थ, विषयज्ञाननाशिनी, संसारछेदकच्छाय, भवच्छाय, भवान्तका, संसारार्थप्रवर्त, संसारपरिवर्तिका ॥ १६५-१७० ॥

संसारमोहहन्ता च संसारार्णवतारिणी ।
संसारघटकश्रीदासंसारध्वान्तमोहिनी ॥ १७१ ॥
पञ्चतत्त्वस्वरूपश्च पञ्चतत्त्वप्रबोधिनी ।
पार्थिवः पृथिवीशानी पृथुपूज्यः पुरातनी ॥ १७२ ॥
वरुणेशो वारुणा च वारिदेशो जलोद्यमा ।
मरुस्थो जीवनस्था च जलभुग्जलवाहना ॥ १७३ ॥
तेजः कान्तः प्रोज्ज्वलस्था तेजोराशेस्तु तेजसी ।
तेजस्थस्तेजसो माला तेजः कीर्तिः स्वरश्मिगा ॥ १७४ ॥
पवनेशश्चानिलस्था परमात्मा निनान्तरा ।
वायुपूरककारी च वायुकुम्भकवर्धिनी ॥ १७५ ॥

संसारमोहहन्ता, संसारार्णवतारिणी, संसारघटकश्रीदासंसारध्वान्तमोहिनी, पञ्चतत्त्व-स्वरूप, पञ्चतत्त्वप्रबोधिनी, पार्थिव, पृथिवीशानी, पृथुपूज्य, पुरातनी, वरुणेश, वारुणा, वारिदेश, जलोद्यमा, मरुस्थ, जीवनस्था, जलभुग्जलवाहना, तेज, कान्त, प्रोज्ज्वलस्था,

---

१. 'सूक्ष्मातिसूक्ष्मा तु विज्ञेया' इति पाठः प्रतिभाति । अथवा 'सूक्ष्मातिसूक्ष्मा च विज्ञेया' इति पाठः करणीयः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तेजोराशे, तेजसी, तेजस्थस्तेजस, माला, तेज, कीर्ति, स्वरश्मिगा, पवनेश, अनिलस्था, परमात्मा, निनान्तरा, वायुपूरककारी, वायुकुम्भकवर्धिनी ॥ १७१-१७५ ॥

वायुच्छिद्रकरो वाता वायुनिर्गममुद्रिका ।
कुम्भकस्थो रेचकस्था पूरकस्थातिपूरिणी ॥ १७६ ॥
वाय्वाकाशाधाररूपी वायुसञ्चारकारिणी ।
वायुसिद्धिकरो दात्री वायुयोगी च वायुगा ॥ १७७ ॥
आकाशप्रकरो ब्राह्मी आकाशान्तर्गतद्रिगा ।
आकाशकुम्भकानन्दो गगनाह्लादवर्धिनी ॥ १७८ ॥
गगनाच्छन्नदेहस्थो गगनाभेदकारिणी ।
गगनादिमहासिद्धो गगनग्रन्थिभेदिनी ॥ १७९ ॥
कलकर्मा महाकाली कालयोगी च कालिका ।
कालछत्रः कालहत्या कालदेवो हि कालिका ॥ १८० ॥

वायुच्छिद्रकर, वाता, वायुनिर्गममुद्रिका, कुम्भकस्थ, रेचकस्था, पूरकस्था, अतिपूरिणी, वाय्वाकाशाधाररूपी, वायुसञ्चारकारिणी, वायुसिद्धिकर, दात्री, वायुयोगी, वायुगा, आकाशप्रकर, ब्राह्मी, आकाशान्तर्गतद्रिगा, आकाशकुम्भकानन्द, गगनाह्लादवर्धिनी, गगनाच्छन्नदेहस्थ, गगनाभेदकारिणी, गगनादिमहासिद्ध, गगनग्रन्थिभेदिनी, कलकर्मा, महाकाली, कालयोगी, कालिका, कालछत्र, कालहत्या, कालदेव, कालिका ॥ १७५-१८० ॥

कालब्रह्मस्वरूपश्च कालितत्त्वार्थरक्षिणी ।
दिगम्बरो दिक्पतिस्था दिगात्मा दिगिभास्वरा ॥ १८१ ॥
दिक्पालस्थो दिक्प्रसन्ना दिग्वलो दिक्कुलेश्वरी ।
दिगघोरो दिग्वसना दिग्वीरा दिक्पतीश्वरी ॥ १८२ ॥
आत्मार्थो व्यापितत्त्वज्ञ आत्मज्ञानी च सात्मिका ।
आत्मीयश्चात्मबीजस्था चान्तरात्मात्ममोहिनी ॥ १८३ ॥
आत्मसञ्ज्ञानकारी च आत्मानन्दस्वरूपिणी ।
आत्मयज्ञो महात्मज्ञा महात्मात्मप्रकाशिनी ॥ १८४ ॥
आत्मविकारहन्ता[1] च विद्यात्मीयादिदेवता ।
मनोयोगकरो दुर्गा मनः प्रत्यक्ष[2] ईश्वरी ॥ १८५ ॥

कालब्रह्मस्वरूप, कालितत्त्वार्थरक्षिणी, दिगम्बर, दिक्पतिस्था, दिगात्मा, दिगिभास्वरा, दिक्पालस्थ, दिक्प्रसन्ना, दिग्वल, दिक्कुलेश्वरी, दिगघोर, दिग्वसना, दिग्वीरा, दिक्पतीश्वरी, आत्मार्थ, व्यापितत्त्वज्ञ, आत्मज्ञानी, सात्मिका, आत्मीय, आत्मबीजस्था, अन्त-

---

१. चमत्काराट्टहासेत्यारभ्य विद्यात्मीयादिदेवतान्तं श्लोकजातं ख० पुस्तके नास्ति ।
२. प्रत्यक्षकेश्वरी—ख० ।—अयं पाठो युक्तः । यतो हि अन्वर्थताऽत्रैव पाठे । प्रत्यक्षं कायति या सा प्रत्यक्षका, सा चासावीश्वरी चेति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रात्मात्ममोहिनी, आत्मसञ्ज्ञानकारी, आत्मानन्दस्वरूपिणी, आत्मयज्ञ, महात्मज्ञा, महात्मात्म-प्रकाशिनी, आत्मविकारहन्ता, विद्यात्मीयादिदेवता, मनोयोगकर, दुर्गा, मन, प्रत्यक्ष, ईश्वरी ।

मनोभवनिहन्ता च मनोभवविवर्धिनी ।
मनश्चान्तरीक्षयोगो[१] निराकारगुणोदया ॥ १८६ ॥
मनोनिराकारयोगी[२] मनोयोगेन्द्रसाक्षिणी ।
मनःप्रतिष्ठो[३] मनसा मानशङ्का मनोगतिः ॥ १८७ ॥
नवद्रव्यनिगूढार्थो नरेन्द्रविनिवारिणी[४] ।
नवीनगुणकर्मादिसाकारः खगगामिनी ॥ १८८ ॥
अत्युन्मत्ता महावाणी वायवीशो महानिला ।
सर्वपापापहन्ता च सर्वव्याधिनिवारिणी ॥ १८९ ॥
द्वारदेवीश्वरी प्रीतिः प्रलयाग्निः करालिनी ।
भूषण्डगणतातश्च[५] भूःषण्डरुधिरप्रदा ॥ १९० ॥

मनोभवनिहन्ता, मनोभवविवर्धिनी, मनश्चान्तरीक्षयोग, निराकारगुणोदया, मनोनिराकार-योगी, मनोयोगेन्द्रसाक्षिणी, मन, प्रतिष्ठ, मनसा, मानशङ्का, मनोगति, नवद्रव्यनिगूढार्थ, नरेन्द्रविनिवारिणी, नवीनगुणकर्मादिसाकार, खगगामिनी, अत्युन्मत्ता, महावाणी, वायवीश, महानिला, सर्वपापापहन्ता, सर्वव्याधिनिवारिणी, द्वारदेवीश्वरी, प्रीति, प्रलयाग्नि, करालिनी, भूषण्डगणतात, भूषण्डरुधिरप्रदा ॥ १८५-१९० ॥

काकावलीशः[६] सर्वेशी काकपुच्छधरो जया ।
अजितेशो[७] जितानन्दा वीरभद्रः प्रभावती ॥ १९१ ॥
अन्तर्नाडीगतप्राणो वैशेषिकगुणोदया ।
रत्ननिर्मितपीठस्थः[८] सिंहस्था रथगामिनी ॥ १९२ ॥
कुलकोटीश्वराचार्यो वासुदेवनिषेविता ।
आधारविरहज्ञानी सर्वाधारस्वरूपिणी ॥ १९३ ॥
सर्वज्ञः सर्वविज्ञाना मार्तण्डो[९] यश इल्वला ।
इन्द्रेशो[१०] विन्ध्यशैलेशी वारणेशः प्रकाशिनी ॥ १९४ ॥
अनन्तभुजराजेन्द्रो[११] अनन्ताक्षरनाशिनी ।

---

१. मनसान्तरक्षि ..... ख० । २. मनोविकारयोगी—ख० ।
३. मनःपूर्तिर्मनोज्योतिमीनसेशो .... ख० ।—मनसि प्रतिष्ठा यस्यासौ मनः प्रतिष्ठः । अथवा मनसा प्रतिष्ठा यस्य सः । मनसोऽधिकरणत्वं कारणत्वं वा, योग्यताबलात् । शमदमादिसम्पन्ने एव मनसि ईदृशी स्थितिर्भवति ।
४. मणिवासिनी—ख० । ५. भुषण्ड—ख० ।
६. ककारादीशः—ख० । ७. अजितेशा जितानन्दो—ख० ।
८. रत्ननिर्माणभाकोटिसिंहस्थोरयगामिनी—ख० । ९. मार्तण्डेयेन्दुवन्दिता—ख० ।
१०. उत्केशी विल्वशैलेशी चारुनेत्रप्रकाशिनी—ख० ।
११. अनन्तराजराजेन्द्रो ज्वालानगसुरनाशिनी ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आशीर्वादस्तु[१] वरदोऽनुग्रहोऽनुग्रहक्रिया ॥ १९५ ॥

काकावलीश, सर्वेशी, काकपुच्छधर, जया, अजितेश, जितानन्दा, वीरभद्र, प्रभावती, अन्तर्नाडीगतप्राण, वैशेषिकगुणोदया, रत्ननिर्मितपीठस्थ, सिंहस्था, रथगामिनी, कुलकोटीश्वराचार्य, वासुदेवनिषेविता, आधारविरहज्ञानी, सर्वाधारस्वरूपिणी, सर्वज्ञ, सर्वविज्ञाना, मार्तण्ड, यशइल्वला, इन्द्रेश, विन्ध्यशैलेशी, वारणेश, प्रकाशिनी, अनन्तभुजराजेन्द्र, अनन्ताक्षरनाशिनी, आशीर्वाद, वरदो, अनुग्रहो अनुग्रहक्रिया ॥ १९१-१९५ ॥

प्रेतासनसमासीनो मेरुकुञ्जनिवासिनी ।
मणिमन्दिरमध्यस्थो मणिपीठनिवासिनी ॥ १९६ ॥
सर्वप्रहरणः[२] प्रेतो विधिविद्याप्रकाशिनी ।
प्रचण्डनयनानन्दो मञ्जीरकलरञ्जिनी[३] ॥ १९७ ॥
कलमञ्जीरपादाब्जो बलमृत्युपरायणा[४] ।
कुलमालाव्यापिताङ्गः[५] कुलेन्द्रः कुलपण्डिता ॥ १९८ ॥
बालिकेशो रुद्रचण्डा बालेन्द्राः प्राणबालिका ।
कुमारीशः काममाता मन्दिरेशः स्वमन्दिरा ॥ १९९ ॥
अकालजननीनाथो विदग्धात्मा[६] प्रियङ्करी ।
वेदाद्यो वेदजननी वैराग्यस्थो[७] विरागदा ॥ २०० ॥

प्रेतासनसमासीन, मेरुकुञ्जनिवासिनी, मणिमन्दिरमध्यस्थ, मणिपीठनिवासिनी, सर्वप्रहरण-प्रेत, विधिविद्याप्रकाशिनी, प्रचण्डनयनानन्द, मञ्जीरकलरञ्जिनी, कलमञ्जीरपादाब्ज, बलमृत्यु-परायणा, कुलमालाव्यापिताङ्ग, कुलेन्द्र, कुलपण्डिता, बालिकेश, रुद्रचण्डा, बालेन्द्रा, प्राण-बालिका, कुमारीश, काममाता, मन्दिरेश, स्वमन्दिरा, अकालजननीनाथ, विदग्धात्मा, प्रियङ्करी, वेदाद्य, वेदजननी, वैराग्यस्थ, विरागदा ॥ १९५-२०० ॥

स्मितहास्यास्यकमलः स्मितहास्यविमोहिनी ।
दन्तुरेशो दन्तुरु च दन्तीशो दशनप्रभा ॥ २०१ ॥
दिग्दन्तो हि दिग्दशना भ्रष्टभुक् चर्वणप्रिया ।
मांसप्रधाना[८] भोक्ता च प्रधानमांसभक्षिणी ॥ २०२ ॥
मत्स्यमांसमहामुद्रा[९] रजोरुधिरभुक्प्रिया[१०] ।

---

१. आशीर्वादरता देवी भक्तानुग्रहकातरा—ख० । २. सर्वप्रहरणोपेतो—ख० ।
३. कनकाञ्जलिः—ख० । ४. सर्वत्यागपरायणा—ख० ।
५. व्यापिताङ्गी—ख० ।—कुलमालाभिः व्यापितमङ्गं यस्य सः । व्यापितं विशेषतः सम्बद्धम् । कुलमाला तान्त्रिकपरम्परानुशिष्टा भवति ।
६. विश्वात्मा सुप्रियङ्करी—ख० । ७. वैराग्यस्थो—ख० ।
८. .....प्रधाननोक्ता च—ख० । ९. मद्य—ख० ।
१०. रुधिरसुप्रिया—ख० ।—रजोरुधिरव्याप्ता या दृक् नेत्रं तत्प्रिया । रजस्तमोऽधिष्ठात्री या देवी, तस्याः रजोरुधिरप्रियत्वं भवति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुरामांसमहामीनमुद्रामैथुनसुप्रिया ॥ २०३ ॥
कुलद्रव्यप्रियानन्दो मद्यादिकुलसिद्धिदा[१] ।
हृत्कण्ठभ्रूसहस्रारभेदनोऽन्ते विभेदिनी[२] ॥ २०४ ॥
प्रसन्नहृदयाम्भोजः प्रसन्नहृदयाम्बुजा ।
प्रसन्नवरदानाढ्यः प्रसन्नवरदायिनी[३] ॥ २०५ ॥

स्मितहास्यास्यकमल, स्मितहास्यविमोहिनी, दन्तुरेश, दन्तुरु, दन्तीश, दशनप्रभा, दिग्दन्त, दिग्दशना, भ्रष्टभुक्, चर्वणप्रिया, मांसप्रधानाभोक्ता, प्रधानमांसभक्षिणी, मत्स्यमांसमहामुद्रारजोरुधिरभुक्प्रिया, सुरामांसमहामीनमुद्रामैथुनसुप्रिया, कुलद्रव्यप्रियानन्द, मद्यादिकुलसिद्धिदा, हृत्कण्ठभ्रूसहस्रारभेदन, अन्तेविभेदिनी, प्रसन्नहृदयाम्भोज, प्रसन्नहृदयाम्बुजा, प्रसन्नवरदानाढ्य, प्रसन्नवरदायिनी ॥ २०१-२०५ ॥

प्रेमभक्तिप्रकाशाढ्यः प्रेमानन्दप्रकाशिनी ॥ २०६ ॥
प्रभाकरफलोदयः[४] परमसूक्ष्मपुरप्रिया
प्रभातरविरश्मिगः[५] प्रथमभानुशोभान्विता ।
प्रचण्डरिपुमन्मथः[६] प्रचलितेन्दुदेहोद्गतः
प्रभापटलपाटलप्रचयधर्मपुञ्जार्चिता[७] ॥ २०७ ॥
सुरेन्द्रगणपूजितः[८] सुरवरेशसम्पूजिता
सुरेन्द्रकुल[९]सेवितो नरपतीन्द्रसंसेविता ।
गणेन्द्र[१०] गणनायको गणपतीन्द्र देवात्मजा
भवार्णवगतारको जलधिकर्णधारप्रिया ॥ २०८ ॥
सुरासुरकुलोद्भवः सुररिपुप्रसिद्धिस्थिता
सुरारिगणघातकः सुरगणेन्द्रसंसिद्धिदा ।
अभीप्सितफलप्रदः[११] सुरवरादिसिद्धिप्रदा
प्रियाङ्गज[१२]कुलार्थदः सुतधनापवर्गप्रदा ॥ २०९ ॥
शिवस्वशिवकाकिनी[१३] हरहरा च भीमस्वना[१४]
क्षितीश इषुरक्षका समनदर्पहन्तोदया[१५] ।

---

१. प्रियानन्दा—ख० । २. भूरिभेदिनी—ख० ।
३. प्रेमानन्दप्रकाशिनी—ख० । ४. फलोदारः—ख० ।
५. प्रकाररश्मिरूपः प्रथमो भानुशोभिता—ख० ।
६. विपुलोन्मत्तः चलितेन्दुप्रभावहः—ख० । ७. जटिलः प्रभूतधर्मपूजिता—ख० ।
८. सुरेन्द्रवेशपूजिता—ख० । ९. नरेन्द्रकुलसेविता—ख० ।
१०. नगेन्द्रगणनायको नगपतीन्द्रदेवात्मजा । ११. बलिच्छलनतत्परः—ख० ।
१२. प्रियद्विज—ख० । १३. शिवश्च शिवकामिनी—ख० ।
१४. सभा—ख० । १५. मदनदर्पहन्त्रादया—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गुणेश्वर उमापती[१] हृदयपद्मभेदी[२] गतिः
क्षपाकरललाटधृक् स्वसुखमार्गसन्दायिनी[३] ॥ २१० ॥

प्रेमभक्तिप्रकाशाढ्या, प्रेमानन्दप्रकाशिनी, प्रभाकरफलोदय, परमसूक्ष्मपुरप्रिया, प्रभातरविरश्मिग, प्रथमभानुशोभान्विता, प्रचण्डरिपुमन्मथ, प्रचलितेन्दुदेहोद्गत, प्रभापटलपाटल, प्रचयधर्मपुञ्जार्चिता, सुरेन्द्रगणपूजित, सुरवरेशसम्पूजिता, सुरेन्द्रकुलसेवित, नरपतीन्द्रसंसेविता, गणेन्द्रगणनायक, गणपतीन्द्र, देवात्मजा, भवार्णवगतारक, जलधिकर्णधारप्रिया, सुरासुरकुलोद्भव, सुररिपुप्रसिद्धिस्थिता, सुरारिगणघातक, सुरगणेन्द्रसंसिद्धिदा, अभीप्सितफलप्रद, सुरवरादिसिद्धिप्रदा, प्रियाङ्गजकुलार्थद, सुतधनापवर्गप्रदा, शिवस्वशिवकाकिनी, हरहरा, भीमस्वना, क्षितीश, इषुरक्षका, समनदर्पहन्तोदया, गुणेश्वर, उमापती, हृदयपद्मभेदीगति, क्षपाकरललाटधृक्, स्वसुखमार्गसन्दायिनी ॥ २०५-२१० ॥

श्मशानतटनिष्पट[४] प्रचटहासकालङ्कृता
हठत्शठमनस्तटे सुरकपाटसंछेदकः।
स्मराननविवर्धनः[५] प्रियवसन्तसम्बायवी[६]
विराजितमुखाम्बुजः कमलमञ्जसिंहासना[७] ॥ २११ ॥
भवो भवपतिप्रभाभवः कविश्च भाव्यासुरैः[८]
क्रियेश्वर ईलावती तरुणगाहितारावती[९]।
मुनीन्द्रमनुसिद्धिदः[१०] सुरमुनीन्द्रसिद्धायुषी[११]
मुरारिहरदेहगस्त्रिभुवना[१२] विनाशक्रिया ॥ २१२ ॥
द्विकः[१३] कनककाकिनी कनकतुङ्गकीलालकः
कमलाकुलः कुलकलार्कमालामला ।
सुभक्त[१४]तमसाधकप्रकृतियोगयोग्यार्चितो
विवेकगतमानसः [१५]प्रभुपरादिहस्तार्चिता ॥ २१३ ॥

---

१. उमावती । २. भेदे—ख० ।
३. विकटहासविस्फारिता—ख० । ४. निष्पटः स्मरकपाटसञ्छेदकः—ख० ।
५. स्मरानलविमर्दन—ख० ।—स्मरस्य कामदेवस्य आननं मुखम्, तद् विवर्धतेऽनेनेति स्मराननविवर्धनः । अस्यां व्युत्पत्तौ कामवर्धकत्वमायाति, तच्च शिवे भगवति न संघटत इति कृत्वा तक्षणार्थकाद् वृधधातोः करणे ल्युट्प्रत्ययः कार्यः ।
६. सद्वायवी—ख० । ७. मञ्ज—क० ।
८. भव्याभवः—ख० । ९. तरुणगो—ख० ।
१०. सुख—ख० ।—मन्यते ज्ञायते इष्टतत्त्वं येन स मनुः मन्त्रः, मुनीन्दस्य मनुः मन्त्रः, तेन जायमाना सिद्धिः, तां ददाति इति । 'आतोऽनुपसर्गे कः' इति दाधातुतः ऽ॰रि कप्रत्ययः ।
११. सिद्धिप्रदा—ख० । १२. त्रिभुवनस्य नाशक्रिया—ख० ।
१३. हितः ..... कनकसंशुद्धिः किलार्थप्रदा—ख० ।
१४. यति ..... प्रतियोग ..... ख० । १५. विभुवरादि ..... ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्वमेव कुलनायकः प्रलययोगविद्येश्वरी[१]
प्रचंण्डगणगो नगाभुवनदर्पहारी हरा[२] ।
चराचरसहस्रगः सकलरूपमध्यस्थितः[३]
स्वनामगुणपूरकः स्वगुणनामसम्पूरणी[४] ॥ २१४ ॥

श्मशानतटनिष्पटप्रचटहासकालङ्कृता, हठत्शठमनस्तटे सुरकपाटसंछेदक, स्मराननविवर्धनप्रियवसन्तसम्बायवी, विराजितमुखाम्बुज, कमलमञ्जसिंहासना, भव, भवपतिप्रभाभव, कवि, भाव्यासुरै, क्रियेश्वर, ईलावती, तरुणगाहितारावती, मुनीन्द्रमनुसिद्धिद, सुरमुनीन्द्रसिद्धायुषी, मुरारिहरदेहगस्त्रिभुवना, विनाशक्रिया, द्विक, कनककाकिनी, कनकतुङ्गकीलालक, कमलाकुल, कुलकलार्कमालोमला, सुभक्ततमसाधकप्रकृतियोगयोग्यार्चित, विवेकगतमानस, प्रभुपरादिहस्तार्चिता, कुलनायक, प्रलययोगविद्येश्वरी, प्रचण्डगणग, नगाभुवनदर्पहारी, हरा, चराचरसहस्रसकलरूपमध्यस्थित, स्वनामगुणपूरक, स्वगुणनामसम्पूरणी ॥ २११-२१४ ॥

फलश्रुतिकथनम्

इति ते कथितं नाथ सहस्रनाम मङ्गलम् ।
अत्यद्भुतं परानन्दरससिद्धान्तदायकम् ॥ २१५ ॥
मातृकामन्त्रघटितं सर्वसिद्धान्तसागरम्[५] ।
सिद्धविद्यामहोल्लास[६]मानन्दगुणसाधनम् ॥ २१६ ॥

इस प्रकार हे नाथ! मैंने आप से अत्यन्त अद्भुत, परमानन्द रस को देने वाले, मातृका मन्त्र पर घटित होने वाले, सभी सिद्धान्त के समुद्र रूप तथा सिद्धविद्या के महान् उल्लास रूपी और आनन्द के साधनभूत मङ्गलकारी सहस्रनाम स्तोत्र को कहा है ॥ २१५-२१६ ॥

दुर्लभं सर्वलोकेषु यामले[७] तत्प्रकाशितम् ।
तव[८] स्नेहरसामोदमोहितानन्दभैरव ॥ २१७ ॥

यह सहस्रनाम सभी लोकों में दुर्लभ है, जिसे इस रुद्रयामल में प्रकाशित किया गया है । हे आनन्दभैरव ! आपके स्नेह एवं (आनन्द) रस की सुगन्ध से मोहित होकर इसे मैंने प्रकाशित किया है ॥ २१७ ॥

कुत्रापि नापि कथितं स्वसिद्ध[९]हानिशङ्कया ।
सर्वादियोग[१०]सिद्धान्तसिद्धये [११]भुक्तिमुक्तये ॥ २१८ ॥

---

१. प्रलयकालयोगच्छविः—ख० । २. तथा ।
३. प्रकृतरूपशक्तिस्थिता—ख० ।
४. कृपार्दहृदयासदा निखिललोककल्पद्रुमः—ख० अधि० ।
५. सारकम्—ख० । ६. सिद्धिविद्यामहोत्साह—ख० ।
७. यामले—ख० । ८. वसामोद—क० ।
९. सिद्धिहानेस्तु शङ्कया—ख० ।
१०. भवादियोग.....ख० । आदयः प्रमुखा ये योगाः, तेषां सिद्धान्ताः, सर्वे च ते तादृशद्धान्ताश्च तेषां सिद्धये । ११. भक्तिमुक्तये—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रेमाह्लादरसेनैव दुर्लभं तत्प्रकाशितम् ।
येन विज्ञातमात्रेण भवेद्छ्रीभैरवेश्वरः ॥ २१९ ॥

सभी योग के सिद्धान्तों की सिद्धि के लिए एवं भुक्ति तथा मुक्ति के लिए जिस सहस्रनाम को अपने सिद्ध (योग) की हानि की शङ्का से कहीं भी नहीं कहा गया था, उस दुर्लभ सहस्रनाम को मैंने आपके प्रेम से आह्लादित होकर कहा है । इस सहस्रनाम के ज्ञान मात्र से योगी श्री भैरवेश्वर भगवान् शङ्कर ही हो जाता है ॥ २१८-२१९ ॥

एतन्नाम[१]शुभफलं वक्तुं न च समर्थकः ।
कोटिवर्षशतेनापि यत्फलं लभते नरः ॥ २२० ॥

इस सहस्रनाम के शुभ फल को कहने में कोई समर्थ नहीं है । जिस फल को साधक मनुष्य सौ करोड़ वर्षों में भी संसार सागर में प्राप्त करता रहता है (फल घटता नहीं है) ।

तत्फलं योगिनामेक[२]क्षणाल्लभ्यं भवार्णवे[३] ।
यः पठेत् प्रातरुत्थाय [४]दुर्गग्रहनिवरणात् ॥ २२१ ॥
दुष्टेन्द्रियभयेनापि [५] महाभयनिवारणात् ।
ध्यात्वा नाम जपेन्नित्यं मध्याह्ने च विशेषतः ॥ २२२ ॥

वह फल योगियों को क्षणभर में प्राप्त हो जाता है । जो प्रातःकाल उठकर इस स्तोत्र का पाठ करता है उसका पाप ग्रह से निवारण हो जाता है । उसे दुष्ट एवं इन्द्रियों का भय तथा (मृत्युरूप) महाभय नहीं रहता । अतः साधक को विशेष रूप से मध्याह्न वेला में ईश्वर एवं काकिनी का ध्यान कर नित्य पाठ करना चाहिए ॥ २२०-२२२ ॥

सन्ध्यायां रात्रियोगे च साधयेन्नामसाधनम् ।
योगाभ्यासे ग्रन्थिभेदे [६]योगध्याननिरूपणे ॥ २२३ ॥
पठनाद् योगसिद्धिः स्याद् ग्रन्थिभेदो दिने दिने ।
योगज्ञानप्रसिद्धिः [७]स्याद् योगः स्यादेकचित्ततः ॥ २२४ ॥

सन्ध्या समय और रात्रि के संयोग में इन नामों का साधन करना चाहिए । योगाभ्यास में, कण्ठाम्भोज आदि ग्रन्थि के भेद में अथवा योग ध्यान के प्रसङ्ग में इस स्तोत्र के पढ़ने से योगसिद्धि हो जाती है और शीघ्र ही ग्रन्थियों का भेदन हो जाता है । योगज्ञान की सिद्धि हो जाती है और एकचित्ततः योग की क्रिया होती है ॥ २२३-२२४ ॥

देहस्थ [८]देववश्याय महामोहप्रशान्तये ।
स्तम्भनायारिसैन्यानां[९] प्रत्यहं प्रपठेच्छुचिः ॥ २२५ ॥

---

१. नाम्नः—ख० । २. मेव—ख० । ३. भवान्तरे—ख० ।
४. दुष्टग्रह ..... ख० । ५. ध्यात्वा सुरभयेनापि महाभयनिवारणम्—ख० ।
६. ज्ञान—ख० । ७. प्रसिद्धः स्यात्—ख० । ८. देह—ख० ।
९. स्तम्भनाय विशाल्यानां—ख० ।—स्तम्भनायारिसैन्यानामित्यत्र स्तम्भनमवरोधनं तस्मै। अरीणां शत्रुणां सैन्यानि तेषामवरोधेन विजयो ध्रुवः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शरीरस्थ देवों (इन्द्रियों) को वश में करने के लिए और महामोह की शान्ति के लिए तथा शत्रु सेना के स्तम्भन के लिए शुद्ध होकर नित्य इस स्तोत्र का पाठ करना चाहिए।

भक्तिभावेन पाठेन सर्वकर्मसु सुक्षमः ।
स्तम्भयेत् परसैन्यानि[1] वारैकपाठमात्रतः ॥ २२६ ॥
वारत्रयप्रपठनाद्[2] वशयेद् भुवनत्रयम् ।
वारत्रयं तु प्रपठेद् यो मूर्खः पण्डितोऽपि वा ॥ २२७ ॥
शान्तिमाप्नोति परमां विद्यां भुवनमोहिनीम् ।
प्रतिष्ठाञ्च ततः प्राप्य मोक्षनिर्वाणमाप्नुयात् ॥ २२८ ॥

भक्तिभाव से इस स्तोत्र का पाठ करने से समस्त क्रिया-कलापों में सामर्थ्य की प्राप्ति होती है और परपक्ष की सेना का स्तम्भन तो (सिद्धि मिलने पर) एक बार के पाठ में ही हो जाता है । तीन बार पाठ करने से तीनों लोकों को वश में कर लेता है । तीन बार यदि कोई मूर्ख या पण्डित भी पढ़ लेता है तो वह साधक शान्ति प्राप्त करता है और समस्त लोकों को मोह में डालने वाली विद्या को प्राप्त करता है । संसार में प्रतिष्ठा प्राप्त कर मोक्ष (कर्म से निवृत्ति) तथा अन्ततः निर्वाण प्राप्त कर लेता है ॥ २२६-२२८ ॥

विनाशयेदरीञ्छीघ्रं[3] चतुर्वारप्रपाठने ।
पञ्चावृत्तिप्रपाठेन शत्रुमुच्चाटयेत् क्षणात् ॥ २२९ ॥
षडावृत्या[4] साधकेन्द्रः शत्रूणां नाशको भवेत् ।
आकर्षयेत् परद्रव्यं[5] सप्तवारं पठेद् यदि ॥ २३० ॥
एवं क्रमगतं[6] ध्यात्वा यः पठेदतिभक्तितः ।
स भवेद् योगिनीनाथो महाकल्पद्रुमोपमः ॥ २३१ ॥

इस स्तोत्र का चार बार पाठ करने से साधक शीघ्र ही शत्रुओं का विनाश कर देता है । पाँच बार पाठ करने से क्षण में ही शत्रु का उच्चाटन हो जाता है । छः बार पाठ करने से साधकेन्द्र शत्रुओं का विनाश करने में सक्षम हो जाता है । यदि साधक सात बार इसका पाठ करता है तो वह परद्रव्य को अपने पास खींच लेता है । इस प्रकार क्रमपूर्वक ध्यान करके यदि साधक भक्तिभाव से इसे पढ़े तो वह महान् कल्पवृक्ष के समान योगिनीनाथ हो जाता है ॥ २२९-२३१ ॥

ग्रन्थिभेदसमर्थः स्यान्मासमात्रं पठेद् यदि ।
दूरदर्शी महावीरो बलवान् पण्डितेश्वरः ॥ २३२ ॥

साधक यदि इस स्तोत्र का पाठ एक मास तक करता है तो वह ग्रन्थिभेदन करने में समर्थ हो जाता है । वह दूरवर्ती वस्तु को भी देख लेता है, महान्, वीर, बलवान् तथा पण्डितों का भी ईश्वर हो जाता है ॥ २३२ ॥

---

१. शल्यानि—ख० । २. वारद्वय—ख० ।
३. विद्वेषयेत्—ख० । चतुरावर्तनाद्धरम्—क० । ४. षडावृन्याम्—ख० ।
५. सुरद्रव्यं । ६. योगमतम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महाज्ञानी लोकनाथो भवत्येव न संशयः ।
मासैकेन समर्थः स्यान्निर्वाणमोक्षसिद्धिभाक् ॥ २३३ ॥

एक मास के पाठ से वह साधक महाज्ञानी और लोकों का स्वामी हो जाता है - इसमें संशय की बात नहीं है । एक मास में ही वह निर्वाण मोक्ष तथा सिद्धि को कहने में समर्थ हो जाता है ॥ २३३ ॥

प्रपठेद् योगसिद्ध्यर्थं भावकः परमप्रियः ।
शून्यागारे भूमिगर्तमण्डपे[1] शून्यदेशके ॥ २३४ ॥
गङ्गागर्भे[2] महारण्ये चैकान्ते निर्जनेऽपि वा ।
दुर्भिक्षवर्जिते देशे सर्वोपद्रववर्जिते ॥ २३५ ॥

परमप्रिय भावक योगी योग की सिद्धि के लिए इस स्तोत्र का पाठ करे । साधक योगी निर्जन स्थान पर, भूमि के गर्भ (गृह) में महान् वन में, एकान्त अथवा निर्जन स्थान पर इस स्तोत्र का पाठ करे । किन्तु वह प्रदेश दुर्भिक्ष वाला नहीं होना चाहिए । सभी उपद्रवों से रहित स्थान में ही साधना करनी चाहिए ॥ २३४-२३५ ॥

श्मशाने प्रान्तरेऽश्वत्थमूले वटतरुस्थले ।
इष्टकामयगेहे वा यत्र[3] लोको न वर्तते ॥ २३६ ॥
तत्र[4] तत्रानन्दरूपी महापीठस्थलेऽपि[5] च ।
दृढासनस्थः प्रजपेन्नाममङ्गलमुत्तमम् ॥ २३७ ॥

श्मशान में, प्रान्त के सीमा पर, पीपल के पेड़ के नीचे या वट के वृक्ष के नीचे अथवा इष्टका (?) से युक्त गृह में जहाँ संसारी जन न रहते हों, उन-उन स्थानों में आनन्द रूपी महान् पीठस्थल पर दृढ़ासन से बैठकर इस उत्तम मङ्गल सहस्रनाम स्तोत्र का पाठ करना चाहिए ॥ २३६-२३७ ॥

ध्यानधारणशुद्धाङ्गो न्यासपूजापरायणः ।
ध्यात्वा स्तौति प्रभाते च मृत्युजेता भवेद्[6] ध्रुवम् ॥ २३८ ॥

इस प्रकार साधक ध्यान, धारण से शुद्ध अंगों वाला होकर, न्यास एवं पूजा में तल्लीन रहते हुए देवी का ध्यान कर प्रभातकाल में यदि स्तुति करता है तो निश्चित ही मृत्यु पर विजय प्राप्त कर लेता है ॥ २३८ ॥

अष्टाङ्गसिद्धिमाप्नोति[7] चामरत्वमवाप्नुयात् ।
गुरुदेवमहामन्त्रभक्तो भवति निश्चितम् ॥ २३९ ॥

---

१. बिल्वमूले चितायां शून्यदेशके—ख० । २. महागर्ते—ख० ।
३. हेमकाष्ठादिनिर्मिते—ख० । ४. तत्तदानन्दरूपी च—ख० ।
५. देवता—क० । ६. भवेन्नरः—ख० ।
७. कालकालो भवेद्योगी—ख० ।—अष्टसंख्याकानि अङ्गानि इति मध्यमपदलोपि-समासः, तेषां सिद्धिः । अष्टाङ्गयोगसिद्धिरित्यपि बोध्यम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शरीरे तस्य दुःखानि न भवन्ति कुवृद्धयः[१] ।
दुष्टग्रहाः पलायन्ते तं दृष्ट्वा योगिनं परम् ॥ २४० ॥

इस प्रकार साधना करने से अष्टांगों की सिद्धि प्राप्त हो जाती है और साधक अमरत्व को प्राप्त कर लेता है । वह साधक निश्चित ही गुरुदेव रूप महामन्त्र का भक्त हो जाता है । उस साधक के शरीर में दुःख नहीं रह जाते हैं । कुत्सित विचार की वृद्धि भी नहीं होती है । उसके (राहु-केतु आदि) पापग्रह उस परम योगी को देखकर भाग जाते हैं ॥ २३९-२४० ॥

यः पठेत् सततं मन्त्री तस्य हस्तेऽष्टसिद्धयः ।
तस्य हृत्पद्मलिङ्गस्था देवाः सिद्ध्यन्ति चापराः ॥ २४१ ॥

जो साधक इसका सदैव पाठ करता रहता है । उस मन्त्रवेत्ता को (अणिमा, महिमा आदि) अष्टसिद्धियाँ हस्तगत हो जाती हैं । उसके हृत्पद्म में लिंगस्थ अन्य देवता सिद्ध हो जाते हैं ॥ २४१ ॥

युगकोटिसहस्राणि चिरायुर्योगिराड् भवेत् ।
शुद्धशीलो[२] निराकारो ब्रह्मा विष्णुः शिवः[३] स च ।
स नित्यः कार्यसिद्धश्च[४] स जीवन्मुक्तिमाप्नुयात् ॥ २४२ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने ईश्वरशक्तिकाकिन्यष्टोत्तर-सहस्रनामस्तोत्रविन्यासो नाम एकषष्टितमः पटलः ॥ ६१ ॥

— ❖ —

साधक करोड़ों सहस्रों युगों तक चिरायु वाला होकर योगिराट् हो जाता है । शुद्ध एवं शीलवान्, निराकार रूप से वह ब्रह्मा, विष्णु एवं शिव भी हो जाता है । वह नित्य और कार्य की सिद्धि वाला होता है । अन्ततः वह जीवन्मुक्त (जीवित रहकर भी मुक्ति की अवस्था वाला) हो जाता है ॥ २४२ ॥

॥ श्रीरुद्रयामल उत्तरतन्त्र में महातन्त्रोद्दीपन में ईश्वर एवं शक्ति काकिनी के एक हजार आठ नामों के स्तोत्र विन्यास नामक इकसठवें पटल की डॉ सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ६१ ॥

— ❖ —

---

१. कवाचन—ख० ।
२. सुकुलीनो—ख० ।—शुद्धं शीलं यस्यासौ शुद्धशीलः । शीलं स्वभाव आचारो वा ।
३. शिवस्य च—ख० ।
४. कायसिद्धिस्थो—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ द्विषष्टितमः पटलः

श्रीआनन्दभैरवी उवाच
ईश्वरस्तोत्रविन्यासः

अथ नाथ प्रवक्ष्येऽहं काकिनीगुरुदेवयोः ।
मन्त्रोद्धारस्तव ज्ञानं येन सिद्धो भवेद् यतिः ॥ १ ॥

श्रीआनन्दभैरवी ने कहा—हे नाथ ! अब मैं काकिनी के गुरु तथा देवता का मन्त्रोद्धार तथा तत्त्वज्ञान कहती हूँ, जिससे मनुष्य सिद्ध हो जाता है ॥ १ ॥

एतत्स्तवनपाठेन सहस्राख्यान्तसिद्धिषु[1]।
राजत्वं लभते सद्योऽथवा योगी च सम्पदि ॥ २ ॥

इस स्तोत्र का एक सहस्र पाठ सिद्ध हो जाने पर साधक सम्पत्तियों में राजत्व प्राप्त कर लेता है, अथवा सद्यः योगी हो जाता है ॥ २ ॥

यथा जनकराजा च विषये[2] गुरुभक्तिमान् ।
महासिद्धो महाज्ञानी तथा भवति साधकः ॥ ३ ॥

जिस प्रकार महाराज जनक विषयों में रहते हुए भी गुरु में भक्तिमान् होकर महासिद्ध तथा महाज्ञानी बन गये, उसी प्रकार इस स्तोत्र का पाठ करने वाला साधक भी वैसा ही बन जाता है ॥ ३ ॥

सुरा नागा रुद्रगणाः सर्वे विद्यार्थसेवकाः ।
योगी ज्ञानी तथा सिद्धाः खेचरा यक्षराक्षसाः ॥ ४ ॥
मुनयः[3] क्रोधवेतालास्तथा चण्डेश्वरादयः ।
एतच्छुभस्तवेन्द्रेण स्तुत्वा सर्वत्र सिद्धिगाः ॥ ५ ॥

सुर, नाग, रुद्रगण, सभी विद्या चाहने वाले, विद्या के सेवक, योगी, ज्ञानी, सिद्ध, आकाशचारी, यक्ष, राक्षस, मुनिगण, क्रोध, वैताल, चण्डेश्वरादिकों ने केवल इस स्तवराज की स्तुति से सिद्धियाँ प्राप्त कीं ॥ ४-५ ॥

---

१. सन्धिषु—ख०।
२. विषये—ख०।
३. मन्युः क्रोधवेतालो तथा चक्रेश्वरादयः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पूर्णः[१] पूर्णेन्दुबिम्बाननकमलकटाक्षादघौघापहारी
नारीन्धाता विधाता समवति न च तान् योगयोग्यान् महेन्द्रान् ।
सम्पत्तिप्राणयोगी निरवधिवरदानन्दगोप्ता शरीरो
बालो मृत्युञ्जयस्य प्रभुरिति भयहा पातु मे गुप्तदेहम् ॥ ६ ॥

जो पूर्ण हैं, जो पूर्णचन्द्र जैसे अपने मुख से तथा कमल कोमल अपने कटाक्षों से भक्तों के पापसमूहों का हरण कर लेते हैं, जिसके योग से योग्य तथा महान् से महान् राजा रूप शत्रु की न धाता और न विधाता ही रक्षा कर सकते हैं ऐसे संपत्ति तथा प्राण के योगी, असंख्य वरदान देने वाले, आनन्द के गोप्ता, वटुक शरीर धारण करने वाले, महामृत्युञ्जय के प्रभु, सबके भयहरण करने वाले मेरे गुप्त देह की रक्षा करें ॥ ६ ॥

विमर्श—मृत्युं जयति इति मृत्युञ्जयः । 'संज्ञायां भृ तृ वृ जि धारि सहि वणि दम' इति खच् प्रत्ययः, मुमागमश्च खिति परतः ।

कामक्रोधापहन्ता[२] जनयति भरतान् भारतान् पातु पृथ्वीं
यो योगी भावयोगी मम कुलफलदः सर्वदा शं करोतु ।
तत्क्रोडे लोकचक्रं तिलतुलतुलसेसन्निभं भाति सूक्ष्मं
तच्छ्रीनाथाङ्घ्रिपादद्वयमजरमहं भावये हृत्प्रपञ्चे ॥ ७ ॥

जो काम तथा क्रोध का अपहरण करने वाले हैं, भरत तथा भारत को उत्पन्न करने वाले हैं, वे इस पृथ्वी की रक्षा करें । जो न केवल योगी अपितु भावयोगी भी है, हमारे कुल के (षट्चक्रों) फल देने वाले हैं, वे सर्वदा हमारा कल्याण करें । जिनकी गोद में यह सारा जगत् (सूक्ष्म) तिल के समान (लघु) तथा रुई के समान हल्का प्रतीत होता है । मैं उन श्रीनाथ के अजर पादद्वय का अपने हृदय रूप प्रपञ्च में ध्यान करता हूँ ॥ ७ ॥

मायां[३] मोहे विवेकी शत-कितव-रिपूच्छेदकः प्रेरकस्थ-
कोर्षाणी गुप्ततन्द्रावनिभवमनुजो यो महामङ्गलस्थः ।
लोकातीतो तितीरो जय जय करुणानाथ दाता तपस्वी
मन्त्रोद्धारार्थगुप्तं समवति य इह प्राणनाथं तमीडे ॥ ८ ॥

माया, मोह तथा अविवेकियों के सैकड़ों कपट का उच्छेद करने वाले, कोश के समान हृदय रूप अर्ण की प्रेरणा करने वाले, जो महामङ्गलदायी, लोक से अतीत, सबका पार

---

१. पूर्णः पूर्णेन्दुदिवाननकमलकटाखोत्कटाघाप—ख० । हारी नारी धाता विधाता प्रसरति च तान् योगयोग्यान् ... योगी भूयान्नरोऽसौ ... भृत्योः ... प्रभुरिति भुवने ... गुप्तदेहः—ख० ।

२. .... जनयति भवतः पाति पृथ्वी च योगी—ख० ।—मालाधारी प्रपायात् मम कुल सकलं सर्वदा शङ्करौ वै तत्क्रोडे .... निलतुलतुलना सन्निभं भाति सूक्ष्म तच्छ्रीनाथा ... मद्यहरणं भावयेदाशु कुञ्जे—ख० ।

३. स च कित रिपुहृत् कोशविध्वंसकारी सर्वाधीशो महेशो निखिलसुखमयो निर्गुणो निर्विकारो लोकातीतोऽहि तीव्रो ..... नियतं प्राणनाथं तमीडे—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लगाने वाले, करुणानाथ, दाता तथा तपस्वी हैं, उनकी जय हो, उनकी जय हो । मन्त्रोद्धार में जो गुप्त रूप से निवास कर रक्षा करते हैं, उन प्राणनाथ की मैं स्तुति करता हूँ ॥ ८ ॥

भावान्तो[१] योऽतिगुर्वी हृदि जयकमलेऽतेऽमरप्रत्यथर्वो
वाग्देवी देवतायै नम इति मनुना मोहितो वाक्पतीशः ।
मन्त्रार्थोद्दीपनाख्यो विजयसखाकोटिभिर्वेष्टितो यो
बालार्कानन्दरश्मिप्रचयशतमखः पातु मां दुःखजालात् ॥ ९ ॥

(भावान्तो ... ... थर्वो ?) जो वाक्पतीश होकर भी 'वाग्देवी देवतायै नमः' इस मन्त्र पर मोहित है, जो मन्त्रों के अर्थ के उद्दीपन स्वरूप हैं, जो सैकड़ों विजय सखा (श्री कृष्ण) से वेष्टित (घिरे हुये) हैं, बाल सूर्य के आनन्द रूप रश्मि के संचय करने वाले शत यज्ञ स्वरूप है, वे इस दुःख जाल से हमारी रक्षा करें ॥ ९ ॥

हृष्टाङ्गा[२] सङ्गताङ्गाननविमलशिखाकोटिभिर्वर्जितो यो
मन्त्राच्चैतन्यहर्ता प्रणवमयशिवं तत्सदान्ते शिवं च ।
ध्यात्वा माहेश्वरायां नम इति जपनात् ते महेन्द्राधिपः स्यात्
कालीपुत्रः स एवं त्वमभयवरदः सेव्यते यैः स मुक्तः ॥ १० ॥

हृष्टाङ्ग एवं सुन्दर अङ्गों वाले, विमल मुखों तथा मनोहर केश कलापों वालीं करोड़ों स्त्रियों से जो वर्जित हैं, जो मन्त्र से उनकी चेतना को आकृष्ट कर अपने वश में कर लेते हैं, उन शिव के प्रणव के सहित 'शिव (ॐ शिव) तत्सत् शिव' इस मन्त्र का ध्यान कर 'माहेश्वराय नमः' इस मन्त्र का जप करने से साधक महेन्द्र का भी अधिपति बन जाता है, वही साधक कालीपुत्र है, जो अभय तथा वर देने वाले आप प्रभु की सेवा करता है और वही तत्त्वतः मुक्त भी है ॥ १० ॥

विमर्श—संगतेन अङ्गेनाननेन विमलशिखया कोट्या च वर्जितः। अथवा संगतादि-विमलशिखान्तानामितरेतरयोगद्वन्द्वं कृत्वा तासां कोट्याः, ताभिर्वर्जितो रहितः, निराकार इति यावत् ।

हंसः प्राणाविहन्ता[३] त्वमखिलवरदस्त्वं निदानः[४] प्रधानः
शान्तीशस्त्वं प्रतिष्ठः प्रणवशिवसदाभद्रमाहेश्वराय ।

---

१. तारान्ते याऽपि गुर्वी निजहृदिकमलेऽन्ते सरस्वत्ययो वा
तस्मै नितयं नमो मे नंम इति मनुना .....
मन्त्रार्थे हैपलाख्यो निजविजय .....
बालार्कानन्दवश्य ..... ख० ।

२. कृत्याकृत्यास्वरूपो कुलविमलशिखाकोटिभिः संयुक्तो यो—ख० । मन्त्रञ्चैतन्यहर्ता प्रणवमथ शिवां तत्सदान्ते शिवं च ..... सेवते यः स मुक्तः ।

३. प्राणो—ख० ।

४. निधान—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अन्तेऽत्युच्चैर्नमोऽन्ते[१] मनुमिह जपते सम्पदे दोषभङ्गा-
दानन्दाब्धौ [२]त्वमीशो गुरुरिह चपलं चापलं मां प्रपाहि[३]॥ ११ ॥

आप ही हंस हैं, प्राणादि के हन्ता हैं, सबको वर देने वाले हैं, सबके निदान हैं, सब में प्रधान हैं, 'शान्तीशस्त्वं प्रतिष्ठः, प्रणवशिवसदाभद्रमाहेश्वराय अत्युच्चैर्नमः' इस मन्त्र का जप करने वाले का दोष नष्ट कर देते हैं, ऐसे आनन्द सागर के संपत्ति स्वरूप आप ईश, तथा गुरु युक्त मुझ चपल की तथा अतिचपल की रक्षा कीजिए ॥ ११ ॥

विमर्श—प्रणमसि व च ।—प्रणबश्च शिवश्च सदाभद्रश्च महेश्वराणामयं माहेश्वरः, स च, एतेषां समाहारद्वन्द्वः। अथवा प्रणवशिवसदाभद्रसहितो माहेश्वर इति मध्यमपदलोपिसमासः।

आनन्दोद्रेककारी[४] त्वमपि सकरुणासागरो भक्तिदाता
दाता विद्याधरीणां त्वमपि सुररिपुः पार्वतीप्राणनाथः ।
तारे बिन्द्वाधराढ्यं क्षरमथविधुमत्तं मन्त्रमेकाक्षरं ते
तारान्तं त्र्यक्षरन्तं प्रजपति यदि यो योगिराड् भूतले स्यात् ॥ १२ ॥

हे प्रभो ! आप आनन्दोद्रेक के कर्त्ता है, करुणा के सागर हैं, भक्ति के दाता हैं । आप अपने उपासकों को विद्याधरी जैसी अप्सराएँ देते हैं, आप असुर के शत्रु हैं, पार्वती के प्राणनाथ हैं, आपके एकाक्षर ॐ शिव अथवा शिव ॐ इस त्र्यक्षर मन्त्र का जो जप करते हैं वे पृथ्वी पर योगिराट् बन जाते हैं ॥ १२ ॥

सर्पाण्डस्थं[५] सुसिद्धो हरविधुमधरं चन्द्रबिन्दुस्वरूपं
जप्त्वा नित्यं विलोमं प्रणवमृतिहरं वह्निकान्ता तदन्ते ।
एतद्रूपं पदं[६] यो भजति वरगतं हेममञ्जीरनादं
मम्रेक्षानन्दचित्तं विजयवरकुलानन्ददः प्राणगं ते ॥ १३ ॥

सबके अन्त में वह्निकान्ता (स्वाहा) से युक्त 'ॐ नमः शिवाय' मन्त्र के उत्तम पदों का जो सुवर्णमय मञ्जीर के समान उच्चारण करते हुए प्रसन्न चित्त होकर जप करता हैं वह साधक विजय प्राप्त करता हैं और श्रेष्ठ कुण्डलिनी का आनन्द भी प्राप्त कर लेता है ॥ १३ ॥

---

१. अन्ते उच्चैर्नमोऽन्तं मनुमिह जपति तत्पदे देवभृङ्ग ।
२. त्वमेको—ख० । ३. मां च पाहि—ख० ।
४. सृष्टिस्थित्यन्तकारी.... करुणासागरो मुक्तिदाता
पूज्यो विद्याधरीणां त्वमसुरविजय..... ।
तारान्तं बिन्दुयुक्तं सकलविधुयुतं मन्त्रमेकाक्षरं
जप्त्वा ध्यात्वा च देवीं त्रिभुवनविजयी... ..... । इति ख० ।
५. सप्तार्णस्थं सुसिद्धो हरवधुमधुरं .... ।
.... दुरित ..... ।
६. सदा यो भजति मनुवरं सर्वसिद्धीश्वरो वै ।
हे मातः ! शोभनेऽस्मि न विजय वर कुलानन्द सन्तानयुक्तः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उच्चाटे मोहने वाप्यरिवशसमये[१] शान्तिपुष्ट्यान्तवश्ये[२]
ते[३] मन्त्रान् योजयित्वा जपति यदि सुधीः श्रीपदाब्जावलम्बी ।
सिध्येत्[४] षट्कर्मसारं परमगुरुगतः स भवेत् कल्पशाखी
राजेन्द्रः सर्वलोके धनपतिसदृशः शम्भुनाथप्रसादात् ॥ १४ ॥

उच्चाटन में, मोहन में, शत्रु को वश में करते समय, शान्ति कार्य में, पुष्टिकर्म में और वश्य कार्य के लिये किये जाने वाले मन्त्र में, आपके उक्त मन्त्रों की योजना कर तथा आपके चरणों का सहारा लेने वाला, परमगुरु का ध्यान करने वाला जो सुधी साधक जप करता है, मारण, मोहन, उच्चाटन, शान्ति, पुष्टि तथा वश्य ये ६ कर्म अवश्य ही सिद्ध हो जाते हैं । वे शम्भुनाथ सदाशिव की प्रसन्नता से कल्पवृक्ष हो जाते हैं सारे लोक में कुबेर के सदृश धनवान् एवं राजेन्द्र बन जाते हैं ॥ १४ ॥

खान्तं[५] शक्रादिरूढं विधुनयनयुतं कामबीजं त्रिशक्तिं
चाद्येऽन्ते[६] ॐ शिवायानलवधुमिलितं यो जपेन्नाथमन्त्रम् ।
तेनाम्नायो जपित्वा कुलपथनिरतः साधकः श्रीवरेण्यः
किं तस्यासाध्यसिद्धिं त्रिजगति स सुखी सन्मुखी योगमार्गी ॥ १५ ॥

खान्त (क) शक्रादिरूढं विधुनयनयुतं कामबीज (क्लीं) त्रिशक्ति (ह्रीं) आदि में, फिर अन्त में 'ॐ शिवाय स्वाहा' इस मन्त्र का हे नाथ ! जो जप करता है वह साधक आम्नाय (वेद) का पारगामी, कुलपथ में संलग्न तथा श्रीमानों में सर्वश्रेष्ठ हो जाता हैं, उस साधक के लिये इन तीनों लोकों में कोई भी वस्तु असाध्य नहीं, वही सुखी तथा योगमार्गी बन जाता है ॥ १५ ॥

सर्वातीतो[७] विहारी पदगतिरहितः सर्वगामी विरामी
हस्ताभावो विनेता निरवधिवरदः सर्वरूपी विरूपी ।
मन्त्रज्ञस्त्वं[८] सुमन्त्री महमयसमयः संशयासारहन्ता
मन्ता विश्वेश्वरीणां परपशुपतयेऽन्ते नमः पातु नम्रम् ॥ १६ ॥

हे प्रभो ! आप सबसे परे हैं, फिर भी सब में विहार करने वाले हैं, पैर की गति से रहित हैं, फिर भी सर्वत्र पहुँचने वाले हैं, आपके हाथ नहीं है, फिर भी सबको नियन्त्रित रखने

---

१. वद्य इति—ख० । २. काले—ख० ।
३. तन्त्रमन्त्रान् .... इति—ख० ।
४. सिद्धः षट्कर्मसारः स भवति भुवने भूतनाथ प्रपन्नः ।
५. शान्तम्—ख० ।
६. तस्यान्ते..... नम इति मिलितं .... ।
त्वन्नाम्ना .... किं वरेण्यः ।
किन्तस्या साध्यसिद्धिः प्रजपति सुमुखी योगभागप्रपन्नः—ख० ।
७. सर्वाभीतो.... .... विवासी ।
८. मन्त्रज्ञस्थः .... सकलमनुमयः संशये मन्त्रो विश्वेश्वरीणां ... .

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वाले हैं तथा सबको असंख्य वर देने वाले हैं, बिना रूप के हैं, फिर भी सर्वस्वरूपी हैं, आप मन्त्रज्ञ सुमन्त्री हैं, महमय समय ? हैं संशय रूपी आसार (वर्षा या जन्म अन्धकार) के हन्ता हैं । 'विश्वेश्वरीणां मन्ता पशुपतये नमः', 'नम्रं मा पातु' विश्वेश्वरियों को मान देने वाले आप पशुपति को नमस्कार है, मुझ नम्र की रक्षा करें ॥ १६ ॥

योगी भोगी विरागी[1] त्वमतुलविभवः सम्भवः पञ्चचूडो
वाणी[2] शेषः प्रियेशः[3] शशिग्रथितमृडाशोभिताङ्गो[4] ह्यनङ्गः ।
कामो माया रमेशः प्रथमदिनकरश्रेणि[5] शोभावलिप्तः
सर्वाङ्गं यः प्रपायादमलकमलगः[6] क्रोधगो योऽवलोकम् ॥ १७ ॥

आप योगी हैं, भोगी हैं, विरागी हैं, अतुलविभव संपन्न हैं, संभव हैं, पञ्चचूड हैं, वाणी हैं, शेष हैं, प्रियेश हैं, चन्द्रमा को मस्तक में धारण करने वालें, पार्वती से शोभित अङ्ग वाले होकर भी अनङ्ग हैं, काम (क्लीं) माया (ह्रीं) रमा (श्रीं) उनके ईश हैं, उदीयमान सूर्य के समूहों से होने वाली शोभा से संयुक्त हैं, स्वच्छ कमल पर निवास करने वाले फिर भी क्रोध को प्राप्त करने वाले वह सदाशिव हमारे सर्वाङ्ग की रक्षा करें ॥ १७॥

एतच्छ्रीशङ्करस्तोत्रं यः पठेन्नियतः शुचिः ।
संवत्सराद् भवेत् सिद्धिः सर्वज्ञानप्रदायिनी ॥ १८ ॥

जो पवित्र होकर नियमपूर्वक इस श्रीशंकर स्तोत्र का पाठ करता है उसे एक वर्ष में सर्वज्ञानप्रदायिनी सिद्धि प्राप्त हो जाती है ॥ १८॥

शुचौ वाप्यशुचौ स्तौति भक्त्या यः साधकोत्तमः ।
स सर्वयातनामुक्तो योगी ग्रन्थिविभेदकः ॥ १९ ॥
अकस्मात् सिद्धिमाप्नोति प्रेमानन्दसुभक्तिदाम् ।

जो साधकोत्तम, पवित्र अथवा अपवित्र अवस्था में इस स्तोत्र का पाठ भक्तिपूर्वक करता है वह समस्त यातना अर्थात् सारी बाधाओं से मुक्त हो जाता हैं और षट्चक्रों की ग्रन्थि का विभेदक बन जाता है । उसे प्रेम आनन्द तथा सुभक्ति प्रदान करने वाली सिद्धि अनायास ही प्राप्त हो जाती हैं ॥ १९-२० ॥

शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः ॥ २० ॥
न स्नानं न जपः कार्यं न पूजादिविधानकम् ।
केवलं स्तवपाठेनानाहते सुस्थिरो भवेत् ॥ २१ ॥

---

१. विरोगी—ख० । २. वानीशेशः—ख० ।
३. शशिशकलरुचा—ख० ।
४. शशिना ग्रथितो मृडः शिवः, आशोभितानि अङ्गानि यस्य सः । द्वयोर्मध्यमपदलोपि समासो बोध्यः ।
५. विलिप्तः—ख० ।
६. सर्वा सिद्धिं प्रपायादमलकमलगः क्रोधज्ञो यो नृलोकम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुरश्चरण—इस स्तोत्र के पुरश्चरण की विधि १०८ कही गई है । इसमें स्नान, जपकार्य तथा पूजादि का विधान नहीं हैं, साधक केवल इस स्तोत्र के पाठ से अनाहत चक्र में पहुँच कर स्थिर हो जाता है ॥ २०-२१ ॥

चिरञ्जीवी वीतरागो[१] वीतसंसारभावनः ।
पठित्वा धारयित्वा[२] च योगभ्रष्टो न सम्भवेत् ।
अनायासे[३] योगसिद्धिं प्राप्नोति विपुलां श्रियम् ॥ २२ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे ईश्वरस्तोत्रविन्यासो नाम द्विषष्टितमः पटलः ॥ ६२ ॥

— ❖ —

इस स्तोत्र का पाठ करने से, यन्त्र बना कर धारण करने से, साधक योगभ्रष्ट नहीं होता किन्तु चिरञ्जीवी, वीतराग तथा संसार की भावना से विरत हो जाता है । उसे बिना परिश्रम के ही योगसिद्धि तथा अनन्त लक्ष्मी की प्राप्ति हो जाती है ॥ २२ ॥

॥ श्रीरुद्रयामल उत्तरतन्त्र में महातन्त्रोद्दीपन में सिद्धमन्त्रप्रकरण में षट्चक्रप्रकाश में भैरवीभैरवसंवाद में ईश्वर स्तोत्र विन्यास नामक बासठवें पटल की डॉ सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ६२ ॥

— ❖ —

---

१. वीतरोगी—ख० ।—वीतराग इत्येव पाठो युक्तः । वीतरोग इति पाठेऽपि संसाररूपो रोगश्चेत्तर्हि सोऽपि पाठः सम्भवति ।

२. भावयित्वा—ख० ।

३. सर्वायासे—क० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ त्रिषष्टितमः पटलः

आनन्दभैरवी उवाच

कवचं शृणु चास्यैव लोकनाथ शिवापते ।
ईश्वरस्य परं[1] ब्रह्म निर्वाणयोगदायकम् ॥ १ ॥
कवचं दुर्लभं लोके [2]नामसम्मोहनं परम् ।
कवचं ध्यानमात्रेण[3] निर्वाणफलभाग्भवेत् ॥ २ ॥

श्रीआनन्दभैरवी ने कहा—हे लोकनाथ ! हे शिवा के स्वामी ! परात्पर परब्रह्म एवं निर्वाणयोग को देने वाले, इन ईश्वर के कवच को सुनिए । सम्मोहन नाम का यह श्रेष्ठ कवच संसार में दुर्लभ है । इस कवच के ध्यान मात्र से साधक निर्वाणफल को प्राप्त करने वाला हो जाता है ॥ १-२ ॥

अस्य[4] किं (पु)त्वत्रमाहात्म्यं तथापि तद्वदाम्यहम् ।
केवलं ग्रन्थिभेदाय निजदेहानुरक्षणात् ॥ ३ ॥
सर्वेषामपि योगेन्द्र देवानां योगिनां तथा ।
भावादि[5]सिद्धिलाभाय कायनिर्मलसिद्धये ॥ ४ ॥

इस कवच का क्या माहात्म्य है ? फिर भी मैं उसे कहती हूँ—केवल ग्रन्थिभेद (?) और अपने शरीर की रक्षा के लिए इसका प्रयोग किया जाता है । सभी देवों तथा योगियों में हे योगेन्द्र ! भावादि सिद्धि लाभ के लिए तथा शरीर की निर्मल सिद्धि के लिए इसका पाठ करना चाहिए ॥ ३-४ ॥

प्रकाशितं महाकाल तव स्नेहवशादपि ।
सर्वे मन्त्राः प्रसिद्ध्यन्ति सम्मोहकवचाश्रयाः ॥ ५ ॥
कवचस्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुबुदाहृतम् ।
ईश्वरो देवता प्रोक्त[6]स्तथा शक्तिश्च काकिनी ॥ ६ ॥

हे महाकाल ! इसे भी हमने आपके स्नेहवश प्रकाशित किया है । सम्मोहन कवच को धारण कर सभी मन्त्र प्रकृष्ट रूप से सिद्ध होते हैं । कवच के ऋषि ब्रह्मा और छन्द अनुष्टुप् कहे गए हैं । इस कवच के देवता 'ईश्वर' तथा शक्ति 'काकिनी-देवी' हैं ॥ ५-६ ॥

---

१. परमम्—ख० ।
२. नाथ—ख० ।
३. मार्गेण—ख० ।
४. अन्यर्तिक—ख० ।
५. तारादि—ख० ।—भाव आदिर्यासां ता भावादयः, ताश्च ताः सिद्धयश्च तासां लाभाय प्राप्तये ।
६. प्रोक्ता—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कीलकं [१]क्रूं तथा ज्ञेयं ध्यानसाधनसिद्धये ।
हृदब्जभेदनार्थे[२] तु विनियोगः प्रकीर्तितः ॥ ७ ॥

ध्यान और साधन सिद्धि के लिए 'क्रूं' (हुं ?) यह कीलक जानना चाहिए । इस कवच का विनियोग कुण्डलिनी के अन्तर्गत हृत्कमल के भेद के लिए प्रतिपादित है ॥ ७ ॥

एतच्छ्रीसम्मोहनमहाकवचस्य ब्रह्मा ऋषिरनुष्टुप् छन्द ईश्वरो देवता काकिनी शक्तिः [३]क्रूं कीलकं ध्यानसाधनसिद्धये हृदब्जभेदार्थे[४] जपे विनियोगः

कवच का विनियोग—ॐ तत्सत् एतच्छ्रीसम्मोहन महाकवचस्य ब्रह्मा ऋषिरनुष्टुप् छन्दः, ईश्वरो देवता, काकिनी शक्तिः, क्रूं कीलकं ध्यानसाधनसिद्धये हृदब्जभेदार्थे जपे विनियोगः ॥ ७ ॥

प्रणवो मे पातु शीर्षं ललाटं च सदाशिवः ।
प्रासादो हृदयं पातु बाहुयुग्मं महेश्वरः ॥ ८ ॥
पृष्ठं पातु महादेव उदरं कामनाशनः ।
पार्श्वौ पातु कामराजो बालः[५] पृष्ठतलान्तरम् ॥ ९ ॥

प्रणव (ॐ) मेरे शिर की रक्षा करें । सदाशिव मेरे ललाट की रक्षा करें । प्रासाद (?) मेरे हृदय को और महेश्वर मेरे दोनों बाहुओं की रक्षा करें । महादेव पीठ की और कामनाशन उदर की रक्षा करे । दोनों पार्श्व भाग की कामराज और पृष्ठतल के भीतर की बाल (बटुक) रक्षा करें ॥ ८-९ ॥

कुक्षिमूलं[६] महावीरो ललितापतिरीश्वरः ।
मृत्युञ्जयो नीलकण्ठो लिङ्गदेशं सदावतु ॥ १० ॥
लिङ्गाधो मुद्रिका पातु पादयुग्ममुमापितः ।
अङ्गुष्ठं पातु सततं पार्वतीप्राणवल्लभः ॥ ११ ॥

महावीर कुक्षिमूल की रक्षा करें और ललिता देवी के पति ईश्वर, मृत्युञ्जय एवं नीलकण्ठ सदैव मेरे लिङ्गदेश की रक्षा करें । मुद्रिका (?) लिङ्ग के अधःप्रदेश की तथा उमापति दोनों पैरों की रक्षा करें । पार्वती देवी के प्राणवल्लभ (शिव) निरन्तर मेरे अङ्गुष्ठों की रक्षा करें ॥ १०-११ ॥

गुल्फं पातु त्रयम्बकश्च जानुनी युवतीपतिः ।
ऊरुमूलं सदा पातु मञ्जुघोषः सनातनः ॥ १२ ॥
सिमनी[७]देशमापातु भैरवः क्रोधभैरवः ।
लिङ्गदेशोद्गमं पातु लिङ्गरूपी जगत्पतिः ॥ १३ ॥

---

१. हुं—ख० ।
२. हृदब्जं हृत्कमलं तस्य भेदनार्थं विकासनार्थे, सूर्यकरैः कमलं प्रभिन्नं भवति ।
३. हुं—ख० । ४. भेदनार्थे—ख० ।
५. बलिः—ख० । ६. तूणं—ख० । ७. सीमनीं सदा—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्र्यम्बक मेरे गुल्फ (एड़ी के ऊपर की गाँठ) की और युवतीपति (शिव) दोनों जानुओं (घुटनों) की रक्षा करें । मञ्जुघोष सनातन सदैव मेरे ऊरुमूल (जङ्घा के जोड़ों) की रक्षा करें । भैरव एवं क्रोधभैरव मेरे सिवनी की रक्षा करें और लिङ्गरूपी जगत्पति (शिव) लिङ्गदेश के उद्गम स्थान की रक्षा करें ॥ १२-१३ ॥

हृदयाग्रं सदा पातु महेशः काकिनीश्वरः ।
ग्रीवां पातु वृषस्थश्च कण्ठदेशं दिगम्बरः ॥ १४ ॥
लम्बिकां पातु गणपो नासिकां भवनाशकः[1] ।
भ्रूमध्य पातु योगीन्द्रः [2]महेशः पातु मस्तकम् ॥ १५ ॥

महेश एवं काकिनी के ईश्वर सदैव हृदय के अग्र भाग की रक्षा करें । वृषस्थ शिव ग्रीवा की तथा दिगम्बर शिव कण्ठदेश की रक्षा करें । गणप (शिव) लम्बिका (घेंघा) की और भवनाशक (शिव) नासिका की रक्षा करें । योगीन्द्र भ्रूमध्य की रक्षा करे और महेश मस्तक की रक्षा करें ॥ १४-१५ ॥

मूर्ध्निदेशं मुनीन्द्रश्च द्वादशस्थो महेश्वरः ।
द्वादशाम्भोरुहं पातु [3]काकिनीप्राणवल्लभः ॥ १६ ॥
नाभिमूलाम्बुजं पातु महारुद्रो जगन्मयः ।
स्वाधिष्ठानाम्बुजं पातु सदा हरिहरात्मकः ॥ १७ ॥

मुनियों के इन्द्र (शिव) मूर्ध्नि भाग की और द्वादश (ज्योतिर्लिङ्ग) में निवास करने वाले महेश्वर एवं काकिनी देवी के प्राण वल्लभ (शिव) द्वादश कमल (ग्रन्थि) की रक्षा करें । जगन्मय महान् रुद्र नाभिमूल-कमल की रक्षा करें । हरि एवं हर रूप वाले (शिव) सदैव स्वाधिष्ठान-कमल की रक्षा करें ॥ १६-१७ ॥

मूलपद्मं सदा पातु ब्रह्मेन्द्रो डाकिनीश्वरः ।
कुण्डलीं सर्वदा पातु डाकिनी योगिनीश्वरः ॥ १८ ॥
कुण्डली मातृका पातु वटुकेशः शिवो(रो?) हरः ।
राकिणीविग्रहं पातु वामदेवो महेश्वरः ॥ १९ ॥

ब्रह्मेन्द्र एवं डाकिनी देवी के ईश्वर सदैव 'मूलपद्म' की रक्षा करें । डाकिनी के ईश्वर और योगिनी के ईश्वर सर्वदा (शरीरस्थ) कुण्डली की रक्षा करें । बटुकेश एवं शिव (शिरः ?) तथा हर कुण्डली में रहने वाली मातृकाओं की रक्षा करें । वामदेव एवं महेश्वर राकिणी विग्रह (?) की रक्षा करें ॥ १८-१९ ॥

पञ्चाननः सदा पातु लाकिनीवज्रविग्रहम् ।
स्वस्थानं द्वादशारञ्च वीरः पातु [4]सुकाकिनीम् ॥ २० ॥

---

१. नाशनः—ख० ।—भवं संसारं नाशयति स भवनाशकः । पूर्वं नाशक इति ण्वुलन्तं साधयित्वा भवेन सह षष्ठीसमासः पश्चात् कार्यः ।

२. सदेशः—ख० । ३. कामिनी—ख० । ४. स्वकाकानीम्—ख० ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वीरेन्द्रः कर्णिकां पातु द्वादशारं विषाशनः ।
षोडशारं सदा पातु क्रोधवीरः सदाशिवः ॥ २१ ॥

पञ्चानन शिव सदैव लाकिनीवज्रविग्रह (?) की रक्षा करें । स्वस्थान एवं द्वादशार (चक्र) तथा सुकाकिनी (?) की वीर (शिव) रक्षा करें । वीरेन्द्र 'कर्णिका' की तथा विष को पीने वाले शिव द्वादशार (चक्र) की रक्षा करें । क्रोधवीर सदाशिव सदैव षोडशार (चक्र) की रक्षा करें ॥ २०-२१ ॥

मां पातु [१]वज्रनाथेशोऽरिभयात्[२] क्रोधभैरवः ।
षट्चक्रं[३] सर्वदा पातु लाकिनीश्रीसदाशिवः ॥ २२ ॥
{षोडशाम्भोरुहान्तस्थं पातु धूम्राक्षपालकः ।
दिङ्नाथेशो महाकायो मां पातु परमेश्वरः } ।
आकाशगङ्गाजटिलो[४] द्विदलं[५] पातु मे परम् ।
गङ्गाधरः सदा पातु [६]हाकिनीं परमेश्वरः ॥ २३ ॥

वाज्रनाथेश मेरी और क्रोधभैरव मेरी शत्रुभय से रक्षा करें । इस प्रकार शरीरस्थ कुण्डली के षट्चक्र की लाकिनी देवी और श्री सदाशिव रक्षा करें । { धूम्राक्षपालक (शिव) अन्तस्थ षोडश कमलों की रक्षा करें । दिङ्नाथेश, महाकाय एवं परमेश्वर मेरी रक्षा करें । } आकाश गङ्गा के समान जटा धारण करने वाले (शिव) मेरे श्रेष्ठ द्विदल (भ्रूमध्यस्थ दो वर्ण) की रक्षा करें । इस प्रकार हाकिनी देवी, परमेश्वर और गङ्गाधर सदैव मेरी रक्षा करें ॥ २२-२३ ॥

हाकिनी [७]परशिवो मे भ्रूपद्मं परिरक्षतु ।
दण्डपाणीश्वरः पातु मनोरूपं द्विपत्रकम् ॥ २४ ॥
साधुकेशः सदा पातु मनोन्मन्यादिवासिनम् ।
पिङ्गाक्षेशः[८] सदा पातु भयभूमौ तनूं मम ॥ २५ ॥

हाकिनी एवं पर शिव मेरे भ्रूपद्म की चारों ओर से रक्षा करें । दण्डपाणीश्वर (शिव) मेरे मनोरूप द्विपत्रक की रक्षा करें । साधुओं के ईश सदैव मनोन्मन्यादि वासी की रक्षा करें । पिङ्गाक्षेश भय में पड़े हुए मेरे शरीर की रक्षा करें ॥ २४-२५ ॥

उन्मनी [९]स्थानकं पातु रोधिनीसहितं मम ।
सुधाघटः सदा पातु ममानन्दादिदेवताम् ॥ २६ ॥

---

१. वज—ख० । २. विभवान्—ख० । ३. षड्वक्रं—ख० ।
महामाया, महारौद्री, महादेवनिषेविता, महानया, महादेवी, महासिद्धा, महोदया, महायोगा, महाभद्रा, महायोगेन्द्र, तारिणी, महादीपशिखाकारा, महादीप, प्रकाशिनी, महादीप, प्रकाशाख्या, महाश्रद्धा, महामति, महामीयसी, मोहनाशिनी, महती, महा, महाकाल, पूजिता, महाकालकुलेश्वरी, महायोगीन्द्र, जननी, मोहसिद्धि, प्रदायिनी, आहुतिस्था, आहुतिस्ता, होतृप्रिया, वेद, मनुप्रिया, हैयङ्गबीज भ्योक्त्री, हैयङ्गबीज सुप्रिया, हे सम्बोधनरूपा, है हेतोः, परमात्मजा, हलनाथप्रिया, देवी, हिता, अहित, विनाशिनी, समस्तपापानां, हन्त्री, हलहेतुप्रदा, अपदा, हलहेतुच्छलस्था, हिलिहिलिप्रयागिनी ॥ ८४-९० ॥

विमर्श—महायोगेन्द्रतारिणी—महान्तो योगेन्द्रास्तान् तारयति तच्छीला भगवती इति भावः । **हिताहितविनाशिनी**—हितेषु येऽहितांशाः, तान् विनाशयति तच्छीला । **हलहेतुप्रदाप्रदा**—हलस्य विलेखनस्य ये हेतवः, तान् प्रदापयन्ति ये ते हलहेतुप्रदापाः, कर्मण्यण्प्रत्ययः । तान् ददाति या सा, 'आतोऽनुपसर्गे कः' इति कर्तरि कप्रत्ययः, स्त्रीत्वविवक्षायां टाप् ।

हुतासनमुखी शून्या हरिणी हरतन्त्रदा ।
हठात्कारगतिप्रीता सुण्टकालङ्कृता इला ॥ ९१ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हलायुधाद्यजननी हिल्लोला हेमबर्हिणी ।
हैमी हिमसुता हेमपर्वतशृङ्गसंस्थिरा ॥ ९२ ॥
हरणाख्या हरिप्रेमवर्धिनी हरमोहिनी ।
हरमाता हरप्रज्ञा हुङ्कारी हरपावनी ॥ ९३ ॥
हेरम्बजननी हट्टमध्यस्थलनिवासिनी ।
हिमकुन्देन्दुधवला हिमपर्वतवासिनी ॥ ९४ ॥

हुताशनमुखी, शून्या, हरिणी, हरतन्त्रदा, हठात्कारगतिप्रीता, सुण्टकालंकृता, इला, हलायुधा, आद्यजननी, हिल्लोला, हेमबर्हिणी, हैमी, हिमसुता, हेमपर्वतशृङ्गसंस्थिरा, हरणाख्या, हरिप्रेमवर्धिनी, हरमोहिनी, हरमाता, हरप्रज्ञा, हुकारी, हरपावनी, हेरम्बजननी, हट्टमध्यस्थल-निवासिनी, हिमकुन्देन्दुधवला, हिमपर्वतवासिनी ॥ ९१-९४ ॥

होतृस्था हरहाला च हेलातीता अहर्गणा ।
अहङ्कारा हेतुगर्ता हेतुस्था हितकारिणी ॥ ९५ ॥
हतभाग्यनिहन्त्री च हतासद्बुद्धिजीविका ।
हेतुप्रिया महारात्री अहोराख्या हरोद्गमा ॥ ९६ ॥
अर्हणादिप्रिया चार्हा हाहाकारनिनादिनी ।
हनुमत्कल्पसंस्थाना हनुमत्सिद्धिदायिनी ॥ ९७ ॥
हलाहलप्रियाघोरा महाभीमा हलायुधा ।
हसौः बीजस्वरूपा च हसौं प्रेताख्यजापिनी ॥ ९८ ॥

होतृस्था, हरहाला, हेलातीता, उहर्गणा, अहङ्कारा, हेतुगर्ता, हेतुस्था, हितकारिणी, हतभाग्यनिहन्त्री, हता, सदबुद्धिजीविका, हेतुप्रिया, महारात्री, अहोराख्या, हरोद्मभा, अर्हणादि-प्रिया, अर्हा, हाहाकारनिनादिनी, हनुमत्कल्पसस्थाना, हनुमत्सिद्धिदायिनी, हलाहलप्रिया, अघोरा, महाभीमा, हलायुधा, हसौःबीजस्वरूपा, हसौंप्रेताख्यजापिनी ॥ ९५-९८ ॥

विमर्श—हाहाकारनिनादिनी—हाहाकारं निनादयति तच्छीला, णिनिप्रत्ययान्तेन सहोपपदसमासः, ङीप्प्रत्ययः स्त्रीत्वद्योतकः ।

आह्लादिनी इहानन्दा अर्घ्यक्रान्ता हरार्चना ।
हरभीतिहराहःका बीजहःकामहक्षरा ॥ ९९ ॥
हेरम्बयोगसिद्धिस्था हेरम्बादिसुतप्रिया ।
हननाख्या हेतुनाम्नी हठात् सिद्धिप्रयोगदा ॥ १०० ॥
उमा महेश्वरी आद्या अनन्तानन्तशक्तिदा ।
आधारार्हसुरक्षा च ईश्वरी उग्रतारिणी ॥ १०१ ॥
उषेश्वरी उत्तमा च ऊर्ध्वपद्मविभेदिनी ।
ऋद्धिसिद्धिप्रदा क्षुल्लाकाशबीजसुसिद्धिदा ॥ १०२ ॥
तृतकस्थातृतकस्था तृस्वराखर्वबीजगा ।
एरण्डपुष्पहोमाढ्या ऐश्वर्यदानतत्परा ॥ १०३ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आह्लादिनी, इहानन्दा, अर्घ्यक्रान्ता, हरार्चना, हरभीतिहराहःका, बीजहः, कामहक्षरा, हेरम्बयोगसिद्धिस्था, हेरम्बादि, सुतप्रिया, हननाख्या, हेतु, नाम्नी, हठात्सिद्धिप्रयोगपदा, उमा, महेश्वरी, आद्या, अनन्ता, अनन्तशक्तिदा, आधारार्ह, सुरक्षा, ईश्वरी, उग्रतारिणी, उषेश्वरी, उत्तमा, ऊर्ध्वपद्मविभेदिनी, ऋद्धि सिद्धि प्रदा, क्षुल्ला, आकाशबीज, सुसिद्धिदा, तृतकस्था, अतृतकस्था, तृस्वरा, खर्वबीजगा, एरण्डपुष्पहोमाढ्या, ऐश्वर्यदानतत्परा ॥ ९९-१०३ ॥

विमर्श—आधारार्हसुरक्षा—आधारार्हाणां सुरक्षा । षष्ठीसमासे साधुता । **ऊर्ध्वपद्मविभेदिनी**—ऊर्ध्वपद्मानि विभेदयति तच्छीला । उपपदसममासेन साधुता । **ऐश्वर्यदानतत्परा**—ऐश्वर्यदाने तत्परा, तादृशी भगवती जगदम्बिका ।

ओड्रपुष्पप्रिया ॐकाराक्षरा औषधप्रिया ।
अर्वणासारः अंशाख्या अःस्था च कपिला कला ॥ १०४ ॥
कैलासस्था कामधेनुः खर्वा खेटकधारिणी ।
खरपुष्पप्रिया खड्गधारिणी खरगामिनी ॥ १०५ ॥
गभीरा गीतगायत्री गुर्वा गुरुतरा गया ।
घनकोटिनादकरी घर्घरा घोरनादिनी ॥ १०६ ॥

ओड्रपुष्पप्रिया, ॐकाराक्षरा, औषधप्रिया, अवर्णासार, अंशाख्या, अःस्था, कपिला, कला, कैलासस्था, कामधेनु, खर्वा, खेटकधारिणी, खरपुष्पप्रिया, खड्गधारिणी, खरगामिनी, गभीरा, गीतगायत्री, गुर्वा, गुरुतरा, गया, घनकोटिनादङ्करी, घर्घरा, घोरनादिनी ॥ १०४-१०६ ॥

घनच्छाया चारुवर्णा चण्डिका चारुहासिनी ।
चारुचन्द्रमुखी चारुचित्तभावार्थगामिनी ॥ १०७ ॥
छत्राकिनी छलच्छिन्ना छागमांसविनोदिनी ।
जयदा जीवी जन्या च जीमूतैरुपशोभिता ॥ १०८ ॥
जयित्री जयमुण्डाली झङ्कारी झञ्जनादिका ।
टङ्कारधारिणी टङ्कबाणकार्मुकधारिणी ॥ १०९ ॥
ठकुराणी ठठङ्कारी डामरेशी च डिण्डिमा ।
ढक्कानादप्रिया ढक्का तवमाला तलातला ॥ ११० ॥
तिमिरा तारिणी तारा तरुणा तालसिद्धिदा ।
तृप्ता च तैजसी चैव तुलनातलवासिनी ॥ १११ ॥

घनच्छाया, चारुवर्णा, चण्डिका, चारुहासिनी, चारुचन्द्रमुखी, चारुचित्त, भावार्थ, गामिनी, छत्राकिनी, छलच्छिन्ना, छागमांसविनोदिनी, जयदा, जीवी, जन्या, जीमूतैरूपशोभिता, जायित्री, जयमुण्डाली, झङ्कारी, झञ्जनादिका, टङ्कारधारिणी, टङ्कबाणकार्मुकधारिणी, ठकुराणी, ठठकांरी, डामरेशी, डिण्डिमा, ढक्कानादप्रिया, ढक्का, तव, माला, तलातला, तिमिरा, तारिणी, तारा, तरुणा, तालसिद्धिदा, तृप्ता, तैजसी, तुलना, तलवासिनी ॥ १०७-१११ ॥

तोषणा तौलिनी तैलगन्धामोदितदिङ्मुखी ।
स्थूलप्रिया थकाराद्या स्थितिरूपा च संस्थिरा ॥ ११२ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दक्षिणदेहनादाक्षा दक्षपत्नी च दक्षजा ।
दारिद्र्यदोषहन्त्री च दारुणास्त्रविभञ्जिनी ॥ ११३ ॥
दंष्ट्राकरालवदनी दीर्घमात्रादलान्विता ।
देवमाता देवसेना देवपूज्या दयादशा ॥ ११४ ॥
दीक्षादानप्रदा दैन्यहन्त्री दीर्घसुकुन्तला ।
दनुजेन्द्रनिहन्त्री च दनुजारिविमर्दिनी ॥ ११५ ॥

तोषणा, तौलिनी, तैलगन्धामोदितादिङ्मुखी, स्थूलप्रिया, थकारा, आद्या, स्थितिरूपा, संस्थिरा, दक्षिणदेहनादा, अक्षा, दक्षपत्नी, दक्षजा, दारिद्र्यदोषहन्त्री, दारुणास्त्रविभञ्जिनी, दंष्ट्राकरालवदनी, दीर्घमात्रादलान्विता, देवमाता, देवसेना, देवपूज्या, दया, दशा, दीक्षा, दानप्रदा, दैन्यहन्त्री, दीर्घसुकुन्तला, दनुजेन्द्रनिहन्त्री, दनुजारी, विमर्दिनी ॥ ११२-११५ ॥

विमर्श—दारुणास्त्रविभञ्जिनी—दारुणानि यानि अस्त्राणि, तानि विभनक्ति तच्छीला। एतावता आधुनिकानां परमाणुबमाख्यानाममस्त्राणां बिनाशेऽपि दक्षा । **दंष्ट्राकरालवदनी**—दंष्ट्राभिः करालं भयङ्करं वदनं यस्याः सा । स्वाङ्गाच्चोपसर्जनादसेयोगोपधादिति ङीप् ।

देशपूज्या दायदात्री दशनास्त्रप्रधारिणी ।
दासरक्षा देशरक्षा दिगम्बरदिगम्बरी ॥ ११६ ॥
दिक्प्रभापाटलव्याप्ता दरीगृहनिवासिनी ।
दर्शनस्था दार्शनिका दत्तभार्या च दुर्गहा ॥ ११७ ॥
दुर्गा दीर्घमुखी दुःखनाशिनी दिविसंस्थिता ।
धन्या धनप्रदा धारा धरणी धारिणी धरा ॥ ११८ ॥

देशपूज्या, दायदात्री, दशना, अस्त्र, प्रधारिणी, दासरक्षा, देशरक्षा, दिगम्बर, दिगम्बरी, दिक्प्रभापाटलव्याप्ता, दरीगृहनिवासिनी, दर्शनस्था, दार्शनिका, दत्तभार्या, दुर्गहा, दुर्गा, दीर्घमुखी, दुःखनाशिनी, दिविसंस्थिता, धन्या, धनप्रदाधारा, धरणी, धारिणी, धरा ॥ ११६-११८ ॥

विमर्श—दशनास्त्रप्रधारिणी—दशनान्येव दन्ता एव अस्त्राणि, तानि प्रकर्षेण धरति, तच्छीला ।

धृतसौन्दर्यवदना धनदा धान्यवर्धिनी ।
ध्यानप्राप्ता ध्यानगम्या ध्यानज्ञानप्रकाशिनी ॥ ११९ ॥
ध्येया धीरपूजिता च धूमेशी च धुरन्धरा ।
धूमकेतुहरा धूमा ध्येया सर्वसुरेश्वरैः ॥ १२० ॥
धर्मार्थमोक्षदा धर्मचिन्ता धर्मप्रकाशिनी ।
धूलिरूपा च धवला धवलच्छत्रधारिणी ॥ १२१ ॥
धवलाम्बरधात्री च धवलासनसंस्थिता ।
धवला हिमालयधरा धरणी साधनक्रिया ॥ १२२ ॥

धृतसौन्दर्यवदना, धनदा, धान्यवर्धिनी, ध्यानव्याप्ता, ध्यानगम्या, ध्यानज्ञान प्रकाशिनी, ध्येया, धीरपूजिता, धूमेशी, धुरन्धरा, धूमकेतुहरा, धूमा, सर्वसुरेश्वरैः, ध्येया, धर्मार्थमोक्षदा,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धर्मचिन्ता, धर्मप्रकाशिनी, धूलिरूपा, धवला, धवलच्छत्रधारिणी, धवलाम्बरा, धात्री, धवलासन-संस्थिता, धवला, हिमालयधरा, धरणी, साधनक्रिया ॥ ११९-१२२ ॥

धवलेश्वरकन्या च धवलाध्वाधलामुखी ।
धीरकन्या धर्मकन्या ध्रुवसिद्धिप्रदायिनी ॥ १२३ ॥
ध्रुवानन्दा ध्रुवश्रद्धा ध्रुवसन्तोषवर्धिनी ।
नारिकेलजलस्नाता नारिकेलफलासना ॥ १२४ ॥
नारी नारायणीशाना नम्रपूजनसुप्रिया ।
नरदेवरता नित्यगणगन्धर्वपूजिता ॥ १२५ ॥
नरकविहारिणी चैव नरकान्तककारिणी ।
नरक्षेत्रकलादेवी नवकोशनिवासिनी ॥ १२६ ॥

धवलेश्वरकन्या, धवलाध्वा, धवलामुखी, धीरकन्या, धर्मकन्या, ध्रुवसिद्धि, प्रदायिनी, ध्रुवानन्दा, ध्रुवश्रद्धा, ध्रुवसन्तोषवर्द्धिनी, नारिकेलजलस्त्रता, नारिकेलफलाशना, नारी, नारायणी, ईशाना, नम्र, पूजन, सुप्रिया, नरदेवरता, नित्यगण, गन्धर्वपूजिता, नरक, विहारिणी, मरकान्तककारिणी, नरक्षेत्रकलादेवी, नवकोशनिवासिनी ॥ १२३-१२६ ॥

विमर्श—नित्यगणगन्धर्वपूजिता—नित्यं यथा स्यात्तथा गणेन गन्धर्वेश्च पूजिता, सम्मानिता । **नरकान्तककारिणी**—नरकस्य नरकासुरस्यान्तकं करोति तच्छीला, णिनिः कर्तरि, उपपदसमासः ।

नाक्षत्रविद्या नाक्षत्री नक्षत्रमण्डलस्थिता ।
नृपोत्राशकरी नारायणी नूपुरधारिणी ॥ १२७ ॥
नृत्यगीतप्रियानीता नवीना नामशायिनी ।
नौनूतनास्त्रधरा नित्या नवपुष्पवनस्थिता ॥ १२८ ॥
नवपुष्पप्रेमरता नवचम्पकमालिनी ।
नवरत्नहारमाला नवजाम्बूनदप्रभा ॥ १२९ ॥
नमस्कारप्रिया निन्दा वादनादप्रणाशिनी ।
पवनाक्षरमाला च पवनाक्षरमालिनी ॥ १३० ॥
परदोषभयङ्करा प्रचरद्रूपसंस्थिता ।
प्रस्फुटिताम्भोजमालाधारिणी प्रेमवासिनी ॥ १३१ ॥
परमानन्दसप्तानहरी पृथुनितम्बिनी ।
प्रवालमाला लोभाङ्गी पयोदा शतविग्रहा ॥ १३२ ॥
पयोदकरुणाकारा पारम्पर्याप्रसादिनी ।
प्रारम्भकर्मनिरता प्रारब्धभोगदायिनी ॥ १३३ ॥
प्रेमसिद्धिकरी प्रेमधारा गङ्गाम्बुशोभिनी ।
फेरुपुण्यवरानन्दा फेरुभोजनतोषणी ॥ १३४ ॥
फलदा फलवर्धा च फलाह्लादविनोदिनी ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

फणिमालाधरा देवी फणिहारादिशोभिनी ॥ १३५ ॥
फणा फणीकारमुखी फणस्था फणिमण्डला ।
सहस्रफणिसम्प्राप्ता फुल्लारविन्दमालिनी ॥ १३६ ॥
वासुकी व्यासपूज्या च वासुदेवार्चनप्रिया ।
वासुदेवकलावाच्या वाचकस्था वसुस्थिता ॥ १३७ ॥
वज्रदण्डधराधारा विरदा वादसाधिनी ।
वसन्तकालनिलया वसोर्द्धारा वसुन्धरा ॥ १३८ ॥
वेपमानरक्षका च वपूरक्षा वृषासना ।
विवस्वत्प्रेमकुशला विद्यावाद्यविनोदिनी ॥ १३९ ॥

नाक्षत्रविद्या, नाक्षत्री, नक्षत्रमण्डल, स्थिता, नृपोन्नाशकरी, नारायणी, नूपुर, धारिणी, नृत्यगीतप्रिया, नीता, नवीना, नामशायिनी, नौः, नूतनास्त्रधरा, नित्या, नवपुष्पवनस्थिता, नवपुष्पप्रेमरता, नवचम्पकमालिनी, नवरत्नहारमाला, नवजाम्बूनद्रप्रभा, नमस्कारप्रिया, निन्दा, वादनाद, प्रणाशिनी, पवनाक्षरमाला, पवनाक्षरमालिनी, परदोषभयङ्करा, प्रचरद्रूपसंस्थिता, प्रस्फुटिताम्भोजमालाधारिणी, प्रेमवासिनी, परमानन्द, सप्तानहरी, पृथुनितम्बिनी, प्रवालमाला, लोमाङ्गी, पयोद, शतविग्रहा, पयोदकरुणाकारा, पारम्पर्या, प्रसादिनी, प्रारम्भकर्मनिरता, प्रारब्ध-भोगदायिनी, प्रेमसिद्धिकरी, प्रेमधारा, गङ्गाम्बुशोभिनी, केरूपुण्यवरा, आनन्द, फेरूभोजन, तोषिणी, फलदा, फलवर्धा, फलाह्लादविनोदिनी, फणिमालाधरा, देवी, फणिहारादि, शोभिनी, फणा, फणीकारमुखी, फणस्था, फणिमण्डला, सहस्रफणिसंप्राप्ता, फुल्लारविन्द, मालिनी, वासुकी, व्यासपूज्या, वासुदेवार्चनप्रिया, वासुदेवकला, वाच्या, वाचकस्था, वसुस्थिता, वज्रदण्डधरा, आधारा, विरदा, वादसाधिनी, बसन्त, कालनिलया, वसोर्द्धारा, वसुन्धरा, वेपमानरक्षका, वपूरक्षा, वृषासना, विवस्वत्प्रेमकुशला, विद्यावाद्यविनोदिनी ॥ १२७-१३९ ॥

विमर्श—प्रारब्धभोगदायिनी—प्रारब्धा ये भोगाः, तान् ददाति, तच्छीला । **वासुदेव-कलावाच्या**—वासुदेवस्य भगवतः कलाः, ताभिर्वाच्या वाच्यमाना । **वज्रदण्डधराधारा**—वज्रदण्डं धरन्ति ये ते वज्रदण्डधराः। पचाद्यजन्तेन धराशब्देन समासः, तेषामाधारा आधारभूता।

विधिविद्याप्रकाशा च विधिसिद्धान्तदायिनी ।
विधिज्ञा वेदकुशला वेदवाक्यविवासिनी ॥ १४० ॥
बलदेवपूजिता च बालभावप्रपूजिता ।
बाला वसुमती वेद्या वृद्धमाता बुधप्रिया ॥ १४१ ॥
बृहस्पतिप्रिया वीरपूजिता बालचन्द्रिका ।
विग्रहज्ञानरक्षा च व्याघ्रचर्मधरावरा ॥ १४२ ॥
व्यथाबोधापहन्त्री च विसर्गमण्डलस्थिता ।
बाणभूषापूजिता वनमाला विहायसी ॥ १४३ ॥
वामदेवप्रिया वामपूजाजापपरायणा ।
भद्रा भ्रमरवर्णा च भ्रामरी भ्रमरप्रभा ॥ १४४ ॥

विधिविद्या, प्रकाशा, विधि, सिद्धान्तदायिनी, विधिज्ञा, वेद, कुशला, वेद, वाक्य,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विवासिनी, बलदेव, पूजिता, बालभावप्रपूजिता, वाला, वसुमती, वेद्या, वृद्धमाता, बुधप्रिया, वृहस्पतिप्रिया, वीरपूजिता, बालचन्द्रिका, विग्रहज्ञानरक्षा, व्याघ्रचर्मधरा, अवरा, व्यथाबोधापहन्त्री, विसर्ग, मण्डल, स्थिता, वाणभूषा, पूजिता, बनमाला, विहायसी, वामदेवप्रिया, वामपूजा, जाप, परायणा, भद्रा, भ्रमरवर्णा, भ्रामरी, भ्रमरप्रभा ॥ १४०-१४४ ॥

विमर्श—बालभावप्रपूजिता—बालभावेन प्रपूजिता । एतेन भगवत्यां बालभावोऽपि महनीयोऽस्ति ।

भालचन्द्रधरा भीमा भीमनेत्राभवाभवा ।
भीममुखी भीमदेहा भीमविक्रमकारिणी ॥ १४५ ॥
भीमश्रद्धा भीमपूज्या भीमाकारातिसुन्दरी ।
भीमसङ्ग्रामजयदा भीमाद्या भीमभैरवी ॥ १४६ ॥
भैरवेशी भैरवी च सदानन्दादिभैरवी ।
सदानन्दभैरवी च भैरवेन्द्रप्रियङ्करी ॥ १४७ ॥
भल्लास्त्रधारिणी भैमी भृगुवंशप्रकाशिनी ।
भर्गपत्नी भर्गमाता भङ्गस्था भङ्गभक्षिणी ॥ १४८ ॥
भक्षप्रिया भक्षरता भृकुण्डा भावभैरवी ।
भावदा भवदा भावप्रभावा भावनाशिनी ॥ १४९ ॥
भालसिन्दूरतिलका भाललोकसुकुण्डला ।
भालमालालकाशोभा भासयन्ती भवार्णवा ॥ १५० ॥
भवभीतिहरा भालचन्द्रमण्डलवासिनी ।
मद्भ्रमरनेत्राब्जसुन्दरी भीमसुन्दरी ॥ १५१ ॥
भजनप्रियरूपा च भावभोजनसिद्धिदा ।
भ्रूचन्द्रनिरता बिन्दुचक्रभ्रूपद्मभेदिनी ॥ १५२ ॥

भालचन्द्रधरा, भीमा, भीमनेत्र, भवा, अभवा, भीममुखी, भीमदेहा, भीमविक्रमकारिणी, भीमश्रद्धा, भीमपूज्या, भीमाकारा, अतिसुन्दरी, भीमसंग्रामजयदा, भीमाद्या, भीम, भैरवी, भैरवेशी, भैरवी, सदानन्दा, आदि, भैरवी, सदानन्द, भैरवी, भैरवेन्द्र, प्रियङ्करी, भल्लास्त्रधारिणी, भैमी, भृगुवंश, प्रकाशिनी, भर्गपत्नी, भर्गमाता, भङ्गस्था, भङ्गभक्षिणी, भक्षप्रिया, भक्षरता, भृकुण्डा, भावभैरवी, भावदा, भवदा, भावप्रभावा, भावनाशिनी, भालसिन्दूर, तिलका, भाललोक, सुकुण्डला, भाल, माला, लालक, शोभा, भासयन्ती, भवार्णवा, भवभीतिहरा, भालचन्द्रमण्डलवासिनी, भ्रमद्भ्रमरनेत्र, अब्जसुन्दरी, भीमसुन्दरी, भजन, प्रियरूपा, भावभोजन, सिद्धिदा, भ्रूचन्द्रनिरता, बिन्दुचक्र, भ्रूपद्मभेदिनी ॥ १४५-१५२ ॥

विमर्श—भीमभैरवी—भीमलोचनेति पाठान्तरमप्युल्लिखितममस्ति । **भङ्गभक्षिणी**—भङ्गस्य भङ्गपत्रस्य भक्षिणी । एतेन विजयापानमपि भगवत्या इष्टमस्ति इति व्यज्यते । **भावनाशिनी**—भावं नाशयति या सा, अत्र भावपदं कुत्सितभावबोधकमिति ज्ञेयम् । **भालचन्द्रमण्डलवासिनी**—भाले चन्द्रो यस्य स भालचन्द्रः शिवः, तस्य मण्डलं समाजस्तत्र वसति या सा ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भवपाशहरा भीमभावकन्दनिवासिनी ।
मनोयोगसिद्धिदात्री मानसी मनसो मही ॥ १५३ ॥
महती मीनभक्षा च मीनचर्वणतत्परा ।
मीनावतारनिरता मांसचर्वणतत्परा ॥ १५४ ॥

भवपाशहरा, भीमभावा, कन्दनिवासिनी, मनोयोगसिद्धिदात्री, मानसी, मनसोमही, महती, मीनभक्षा, मीनचर्वणतत्परा, मीनावतारनिरता, मांसचर्वण, तत्परा ॥ १५३-१५४ ॥

मांसप्रिया मांससिद्धा सिद्धमांसविनोदिनी ।
माया महावीरपूज्या मधुप्रेमदिगम्बरी ॥ १५५ ॥
माधवी मदिरामध्या मधुमांसनिषेविता ।
मीनमुद्राभक्षिणी च मीनमुद्राप्रतर्पिणी ॥ १५६ ॥
मुद्रामैथुनसंतृप्ता मैथुनानन्दवर्धिनी ।
मैथुनज्ञानमोक्षस्था महामहिषमर्दिनी ॥ १५७ ॥
यज्ञश्रद्धा योगसिद्धा यत्नी यत्नप्रकाशिनी ।
यशोदा यशसि प्रीता यौवनस्था यमापहा ॥ १५८ ॥
रासश्रद्धातुरारामरमणीरमणप्रिया ।
राज्यदा रजनीराजवल्लभा रामसुन्दरी ॥ १५९ ॥
रतिश्चारतिरूपा च रुद्रलोकसरस्वती ।
रुद्राणी रणचामुण्डा रघुवंशप्रकाशिनी ॥ १६० ॥

मांसप्रिया, मांससिद्धा, सिद्धमांसविनोदिनी, माया, महावीरपूज्या, मधुप्रेमा, दिगम्बरी, माधवी, मदिरामध्या, मधुमांस, निषेविता, मीनमुद्रा, भक्षिणी, मीनमुद्रा, प्रतर्पिणी, मुद्रामैथुन, संतृप्ता, मैथुना, नन्दवर्धिनी, मैथुनज्ञान, मोक्षस्था, महामहिषमर्दिनी, यज्ञश्रद्धा, योगसिद्धा, यत्नी, यत्न, प्रकाशिनी, यशोदा, यशसिप्रीता, यौवनस्थायमा, रासश्रद्धा, आतुरा, रामरमणी, रमणप्रिया, राज्यदा, रजनी, राजवल्लभा, रामसुन्दरी, रतिरूपा, अरतिरूपा, रुद्र, लोकसरस्वती, रुद्रांणी, रणचामुण्डा, रघुवंशप्रकाशिनी ॥ १५५-१६० ॥

विमर्श—रजनीराजवल्लभा—रजन्यां राजते योऽसौ रजनीराजश्चन्द्रः, स वल्लभो यस्या सा ।

लक्ष्मीर्लीलावती लोका लावण्यकोटिसम्भवा ।
लोकातीता लक्षणाख्या लिङ्गधारा लवङ्गदा ॥ १६१ ॥
लवङ्गपुष्पनिरता लवङ्गतरुसंस्थिता ।
लेलिहाना लयकरी लीलादेहप्रकाशिनी ॥ १६२ ॥
लाक्षाशोभाधरा लङ्का रत्नमासवधारिणी ।
लक्षजापसिद्धिकरी लक्षमन्त्रप्रकाशिनी ॥ १६३ ॥
वशिनी वशकर्त्री च वश्यकर्मनिवासिनी ।
वेशावेश्या वेशवेश्या वंशिनी वंशवर्धिनी ॥ १६४ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वंशमाया वज्रशब्दमोहिनी शब्दरूपिणी ।
शिवा शिवमयी शिक्षा शशिचूडामणिप्रभा ॥ १६५ ॥
शवयुग्मभीतिदा च शवयुग्मभयानका ।
शवस्था शववक्षस्था शाब्दबोधप्रकाशिनी ॥ १६६ ॥
षट्पद्मभेदिनी षट्का षट्कोणयन्त्रमध्यगा ।
षट्चक्रसारदा सारा सारात्सारसरोरुहा ॥ १६७ ॥
समनादिनिहन्त्री च सिद्धिदा संशयापहा ।
संसारपूजिता धन्या सप्तमण्डलसाक्षिणी ॥ १६८ ॥
सुन्दरी सुन्दरप्रीता सुन्दरानन्दवर्धिनी ।
सुन्दरास्या सुनवस्त्री सौन्दर्यसिद्धिदायिनी ॥ १६९ ॥
त्रिसुन्दरी सर्वरी च सर्वा त्रिपुरसुन्दरी ।
श्यामला सर्वमाता च सख्यभावप्रिया स्वरा ॥ १७० ॥
साक्षात्कारस्थिता साक्षात्साक्षिणी सर्वसाक्षिणी ।
हाकिनी शाकिनीमाता शाकिनी काकिनीप्रिया ॥ १७१ ॥
हाकिनी लाकिनीमाता हाकिनी राकिणीप्रिया ।
हाकिनी डाकिनीमाता हरा कुण्डलिनी हया ॥ १७२ ॥

लक्ष्मीः, लीलावती, लोका, लावण्यकोटिसंभवा, लोकातीता, लक्षणाख्या, लिङ्गधारा, लवङ्गदा, लवङ्गपुष्पनिरता, लवङ्गतससंस्थिता, लेलिहाना, लयकरी, लीलादेह, प्रकाशिनी, लाक्षाशोभाधरा, लङ्का, रत्नम्, आसवधारिणी, लक्षजापसिद्धिकरी, लक्षमन्त्र प्रकाशिनी, वशिनी, वशकर्त्री, वश्यकर्म, निवासिनी, वेशा, वेश्या, वेशवेश्या, वंशिनी, वंशवर्धिनी, वंशमाया, वज्रशब्द, विमोहिनी, शब्दरूपिणी, शिवा, शिवमयी, शिक्षा, शशिचूडामणिप्रभा, शवयुग्मभीतिदा, शवयुग्मभयानका, शवस्था, शववक्षः, शाब्दबोध, प्रकाशिनी, षट्पद्म, भेदिनी, षट्का, षट्कोण, यन्त्र, मध्यगा, षट्चक्र, सारदा, सारा, सारात्सारसरोरूहा, समनादि-निहन्त्री, सिद्धिदा, संशयापहा, संसारपूजिता, धन्या, सप्तमण्डल, साक्षिणी, सुन्दरी, सुन्दर-प्रीता, सुन्दरानन्दवर्धिनी, सुन्दरास्या, सुनवस्त्री, सौन्दर्य, सिद्धिदायिनी, त्रिसुन्दरी, सर्वरो, सर्वा, त्रिपुरसुन्दरी, श्यामला, सर्वमाता, सख्यभावप्रिया, स्वरा, साक्षात्कारस्थिता, साक्षात्साक्षिणी, सर्वसाक्षिणी, हाकिनी, शाकिनी, माता, शाकिनी, काकिनी, प्रिया, हाकिनी, लाकिनीमाता, हाकिनी, राकिणीप्रिया, डाकिनी, डाकिनीमाता, हरा, कुण्डलिनी, हया ॥ १६१-१७२ ॥

विमर्श—लावण्यकोटिसम्भवा—लावण्यानि सौन्दर्याणि कोटौ सम्भवति या सा । परमातिशयलावण्यसम्पन्ना इति भावः । **वश्यकर्मनिवासिनी**—वशमर्हन्ति ये ते वश्याः, तेषां कर्मणि निवसति, तच्छीला । एतेन भक्तजनानां क्रियां सफलतया सम्पादयतीति ध्वनितम् । **त्रिसुन्दरी**—त्रिषु लोकेषु सुन्दरी, अथवा त्रिषु गुणेषु सुन्दरी इति भावः ।

हयस्था हयतेजःस्था हसौंबीजप्रकाशिनी ।
लवणाम्बुस्थिता लक्षग्रन्थिभेदनकारिणी ॥ १७३ ॥
लक्षकोटिभास्कराभा लक्षब्रह्माण्डकारिणी ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्षणदण्डपलाकारा क्षपाक्षोभविनाशिनी ॥ १७४ ॥
क्षेत्रपालादिवटुकगणेशयोगिनीप्रिया ।
क्षयरोगहरा क्षौणी क्षालनस्थाक्षरप्रिया ॥ १७५ ॥
क्षाद्यस्वरान्तसिद्धिस्था क्षादिकान्तप्रकाशिनी ।
क्षाराम्बुतिक्तनिकरा क्षितिदुःखविनाशिनी ॥ १७६ ॥
क्षुन्निवृत्तिः क्षणज्ञानी वल्लभा क्षणभङ्गुरा ।

हयुस्था, हयतेजः, स्थां, हसौं, बीजप्रकाशिनी, लवणाम्बुस्थिता, लक्षग्रन्थि, भेदन, कारिणी, लक्षकोटिभास्कराभा, लक्षब्रह्माण्ड, कारिणी, क्षण, दण्ड, पलाकारा, क्षपाक्षोभ-विनाशिनी, क्षेत्रपालदिव.- टुकगणेश, योगिनीप्रिया, क्षयरोगहरा, क्षौणी, क्षालनस्था, अक्षर, प्रिया, क्षाद्यस्वरान्त, सिद्धिस्था, क्षादिकान्त, प्रकाशिनी, क्षाराम्बुतिक्त, निकरा, क्षितिदुःख-विनाशिनी, क्षुन्निवृत्ति, क्षणज्ञानी, वल्लभा, क्षणभंगुरा ॥ १७३-१७७ ॥

विमर्श—लक्षब्रह्माण्डकारिणी—लक्षाणि लक्षसंख्याकानि अनेकानि इति यावत्, इयन्ति यानि ब्रह्माण्डानि, तानि करोति तच्छीला लक्षब्रह्माण्डकारिणी इति भावः।

इत्येतत् कथितं नाथ हाकिन्याः कुलशेखर ॥ १७७ ॥
सहस्रनामयोगाङ्गमष्टोत्तरशतान्वितम् ।
यः पठेन्नियतः श्रीमान् स योगी नात्र संशयः ॥ १७८ ॥

हे कुलशेखर ! मैंने हाकिनी के इतने नामों को कहा जिनका योग करने पर एक हजार आठ की संख्या होती है । जो नियम पूर्वक इस सहस्रनाम का पाठ करता है वह योगी है, इसमें संशय नहीं ॥ १७७-१७८ ॥

अस्य स्मरणमात्रेण वीरो योगेश्वरो भवेत् ।
अस्यापि च फलं वक्तुं कोटिवर्षशतैरपि ॥ १७९ ॥
शक्यते नापि सहसा संक्षेपात् शृणु सत्फलम् ।
आयुरारोग्यमाप्नोति विश्वासं श्रीगुरोः पदैः ॥ १८० ॥

साधक इसके स्मरण मात्र से वीर एवं योगेश्वर हो जाता है । इस सहस्रनाम का फल करोड़ों वर्षों में भी सहसा प्रगट करना संभव नहीं है । फिर भी, हे भैरव ! संक्षेप में इसे सुनिए । यदि श्री गुरु के चरण कमलों में विश्वास कर साधक इसका पाठ करे तो वह आयु तथा आरोग्य प्राप्त करता है ॥ १७९-१८० ॥

सारसिद्धिकरं पुण्यं पवित्रं पापनाशनम् ।
अत्यन्तदुःखदहनं सर्वसौभाग्यदायकम् ॥ १८१ ॥
पठनात् सर्वदा योगसिद्धिमाप्नोति योगिराट् ।
देहसिद्धिः काव्यसिद्धिर्ज्ञानसिद्धिर्भवेद् ध्रुवम् ॥ १८२ ॥

यह थोड़े में ही सिद्धि प्रदान करने वाला है । पुण्यदायक एवं पवित्र है । पापों को नष्ट करने वाला है, बड़ी से बड़ी विपत्ति को जला देता है किं बहुना सभी प्रकार के सौभाग्यों

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

को प्रदान करता है । योगिराज इसके पाठ करने से योगसिद्धि प्राप्त कर लेता है । निश्चय ही साधक को देहसिद्धि काव्यसिद्धि और ज्ञानसिद्धि प्राप्त हो जाती हैं ॥ १८१-१८२ ॥

विमर्श—अत्यन्तदुःखदहनं—अत्यन्तं यद् दुःखम्, तस्य दहनं दाहकम्। बाहुलकात् कर्तरि ल्युट्प्रत्ययः ।

वाचां सिद्धिः खड्गसिद्धिः खेंचरत्वमवाप्नुयात् ।
त्रैलोक्यवल्लभो योगी सर्वकामार्थसिद्धिभाक् ॥ १८३ ॥

इतना ही नहीं वाक्सिद्धि एवं खड्गसिद्धि प्राप्त होती है । खेचरता प्राप्त होती है । साधक त्रिलोकी का प्रिय तथा योगी बन जाता है । उसके सभी काम तथा अर्थ सिद्ध हो जाते हैं ॥ १८३ ॥

अप्रकाश्यं महारत्नं पठित्वा सिद्धिमाप्नुयात् ।
अस्य प्रपठनेनापि भ्रूपद्मे चित्तमर्पयन् ॥ १८४ ॥
यशोभाग्यमवाप्नोतिराजराजेश्वरो भवेत् ।
डाकिनीसिद्धिमाप्नोति कुण्डलीवशमानयेत् ॥ १८५ ॥

इस महारत्न को प्रकाशित नहीं करना चाहिए, क्योंकि इसके पाठ से सिद्धि प्राप्त होती है । भ्रूपद्म में चित्त को लगाकर इसके पाठ करने से साधक यश और भोग प्राप्त करता है । वह राजराजेश्वर हो जाता है, उसे डाकिनीयाँ सिद्ध हो जाती हैं तथा कुण्डली उसके वश में हो जाती है ॥ १८४-१८५ ॥

विमर्श—यशोभाग्यमवाप्नोति—यशश्च भाग्यं चेत्यनयोः समाहारद्वन्द्वे साधुता । अथवा यशसा सहितं भाग्यमिति मध्यमपदलोपिसमासः ।

ध्यानात्मा साधकेन्द्रश्च यतिर्भूत्वा शुभे दिने ।
ध्यानं कुर्यात् पद्ममध्यकर्णिकायां शिखालये ॥ १८६ ॥
भ्रूमध्ये चक्रसारे च ध्यात्वा ध्यात्वा पठेद् यदि ।
राकिणीसिद्धिमाप्नोति देवतादर्शनं लभेत् ॥ १८७ ॥

साधकेन्द्र किसी शुभ दिन में योग की दीक्षा लेकर ध्यानी बन कर शिखा में पद्म मध्य की कर्णिका में ध्यान लगावे । अथवा भ्रू के मध्य में अथवा चक्रसार में ध्यान लगाकर इस सहस्रनाम का पाठ करे तो राकिणी की सिद्धि प्राप्त कर लेता है । किं बहुना उसे देवताओं के दर्शन भी प्राप्त हो जाते हैं ॥ १८६-१८७ ॥

भाग्यसिद्धिमवाप्नोति नित्यं प्रपठनाद्यतः ।
साक्षात्सिद्धिमवाप्नोति शक्तियुक्तः पठेद्यदि ॥ १८८ ॥
हिरण्याक्षी लाकिनीशा वशमाप्नोति धैर्यवान् ।
रात्रिशेषे समुत्थाय पठेद् यदि शिवालये ॥ १८९ ॥

इसके नित्य पाठ करने से भाग्य एवं सिद्धि प्राप्त हो जाती है, यदि शक्ति से युक्त होकर इसका पाठ करे तो साक्षात् सिद्धि मिल जाती है । यदि रात्रि के अन्तिम प्रहर उठकर

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धैर्यवान् साधक शिवालय में इस स्तोत्र का पाठ करे तो हिरण्य के समान नेत्र वाली लाकिनी ईश्वरी स्वयं वश में हो जाती हैं ॥ १८८-१८९ ॥

पूजान्ते वा जपान्ते वा वारमेकं पठेद्यदि ।
वीरसिद्धिमवाप्नोति काकिनीवशमानयेत् ॥ १९० ॥
रात्रिं व्याप्य पठेद्यस्तु शुद्धचेता जितेन्द्रियः ।
शय्यायां चण्डिकागेहे मधुगेहेऽथवा पुनः ॥ १९१ ॥
शाकिनीसिद्धिमाप्नोति सर्वदेशे च सर्वदा ।

पूजा करने के उपरान्त अथवा जप करने के उपरान्त यदि इसका एक बार भी पाठ किया जाय तो साधक वीर सिद्धि प्राप्त कर लेता है तथा काकिनी को अपने वश में कर लेता है । जो जितेन्द्रिय साधक अपने चित्त को शुद्ध कर रात्रि पर्यन्त शय्या पर अथवा काली के मन्दिर में अथवा मद्यालय में पाठ करता है उसे सभी स्थानों में और सर्वदा शाकिनी की सिद्धि हो जाती है ॥ १९०-१९२ ॥

प्रभाते च समुत्थाय शुद्धात्मा पञ्चमे दिने ॥ १९२ ॥
अमावास्यासु विज्ञायां श्रवणायां विशेषतः ।
शुक्लपक्षे नवम्यां तु कृष्णपक्षेऽष्टमीदिने ॥ १९३ ॥
भार्यायुक्तः पठेद्यस्तु वशमाप्नोति भूपतिम् ।
एकाकी निर्जने देशे कामजेता महाबली ॥ १९४ ॥
प्रपठेद् रात्रिशेषे च स भवेत् साधकोत्तमः ।
कल्पद्रुमसमो दाता देवजेता न संशयः ॥ १९५ ॥

शुद्धात्मा साधक प्रातःकाल उठकर पञ्चमी तिथि को अथवा अमावस्या तिथि में विशेष कर श्रवण नक्षत्र में अथवा शुक्ल पक्ष में नवमीं के दिन अथवा कृष्णपक्ष की अष्टमी को स्त्री के साथ बैठकर इस स्तोत्र का पाठ करे तो वह राजा को भी अपने वश में कर लेता है । अकेले, निर्जन प्रदेश में, काम को जीत कर जो महाबली उत्तम साधक रात्रि शेष में इसका पाठ करता है, वह कल्पद्रुम के समान दानी एवं देवताओं को भी जीतने वाला हो जाता है इसमें संशय नहीं ॥ १९२-१९५ ॥

विमर्श—**कामजेता**—कामस्य कामदेवस्य जेता। अथवा कामस्य इच्छातत्त्वस्य जेता।

शिवशक्तिमध्यभागे यन्त्रं संस्थाप्य यत्नतः ।
प्रपठेत् साधकेन्द्रश्च सर्वज्ञाता स्थिराशयः ॥ १९६ ॥
एकान्तनिर्जने रम्ये तपःसिद्धिफलोदये ।
देशे स्थित्वा पठेद्यस्तु जीवन्मुक्ति फलं लभेत् ॥ १९७ ॥

शिव और शक्ति के मध्य भाग में जो साधक यन्त्र स्थापित कर इसका पाठ करता है वह सर्वज्ञाता बन जाता है और उसका मन स्थिर हो जाता है । किसी एकान्त निर्जन स्थान में अथवा जहाँ तपस्या की सिद्धि का फल प्राप्त हो ऐसे प्रदेश में रह कर जो पाठ करता है उसे जीवन्मुक्ति प्राप्त हो जाती है ॥ १९६-१९७ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विमर्श—शिवशक्तिमध्यभागे—शिवस्य शक्तेश्च मध्यभागे यन्त्रस्य संस्थापना कार्या। **तपःसिद्धिफलोदये**—तपसां सिद्धिः, तस्याः फलस्योदये, उत्पत्तिसमये।

अकालेऽपि सकालेऽपि पठित्वा सिद्धिमाप्नुयात्।
त्रिकालं यस्तु पठति प्रान्तरे वा चतुष्पथे ॥ १९८ ॥
योगिनीनां पतिः साक्षादायुर्वृद्धिर्दिने दिने।
वारमेकं पठेद्यस्तु मूर्खो वा पण्डितोऽपि वा ॥ १९९ ॥
वाचामीशो भवेत् क्षिप्रं योगयुक्तो भवेद् ध्रुवम्।
सम्भावितो भवेदेकं वारपाठेन भैरव ॥ २०० ॥

अकाल में अथवा सुकाल में इसके पढ़ने से साधक को सिद्धि मिल जाती है। जो प्रान्तर (छाया जलादि वर्जित दूर का रास्ता) में अथवा किसी चौराहे पर बैठकर तीनों काल इसका पाठ करता है वह योगिनियों का पति हो जाता है। उसके आयु की वृद्धि दिन प्रतिदिन होती रहती है। यदि मूर्ख अथवा पण्डित एक बार भी इसका पाठ करे तो वह साक्षात् वागीश बन जाता है, शीघ्र ही निश्चित रूप से योग में प्रवीण हो जाता है। हे भैरव! बहुत क्या कहें, इसके एक बार के पाठ से साधक प्रतिष्ठा प्राप्त कर लेता है ॥ १९८-२०० ॥

जित्वा कालमहामृत्युं देवीभक्तिमवाप्नुयात्।
पठित्वा वारमेकं तु यात्रां कुर्वन्ति ये जनाः ॥ २०१ ॥
देवीदर्शनसिद्धिञ्च प्राप्तो योगमवाप्नुयात्।
प्रत्येकं नाममुच्चार्य यो यागमनुसञ्चरेत् ॥ २०२ ॥
स भवेन्मम पुत्रो हि सर्वकामफलं लभेत्।
सर्वयज्ञफलं ज्ञानसिद्धिमाप्नोति योगिराट् ॥ २०३ ॥
भूतले भूभृतांनाथो महासिद्धो महाकविः।

वह कालरूप महामृत्यु के ऊपर विजय प्राप्त कर देवी की भक्ति प्राप्त करता है। जो लोग इसका एक बार पाठ कर यात्रा करते हैं, उन्हें देवी के दर्शन तथा कार्य में सिद्धि प्राप्त होती है योग प्राप्त हो जाता है। देवी के प्रत्येक नाम का उच्चारण कर जो यज्ञ (होम) प्रारम्भ करता है वह हमारा पुत्र हो जाता है। वह सभी कामनाओं का फल प्राप्त कर लेता है। सभी यज्ञों का फल तथा ज्ञान सिद्धि उसे मिल जाती है। वह योगियों का राजा बन जाता है और पृथ्वी में राजराजेश्वर महासिद्ध तथा महाकवि हो जाता है ॥ २०१-२०४ ॥

विमर्श—सर्वयज्ञफलं—सर्वेषां यज्ञानां फलानि च ज्ञानं च तेषां सिद्धिः।

कण्ठे शीर्षे दक्षभुजे पुरुषो धारयेद्यदि ॥ २०४ ॥
योषिद्वामभुजे धृत्वा सर्वसिद्धिमवाप्नुयात्।
गोरोचनाकुङ्कुमेन रक्तचन्दनकेन च ॥ २०५ ॥
यावकैर्वा महेशानि लिखेन्मन्त्रं समाहितः।
आद्या देवी परप्राणसिद्धिमाप्नोति निश्चितम् ॥ २०६ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यदि पुरुष इस सहस्रनाम को कण्ठ में, शिर में अथवा दाहिने हाथ में धारण करें, अथवा स्त्री अपनी बायीं भुजा में धारण करें तो समस्त सिद्धियाँ उसे प्राप्त हो जाती हैं। हे महेशानि ! गोरोचन, केशर, रक्त चन्दन से अथवा लाक्षा से इस मन्त्र को सावधानी से लिखे तो वह आद्या देवी की सिद्धि अथवा परप्राण की सिद्धि निश्चित रूप से प्राप्त कर लेता है ॥ २०४-२०६ ॥

लिङ्गं पीठे पूर्णिमायां कृष्णचतुर्दशीदिने ।
भौमवारे मध्यरात्रौ पठित्वा कामसिद्धिभाक् ॥ २०७ ॥
किं न सिद्ध्यति भूखण्डे अजरामर एव सः ।
रमणीकोटिभर्ता स्याद् वर्षद्वादशपाठतः ॥ २०८ ॥

किसी शिवलिङ्ग के स्थान पर पूर्णिमा अथवा कृष्ण पक्ष की चतुर्दशी तिथि युक्त भौमवार के दिन आधीरात को इसके पाठ करने से समस्त कामनायें पूर्ण हो जाती हैं। इसके पाठ करने से ऐसी कौन सी वस्तु है जिसकी सिद्धि न हो ? इसका पाठ करने वाला अजर और अमर हो जाता है। बहुत क्या कहें, १२ वर्ष पर्यन्त इसका पाठ करने वाला साधक करोड़ों स्त्रियों का पति बन जाता है ॥ २०७-२०८ ॥

विमर्श—कामसिद्धिभाक्—कामानां संकल्पानां सिद्धिः ।

अष्टवर्षप्रपाठेन कायप्रवेशसिद्धिभाक् ।
षड्वर्षमात्रपाठेन कुबेरसदृशो धनी ॥ २०९ ॥
वारैकमात्रपाठेन वर्षे वर्षे दिने दिने ।
स भवेत् पञ्चतत्त्वज्ञो तत्त्वज्ञानी न संशयः ॥ २१० ॥

आठ वर्ष तक निरन्तर पाठ करने वाला कायप्रवेश सिद्धि प्राप्त कर लेता है। मात्र छः वर्ष तक पाठ करने से कुबेर के सदृश धनी हो जाता है। प्रत्येक वर्ष में दिन प्रतिदिन एक बार मात्र पाठ करने से साधक पञ्च तत्त्वज्ञ हो जाता है और तत्त्व ज्ञानी होने में तो कोई संशय ही नहीं ॥ २०९-२१० ॥

विमर्श—कायप्रवेशसिद्धिभाक्—काये परशरीरे प्रवेशः, तस्य सिद्धिः ।

सर्वपापविनिर्मुक्तो वसेत् कल्पत्रयं भुवि ।
यः पठेत् सप्तधा नाथ सप्ताहनि दिने दिने ॥ २११ ॥
रात्रौ वारत्रयं धीमान् पठित्वा खेचरो भवेत् ।
अश्विनी शुक्लपक्षे च रोहिण्यसितपक्षके ॥ २१२ ॥
अष्टम्यां हि नवम्यां तु पठेद् वारत्रयं निशि ।
दिवसे वारमेकं तु स भवेत् पञ्चतत्त्ववित् ॥ २१३ ॥

हे नाथ! जो सात दिन पर्यन्त प्रतिदिन सात बार पाठ करता है वह सभी प्रकार के पापों से मुक्त हो जाता है तथा तीन कल्प पर्यन्त पृथ्वी में वास करता है। धीमान् साधक रात्रि के समय ३ बार पाठ करने से खेचरता प्राप्त कर लेता है। शुक्लपक्ष के अश्विनी नक्षत्र में एवं कृष्णपक्ष की रोहिणी नक्षत्र में एवं अष्टमी अथवा नवमी तिथि हो तो रात में तीन बार पाठ

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

करे तथा दिन में एक बार पाठ करे तो वह पञ्चतत्त्ववेत्ता तो हो ही जाता है ॥ २११-२१३ ॥

अनायासेन देवेश पञ्चामरादिसिद्धिभाक् ।
खेचरीमेलनं तस्य नित्यं भवति निश्चितम् ॥ २१४ ॥
स्वर्गे मर्त्ये च पाताले क्षणान्निःसरति ध्रुवम् ।
अग्निस्तम्भं जलस्तम्भं वातस्तम्भं करोति सः ॥ २१५ ॥

हे देवेश ! ऐसा साधक अनायास ही पञ्चामरा की सिद्धि का भाजन बन जाता है । किं बहुना, उसे निश्चित रूप से नित्य ही खेचरियों (अप्सराओं) का योग प्राप्त होता है । वह क्षण मात्र में स्वर्ग में, मृत्युलोक में तथा पाताल लोक में निश्चित रूप से गमन कर जाता है और वह अग्निस्तम्भन, जलस्तम्भन तथा वायु का स्तम्भन करने में समर्थ हो जाता है ॥ २१४-२१५ ॥

विमर्श—अग्निस्तम्भं—अग्नि-जल-वायूनां स्तम्भो निरोधः ।

पञ्चतत्त्वक्रमेणैव श्मशाने यस्तु सम्पठेत् ।
स भवेद् देवदेवेशः सिद्धान्तसारपण्डितः ॥ २१६ ॥
शूकरासवसंयुक्तः कुलद्रव्येण वा पुनः ।
बिल्वमूले पीठमूले विधानेन प्रपूजयेत् ।
परेण परमा देवी तुष्टा भवति सिद्धिदा ॥ २१७ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरण षट्चक्रप्रकाशे भैरवभैरवीसंवादे हाकिनीसहस्रनाम-विन्यासो नाम षडशीतितमः पटलः ॥ ८६ ॥

— ❖ —

जो पञ्चतत्त्व के क्रम से श्मशान में प्रथम दिन (आकाश) एक, द्वितीय दिन (वायु) दो, तृतीय दिन (तेज) तीन, चतुर्थ दिन (जल) चार, पञ्चम दिन (पृथ्वी) पाँच—इस क्रम से पाठ करता है, हे देवदेवेश ! वह सभी सिद्धान्त के सार का पण्डित हो जाता है । शूकरासव से संयुक्त साधक कुलद्रव्य से विल्वमूल में अथवा पीठ के मूल में विधानपूर्वक देवी का पूजन करे तो वह परमा देवी श्रेष्ठ पूजा से संतुष्ट हो कर सिद्धि प्रदान करती हैं ॥ २१६-२१७ ॥

विमर्श—सिद्धान्तसारपण्डितः—सिद्धोऽन्तो येषां ते सिद्धान्ताः, तेषां सारः, तत्र पण्डितः विज्ञः । सदसद्विवेकिनी बुद्धिः पण्डा, सा सञ्जाता यस्य सः पण्डितः ।

॥ श्रीरुद्रयामल के उत्तरतन्त्र में महातन्त्रोद्दीपन में सिद्ध मन्त्रप्रकरण में षट्चक्र प्रकाश में भैरवभैरवी संवाद में हाकिनीसहस्रनामविन्यास नामक छियासीवें पटल की डॉ० सुधाकर मालवीय कृत हिन्दी व्याख्या पूर्ण हुई ॥ ८६ ॥

— ❖ —

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ सप्ताशीतितमः पटलः

श्रीआनन्दभैरव उवाच

आनन्दभैरवि प्राणवल्लभे जगदीश्वरि ।
तव प्रसादवाक्येन श्रुतं नामसहस्रकम् ॥ १ ॥
हाकिन्याः कुलयोगिन्याः परमाद्भुतमङ्गलम् ।

श्री आनन्दभैरव ने कहा—हे आनन्दभैरवि ! हे प्राणवल्लभे ! हे जगदीश्वरि ! आपकी प्रसन्नता होने के कारण मैने कुल (शाक्त) योगिनी हाकिनी देवी का परम अद्भुत एवं महामङ्गलकारी सहस्रनाम सुना ॥ १-२ ॥

विमर्श—प्रसादवाक्येन—प्रसादः प्रसन्नता, तस्या वाक्यम्, प्रसादवचनमिति यावत् ।

इदानीं श्रोतुमिच्छामि परनाथस्य वाञ्छितम् ॥ २ ॥
सहस्रनामयोगाङ्गमष्टोत्तरसमाकुलम् ।
भ्रूपद्मभेदनार्थाय हाकिनीयोगसिद्धये ॥ ३ ॥
परनाथस्य योगाधिसिद्धये कुलभैरवि ।
कृपया वद मे प्रीता धर्मसिद्धिनिबन्धनात् ॥ ४ ॥

अब परनाथ को प्रिय लगने वाले एवं योग के अङ्गभूत १००८ नामों को सुनना चाहता हूँ । हे कुलभैरवि ! यदि आप मेरी धर्म सिद्धि के निबन्धन से प्रसन्न हों तो भ्रूमध्य में रहने वाले पद्म के भेदन के लिए हाकिनी योग की तथा परनाथ के योग की अधिक से अधिक रूप में सिद्धि के लिए, उन नामों को मेरे ऊपर कृपा करके कहिए ॥ २-४ ॥

मम देहरक्षणाय पातिव्रात्यप्रसिद्धये ।
महाविषहरे शीघ्रं वद योगिनि विस्तरात् ॥ ५ ॥
त्वत्प्रसादात् खेचराणां भैरवाणां हि योगिनाम् ।
नाथोऽहं जगतीखण्डे सुधाखण्डे वद प्रिये ॥ ६ ॥
पुनः पुनः स्तौमि नित्ये त्वमेव सुप्रिया भव ।

क्योंकि आप ही एक ऐसी हैं जिसने मेरे देह की रक्षा के लिए तथा अपने पतिव्रत्य की प्रसिद्धि के लिए मेरे हालाहल विष का हरण किया है । अतः हे महाविषहरे ! हे योगिनि ! आप उन नामों को शीघ्रतापूर्वक विस्तार से कहिए । हे प्रिये ! मैं आपकी कृपा से समस्त खेचरों का समस्त भैरवों का तथा समस्त योगीजनों का इस जगत् में स्वामी हूँ, अतः हे सुधाखण्डे ! हे प्रिये ! आप उन नामों को कहिए ॥ ५-७ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इसीलिए मैं बारम्बार प्रार्थना भी करता हूँ कि हे नित्ये ? आप ही सर्वदा हमारी प्रिया बनिए ॥ ७ ॥

श्रीआनन्दभैरवी उवाच

अथ योगेश्वर प्राणनाथ योगेन्द्र सिद्धिद ॥ ७ ॥
इदानीं कथये तेऽहं निजदेहसुसिद्धये ।
सर्वदा हि पठस्व त्वं कालमृत्युं वशं नय ॥ ८ ॥

श्रीआनन्दभैरवि ने कहा—हे योगेश्वर ! हे प्राणनाथ ! हे योगेन्द्र ! हे सिद्धिप्रदान करने वाले ! अब मैं इसी समय अपने शरीर की सिद्धि के लिए आप से उस सहस्रनाम को कहती हूँ । आप नित्य इसका पाठ कीजिए और काल में होने वाले मृत्यु को वश में कर लीजिए ॥ ७-८ ॥

कृपया तव नाथस्य स्नेहपाशनियन्त्रिता ।
तवाज्ञापालनार्थाय कालकूटविनाशनात् ॥ ९ ॥
भुक्तिमुक्तिक्रियाभक्तिसिद्धये तच्छृणु प्रभो ।
नित्यामृतखण्डरसोल्लासनामसहस्रकम् ॥ १० ॥
अष्टोत्तरं प्रयत्नेन योगिनां हि हिताय च ।
कथयामि सिद्धनामज्ञाननिर्णयसाधनम् ॥ ११ ॥

आपके जैसे नाथ के स्नेहपाश से नियन्त्रित हुई मैं आपकी कृपा से तथा आपके द्वारा कालकूट विष के विनाश किए जाने के कारण आपकी आज्ञा परिपालन के लिए तथा भुक्ति (भोग), मुक्ति एवं क्रिया तथा भक्ति की प्राप्ति के लिए, परनाथ के सहस्रनामों को कहती हूँ। हे प्रभो ! उसे सुनिए । यह अष्टोत्तर सहस्रनाम नित्य अमृतखण्ड के रस को उल्लसित (बढ़ाने) करने वाला है । ये सिद्धनाम ज्ञान निर्णय के साधन है, अतः योगियों के हित के लिए प्रयत्न पूर्वक इसे कहती हूँ ॥ ९-११ ॥

विमर्श—भुक्तिमुक्तिक्रियाभक्तिसिद्धये—भुक्तिश्च मुक्तिश्च क्रिया च भक्तिश्च तासां सिद्धिः, तस्यै। **सिद्धनामज्ञाननिर्णयसाधनम्**–सिद्धानां नामानि तेषां ज्ञानानि तन्निर्णयस्य साधनम्।

अस्य श्रीपरनाथमहादेवमात्मनोऽष्टोत्तरसहस्रनाम्नः स्तोत्रस्य सदाशिव ऋषिरुष्णिक्छन्दः श्रीपरनाथमहापुरुषपरमात्मा देवता ह्सौं बीजं सां शक्तिः प्रचण्डपरनाथमूलकीलकं चतुर्वर्गहाकिनी परयोगसिद्ध्यर्थे जपे विनियोगः

विनियोग का अर्थ—इस श्री परनाथ महादेव के अपने अष्टोत्तर सहस्रनाम वाले स्तोत्र के सदाशिव ऋषि हैं । उष्णिक् छन्द है । श्री परनाथ महापुरुष परमात्मा देवता हैं । ह्सौं बीज है । 'सां' शक्ति है । प्रचण्ड परनाथ मूल कीलक है । चतुर्वर्गा हाकिनी पर योग की सिद्धि के लिए इसके पाठ का विनियोग (निश्चय) करता हूँ ।

ॐ ह्सौ सां परेशश्च पराशक्तिः प्रियेश्वरः ।
शिवः परः पारिभद्रः परेशो निर्मलोऽद्वयः ॥ १२ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ॐ ह्सौं, सां, परेश, पराशक्ति, प्रियेश्वर, शिव, पर, पारिभद्र, परेश, निर्मल, अद्वय ॥ १२ ॥

स्वयंज्योतिरनाद्यन्तो निर्विकारः परात्परः ।
परमात्मा पराकाशोऽपरोऽप्यपराजितः ॥ १३ ॥
पार्वतीवल्लभः श्रीमान् दीनबन्धुस्त्रिलोचनः ।
योगात्मा योगदः सिद्धेश्वरो वीरः स्वरान्तकः ॥ १४ ॥
कपिलेशो गुरुर्गीतः स्वप्रियो गीतमोहनः ।
गभीरो गाधनस्थश्च गीतवाद्यप्रियङ्करः ॥ १५ ॥

स्वयंज्योतिरनाद्यन्त, निर्विकार, परात्पर, परमात्मा, पराकाशोऽपरोऽप्यपराजित, पार्वती-वल्लभ, श्रीमान्, दीनबन्धुस्त्रिलोचन, योगात्मा, योगद, सिद्धेश्वर, वीर, स्वरान्तक, कपिलेश, गुरुर्गीत, स्वप्रिय, गीतमोहन, गभीर, गाधनस्थ, गीतवाद्यप्रियङ्कर ॥ १३-१५ ॥

गुरुगीतापवित्रश्च गानसम्मानतोज्झितः ।
गयानाथो दत्तनाथो दत्तात्रेयपतिः शिवः ॥ १६ ॥
आकाशवाहको नीलो नीलाञ्जनशरीरधृक् ।
खगरूपी खेचरश्च गगनात्मा गभीरगः ॥ १७ ॥
गोकोटिदानकर्त्ता च गोकोटिदुग्धभोजनः ।
अभयावल्लभः श्रीमान् परमात्मा निराकृतिः ॥ १८ ॥
सङ्ख्याधारी निराकारी निराकरणवल्लभः ।
वाय्वाहारी वायुरूपी वायुगन्ता स्ववायुपाः ॥ १९ ॥
वातघ्नो वातसम्पत्तिर्वाताजीर्णो वसन्तवित् ।
वासनीशो व्यासनाथो नारदादिमुनीश्वरः ॥ २० ॥

गुरुगीतापवित्र, गानसम्मानतोज्झित, गयानाथ, दत्तनाथ, दत्तात्रेयपति, शिव, आकाश-वाहक, नील, नीलाञ्जनशरीरधृक्, खगरूपी, खेचर, गगनात्मा, गभीरग, गोकोटिदानकर्त्ता, गोकोटिदुग्धभोजन, अभयावल्लभ, श्रीमान्, परमात्मा, निराकृति, सङ्ख्याधारी, निराकारी, निराकरणवल्लभ, वाय्वाहारी, वायुरूपी, वायुगन्ता, स्ववायुपा, वातघ्न, वातसम्पत्ति, वाताजीर्ण, वसन्तवित्, वासनीश, व्यासनाथ, नारदादिमुनीश्वर ॥ १६-२० ॥

विमर्श—वातघ्नो—वातं हन्ति इति वातघ्नः, वातेति कर्मण्युपपदे हन्तेः टक्प्रत्ययः कर्तरि । गमहनेत्यकारलोपः।

नारायणप्रियानन्दो नारायणनिराकृतिः ।
नावमालो नावकर्ता नावसंज्ञानधारकः ॥ २१ ॥
जलाधारो ज्ञेय इन्द्रो निरिन्द्रियगुणोदयः ।
तेजोरूपी चण्डभीमो तेजोमालाधरः कुलः ॥ २२ ॥
कुलतेजा कुलानन्दः शोभाढ्यो वेदरश्मिधृक् ।
किरणात्मा कारणात्मा कल्पच्छायापतिः शशी ॥ २३ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परज्ञानी परानन्ददायको धर्मजित्प्रभुः ।
त्रिलोचनाम्भोजराजो दीर्घनेत्रो मनोहरः ॥ २४ ॥
चामुण्डेशः प्रचण्डेशः पारिभद्रेश्वरो हरः ।
गोपिता मोहितो गोप्ता गुप्तिस्थो गोपपूजितः ॥ २५ ॥

नारायणप्रियानन्द, नारायणनिराकृति, नावमाल, नावकर्ता, नावसंज्ञानधारक, जलाधार, ज्ञेय, इन्द्र, निरिन्द्रियगुणोदय, तेजोरूपी, चण्डभीम, तेजोमालाधर, कुल, कुलतेजा, कुलानन्द, शोभाढ्य, वेदरश्मिधृक्, किरणात्मा, कारणात्मा, कल्पच्छायापति, शशी, परज्ञानी, परानन्द-दायक, धर्मजित्प्रभु, त्रिलोचनाम्भोजराज, दीर्घनेत्र, मनोहर, चामुण्डेश, प्रचण्डेश, पारि-भद्रेश्वर, हर, गोपिता, मोहित, गोप्ता, गुप्तिस्थ, गोपपूजित ॥ २१-२५ ॥

विमर्श—नारायणप्रियानन्दो—नारायणस्य प्रिय आनन्दो यस्य सः । आपो नाराः, तेऽयनं यस्य स नारायणः । पूर्वपदात् संज्ञायामिति णत्वम् ।

गोपनाख्यो गोधनेशश्च चारुवक्त्रो दिगम्बरः ।
पञ्चाननः पञ्चमीशो विशालो गरुडेश्वरः ॥ २६ ॥
अर्धनारीश्वरेशश्च नायिकेशः कुलान्तकः ।
संहारविग्रहः प्रेतभूतकोटिपरायणः ॥ २७ ॥
अनन्तेशोऽप्यनन्तात्मा मणिचूडो विभावसुः ।
कालानलः कालरूपी वेदधर्मेश्वरः कविः ॥ २८ ॥
भर्गः स्मरहरः शम्भुः स्वयम्भुः पीतकुण्डलः ।
जायापतिर्याजजूको विलाशीशः शिखापतिः ॥ २९ ॥
पर्वतेशः पार्वणाख्यः क्षेत्रपालो महीश्वरः ।
वाराणसीपतिर्मान्यो धन्यो वृषसुवाहनः ॥ ३० ॥

गोपनाख्य, गोधनेश, चारुवक्त्र, दिगम्बर, पञ्चानन, पञ्चमीश, विशाल, गरुडेश्वर, अर्धनारीश्वरेश, नायिकेश, कुलान्तक, संहारविग्रह, प्रेतभूकोटिपरायण, अनन्तेश, अनन्तात्मा, मणिचूड, विभावसु, कालानल, कालरूपी, वेदधर्मेश्वर, कवि, भर्ग, स्मरहर, शम्भु, स्वयम्भु, पीतकुण्डल, जायापति, याजजूक, विलाशीश, शिखापति, पर्वतेश, पार्वणाख्य, क्षेत्रपाल, महीश्वर, वाराणसीपतिर्मान्य, धन्य, वृषसुवाहन ॥ २६-३० ॥

विमर्श—वाराणसीपतिर्मान्यो—वरं च तदनश्च वरानः पवित्रजलम्, तस्यादूरभवा नगरी वाराणसी । अदूरभवश्चेत्यणि, संज्ञायां णत्वे च साधुता ।

अमृतानन्दितो मुग्धो वनमालीश्वरः प्रियः ।
काशीपतिः प्राणपतिः कालकण्ठो महेश्वरः ॥ ३१ ॥
कम्बुकण्ठः क्रान्तिवर्गो वर्गात्मा जलशासनः ।
जलबुद्बुदवक्षश्च जलरेखामयः पृथुः ॥ ३२ ॥
पार्थिवेशो महीकर्ता पृथिवीपरिपालकः ।
भूमिस्थो भूमिपूज्यश्च क्षौणीवृन्दारकार्चितः ॥ ३३ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शूलपाणिः शक्तिहस्तो पद्मगर्भो हिरण्यभृत् ।
भूगर्तसंस्थितो योगी योगसम्भवविग्रहः ॥ ३४ ॥
पातालमूलकर्ता च पातालकुलपालकः ।
पातालनागमालाढ्यो दानकर्ता निराकुलः ॥ ३५ ॥

अमृतानन्दित, मुग्ध, वनमालीश्वर, प्रिय, काशीपति, प्राणपति, कालकण्ठ, महेश्वर, कम्बुकण्ठ, क्रान्तिवर्ग, वर्गात्मा, जलशासन, जलबुद्बुदवक्ष, जलरेखामय, पृथु, पार्थिवेश, महीकर्ता, पृथिवीपरिपालक, भूमिस्थ, भूमिपूज्य, क्षौणीवृन्दारकार्चित, शूलपाणि, शक्तिहस्त, पद्मगर्भो, हिरण्यभृत्, भूगर्तसंस्थित, योगी, योगसम्भवविग्रह, पातालमूलकर्ता, पातालकुल-पालक, पातालनागमालाढ्य, दानकर्ता, निराकुल ॥ ३१-३५ ॥

विमर्श—**पार्थिवेशो**—पृथिव्या ईश्वरः पार्थिवः, स चासौ ईशश्चेति पार्थिवेशः । अथवा पार्थिवानां पृथिवीपतीनामीश इति ।

भ्रूणहन्ता पापराधिनागकः कालनागकः ।
कपिलोग्रतपःप्रीतो लोकोपकारकृन्नृपः ॥ ३६ ॥
नृपार्चितो नृपार्थस्थो नृपार्थकोटिदायकः ।
पार्थिवार्चनसन्तुष्टो महावेगी परेश्वरः ॥ ३७ ॥
परापारापारतरो महातरुनिवासकः ।
तरुमूलस्थितो रुद्रो रुद्रनामफलोदयः ॥ ३८ ॥
रौद्रीशक्तिपतिः क्रोधी कोपनष्टो विरोचनः ।
असंख्येयाख्ययुक्तश्च परिणामविवर्जितः ॥ ३९ ॥
प्रतापी पवनाधारः प्रशंस्यः सर्वनिर्णयः ।
वेदजापी मन्त्रजापी देवता गुरुरीश्वरः ॥ ४० ॥

भ्रूणहन्ता, पापराधिनागक, कालनागक, कपिलोग्रतपप्रीत, लोकोपकारकृन्नृप, नृपार्चित, नृपार्थस्थ, नृपार्थकोटिदायक, पार्थिवार्चनसन्तुष्ट, महावेगी, परेश्वर, परापारापारतर, महातरु-निवासक, तरुमूलस्थित, रुद्र, रुद्रनामफलोदय, रौद्रीशक्तिपति, क्रोधी, कोपनष्ट, विरोचन, असंख्येयाख्ययुक्त, परिणामविवर्जित, प्रतापी, पवनाधार, प्रशंस्य, सर्वनिर्णय, वेदजापी, मन्त्रजापी, देवता, गुरुरीश्वर ॥ ३६-४० ॥

श्रीनाथो गुरुदेवश्च परनाथो गुरुः प्रभुः ।
परापरगुरुर्ज्ञानी तन्त्रज्ञोऽर्कशतप्रभाः ॥ ४१ ॥
तार्क्ष्यो गमनकारी च कालभावी निरञ्जनः ।
कालकूटानलः श्रोतः पुञ्जपानपरायणः ॥ ४२ ॥
परिवारगणाढ्यश्च पाराशाषिसुतस्थितः ।
स्थितिस्थापकरूपश्च रूपातीतोऽमलापतिः ॥ ४३ ॥
पतीशो भागुरिश्चैव कालश्चैव हरिस्तथा ।
वैष्णवः प्रेमसिन्धुश्च तरलो वातवित्तहा ॥ ४४ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भावस्वरूपो भगवान् निराकाशः सनातनः ।
अव्ययः पुरुषः साक्षी चाच्युतो मन्दराश्रयः ॥ ४५ ॥

श्रीनाथ, गुरुदेव, परनाथ, गुरु, प्रभु, परापरगुरुर्ज्ञानी, तन्त्रज्ञोऽर्कशतप्रभा, तीक्ष्ण, गमनकारी, कालभावी, निरञ्जन, कालकूटानल, श्रोत, पुञ्जपानपरायण, परिवारगणाढ्या, रूपातीतोऽमलापति, पतीश, भागुरिश्चैव, कालश्चैव, हरिस्तथा, वैष्णव, प्रेमसिन्धु, तरल, वातवित्तहा, भावस्वरूप, भगवान्, निराकाश, सनातन, अव्यय, पुरुष, साक्षी, चाच्युत, मन्दराश्रय ॥ ४१-४५ ॥

विमर्श—रूपातीतोऽमलापतिः—रूपमतीतोऽतिक्रान्त इति रूपातीतः द्वितीयाश्रिता-तीतपतितगतात्यस्तप्राप्तापन्नैरिति तत्पुरुषसमासः ।

मन्दराद्रिक्रियानन्दो वृन्दावनतनूद्भवः ।
वाच्यावाच्यस्वरूपश्च निर्मलाख्यो विवादहा ॥ ४६ ॥
वैद्यो वेदपरो ग्रन्थो वेदशास्त्रप्रकाशकः ।
स्मृतिमूलो वेदयुक्तिः प्रत्यक्षकुलदेवता ॥ ४७ ॥
परीक्षको वारणाख्यो महाशैलनिषेवितः ।
विरिञ्चप्रेमदाता च जन्योल्लासकरः प्रियः ॥ ४८ ॥
प्रयागधारी पयोऽर्थी गाङ्गागङ्गाधरः स्मरः ।
गङ्गाबुद्धिप्रियो देवो गङ्गास्नाननिषेवितः ॥ ४९ ॥
गङ्गासलिलसंस्थो हि गङ्गाप्रत्यक्षसाधकः ।
गिरो गङ्गामणिमरो मल्लिकामालधारकः ॥ ५० ॥

मन्दराद्रिक्रियानन्द, वृन्दावनतनूद्भव, वाच्यावाच्यस्वरूप, निर्मलाख्य, विवादहा, वैद्य, वेदपर, ग्रन्थ, वेदशास्त्रप्रकाशक, स्मृतिमूल, वेदयुक्ति, प्रत्यक्षकुलदेवता, परीक्षक, वारणाख्य, महाशैलनिषेवित, विरिञ्चप्रेमदाता, जन्योल्लासकर, प्रिय, प्रयागधारी, पयोऽर्थी, गाङ्गागङ्गाधर, स्मर, गङ्गाबुद्धिप्रिय, देव, गङ्गास्नाननिषेवित, गङ्गासलिलसंस्थ, हि, गङ्गाप्रत्यक्षसाधक, गिर, गङ्गामणिमर, मल्लिकामालधारक ॥ ४६-५० ॥

विमर्श—मन्दराद्रिक्रियानन्दो—मन्दरश्चासौ अद्रिश्चेति मन्दराद्रिः, मन्दराचलः, तदीयक्रियया क्षीरसागरे संचरणेन आनन्दो यस्य सः ।

मल्लिकागन्धसुप्रेमो मल्लिकापुष्पधारकः ।
महाद्रुमो महावीरो महाशूरो महोरगः ॥ ५१ ॥
महातुष्टिर्महापुष्टिर्महालक्ष्मीशुभङ्करः ।
महाश्रमी महाध्यानी महाचण्डेश्वरो महान् ॥ ५२ ॥
महादेवो महाह्लादो महाबुद्धिप्रकाशकः ।
महाभक्तो महाशक्तो महाधूर्तो महामतिः ॥ ५३ ॥
महाच्छत्रधरो धारोधरकोटिगतप्रभा ।
अद्वैतानन्दवादी च मुक्तो भङ्गप्रियोऽप्रियः ॥ ५४ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अतिगन्धश्चातिमात्रो निर्णितान्तः परन्तपः ।
निर्णितोऽनिलधारी च सूक्ष्मानिलनिरूपकः ॥ ५५ ॥

मल्लिकागन्धसुप्रेम, मल्लिकापुष्पधारक, महाद्रुम, महावीर, महाशूर, महोरग, महातुष्टिः, महापुष्टि, महालक्ष्मीशुभङ्कर, महाश्रमी, महाध्यानी, महाचण्डेश्वर, महान्, महादेव, महाह्लाद, महाबुद्धिप्रकाशक, महाभक्त, महाशक्त, महाधूर्तो, महामति, महाच्छत्रधरी, धारोधरकोटिगतप्रभा, अद्वैतानन्दवादी, मुक्त, भङ्गप्रियोऽप्रिय, अतिगन्धश्चातिमोत्र, निर्णितान्त, परन्तप, निर्णितोऽनिलधारी, सूक्ष्मानिलनिरूपक ॥ ५१-५५ ॥

महाभयङ्करो गोलो महाविवेकभूषणः ।
सुधानन्दः पीठसंस्थो हिङ्गुलादेश्वरः सुरः ॥ ५६ ॥
नरो नागपतिः क्रूरो भक्तानां कामदः प्रभुः ।
नागमालाधरो धर्मी नित्यकर्मी कुलीनकृत् ॥ ५७ ॥
शिशुपालेश्वरः कीर्तिविकारी लिङ्गधारकः ।
तृप्तानन्दो हृषीकेशेश्वरः पाञ्चालवल्लभः ॥ ५८ ॥
अक्रूरेशः पतिः प्रीतिवर्धको लोकवर्धकः ।
अतिपूज्यो वामदेवो दारुणो रतिसुन्दरः ॥ ५९ ॥
महाकालः प्रियाह्लादी विनोदी पञ्चचूडधृक् ।
आद्याशक्तिपतिः पान्तो विभाधारी प्रभाकरः ॥ ६० ॥

महाभयङ्कर, गोल, महाविवेकभूषण, सुधानन्द, पीठसंस्था, हिङ्गुलादेश्वर, सुर, नर, नागपति, क्रूर, भक्तानां, कामद, प्रभु, नागमालाधर, धर्मी, नित्यकर्मी, कुलीनकृत्, शिशुपालेश्वर, कीर्तिविकारी, लिङ्गधारक, तृप्तानन्द, हृषीकेशेश्वर, पाञ्चालवल्लभ, अक्रूरेश, पति, प्रीतिवर्धक, लोकवर्धक, अतिपूज्य, वामदेव, दारुण, रतिसुन्दर, महाकाल, प्रियाह्लादी, विनोदी, पञ्चचूडधृक्, आद्याशक्तिपति, पान्त, विभाधारी, प्रभाकर ॥ ५६-६० ॥

विमर्श—महाविवेकभूषण—महान् विवेकः स एव भूषणं यस्य स इत्यर्थः । **कीर्तिविकारी**—कीर्ति विकिरति तच्छीलः, कीर्तिविक्षेपेण शोभते योऽसौ । णिनिः ताच्छील्ये कर्मण्युपपदे सति ।

अनायासगतिर्बुद्धिप्रफुल्लो नन्दिपूजितः ।
शिलामूर्तिस्थितो रत्नमालामण्डितविग्रहः ॥ ६१ ॥
बुधश्रीदो बुधानन्दो विबुधो बोधवर्धनः ।
अघोरः कालहर्ता च निष्कलङ्को निराश्रयः ॥ ६२ ॥
पीठशक्तिपतिः प्रेमधारको मोहकारकः ।
असमो विसमो भावोऽभावो भावो निरिन्द्रियः ॥ ६३ ॥
निरालोको बिलानन्दो बिलस्थो विषभुक्पतिः ।
दुर्गापतिर्दुर्गहर्ता दीर्घसिद्धान्तपूजितः ॥ ६४ ॥
सर्वो दुर्गपतिर्विप्रो विप्रपूजापरायणः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्राह्मणानन्दनिरतो ब्रह्मकर्मसमाधिवित् ॥ ६५ ॥

अनायासगतिर्बुद्धिप्रफुल्ल, नन्दिपूजित, शिलामूर्तिस्थित, रत्नमालामण्डितविग्रह, बुधश्रीद, बुधानन्द, विबुध, बोधवर्धन, अघोर, कालहर्ता, निष्कलङ्क, निराश्रय, पीठशक्तिपति, प्रेमधारक, मोहकारक, असम, विसम, भावोऽभाव, भाव, निरिन्द्रिय, निरालोक, बिलानन्द, बिलस्थ, विषभूक्पति, दुर्गापतिर्दुर्गहर्ता, दीर्घसिद्धान्तपूजित, सर्वो, दुर्गपतिर्विप्र, विप्रपूजापरायण, ब्राह्मणानन्दनिरत, ब्रह्मकर्मसमाधिवित् ॥ ६१-६५ ॥

विश्वात्मा विश्वभर्ता च विश्वविज्ञानपूरकः ।
विश्वान्तःकरणस्थश्च विश्वसंज्ञाप्रतिष्ठितः ॥ ६६ ॥
विश्वाधारो विश्वपूज्यो विश्वस्थोऽर्चित इन्द्रहा ।
अलाबुभक्षणः क्षान्तिरक्षो रक्षनिवारणः ॥ ६७ ॥
तितिक्षारहितो हूतिः पुरुहूतप्रियङ्करः ।
पुरुषः पुरुषश्रेष्ठो विलालस्थः कुलालहा ॥ ६८ ॥
कुटिलस्थो विधिप्राणो विषयानन्दपारगः ।
ब्रह्मज्ञानप्रदो ब्रह्मज्ञानी ब्रह्मगुणान्तरः ॥ ६९ ॥
पालकेशो विराजश्च वज्रदण्डो महास्त्रधृक् ।
सर्वास्त्ररक्षकः श्रीदो विधिबुद्धिप्रपूरणः ॥ ७० ॥

विश्वात्मा, विश्वभर्ता, विश्वविज्ञानपूरक, विश्वान्त, करणस्थ, विश्वसंज्ञाप्रतिष्ठित, विश्वाधार, विश्वपूज्य, विश्वस्थोऽर्चित, इन्द्रहा, अलाबुभक्षण, क्षान्तिरक्ष, रक्षनिवारण, तितिक्षारहित, हूति, पुरुहूतप्रियङ्कर, पुरुष, पुरुषश्रेष्ठ, विलालस्थ, कुलालहा, कुटिलस्थ, विधिप्राण, विषयानन्दपारग, ब्रह्मज्ञानप्रद, ब्रह्मज्ञानी, ब्रह्मगुणान्तर, पालकेश, विराज, वज्रदण्ड, महास्त्रधृक्, सर्वास्त्ररक्षक, श्रीद, विधिबुद्धिप्रपूरण ॥ ६६-७० ॥

विमर्श—**पुरुहूतप्रियङ्करः**—पुरुहूतस्येन्द्रदेवस्य प्रियं करोति इति, अथवा पुरुहूतस्य प्रियङ्कर इत्येव । **विषयानन्दपारगः**—विषयजनितो य आनन्दः, तस्य पारं गत इति । गमेर्डप्रत्ययः।

आर्यापुत्रो देवराजपूजितो मुनिपूजितः ।
गन्धर्वपूजितः पूज्यो दानवज्ञाननाशनः ॥ ७१ ॥
अप्सरोगणपूज्यश्च मर्त्यलोकसुपूजितः ।
मृत्युजिद्रिपुजित् प्लक्षो मृत्युञ्जय इषुप्रियः ॥ ७२ ॥
त्रिबीजात्मा नीलकण्ठः क्षितीशो रोगनाशनः ।
जितारिः प्रेमसेव्यश्च भक्तिगम्यो निरुद्यमः ॥ ७३ ॥
निरीहो निरयाह्लादः कुमारो रिपुपूजितः ।
अजो देवात्मजो धर्मोऽसन्तो मन्दमासनः ॥ ७४ ॥
मन्दहासो मन्दनष्टो मन्दगन्धसुवासितः ।
माणिक्यहारनिलयो मुक्ताहारविभूषितः ॥ ७५ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आर्यापुत्र, देवराजपूजित, मुनिपूजित, गन्धर्वपूजित, पूज्य, दानवज्ञाननाशन, अप्सरोगणपूज्य, मर्त्यलोकसुपूजित, मृत्युजिद्रिपुजित्, प्लक्ष, मृत्युञ्जय, इषुप्रिय, त्रिबीजात्मा, नीलकण्ठ, क्षितीश, रोगनाशन, जितारि, प्रेमसेव्य, भक्तिगम्य, निरुद्यम, निरीह, निरयाह्लाद, कुमार, रिपुपूजित, अज, देवात्मज, धर्मोऽसन्त, मन्दमासन, मन्दहास, मन्दनष्ट, मन्दगन्धसुवासित, माणिक्यहारनिलय, मुक्ताहारविभूषित ॥ ७१-७५ ॥

मुक्तिदो भक्तिदश्चैव निर्वाणपददानदः ।
निर्विकल्पो मोदधारी निरातङ्को महाजनः ॥ ७६ ॥
मुक्ताविद्रुममालाढ्यो मुक्तादामलसत्कटिः ॥ ७७ ॥
रत्नेश्वरो धनेशश्च धनेशप्राणवल्लभः ।
धनजीवी कर्मजीवी संहारविग्रहोज्ज्वलः ॥ ७८ ॥
संङ्केतार्थज्ञानशून्यो महासङ्केतपण्डितः ।
सुपण्डितः क्षेमदाता भवदाता भवान्वयः ॥ ७९ ॥
किङ्करेशो विधाता च विधातुः प्रियवल्लभः ।
कर्ता हर्ता कारयिता योजनायोजनाश्रयः ॥ ८० ॥

मुक्तिद, भक्तिदश्चैव, निर्वाणपददानद, निर्विकल्प, मोदधारी, निरातङ्क, महाजन, मुक्ताविद्रुममालाढ्या, मुक्तादामलसत्कटि, रत्नेश्वर, धनेश, धनेशप्राणवल्लभ, धनजीवी, कर्मजीवी, संहारविग्रहोज्ज्वल, संङ्केतार्थज्ञानशून्य, महासङ्केतपण्डित, सुपण्डित, क्षेमदाता, भवदाता, भवान्वय, किङ्करेश, विधाता, विधातु, प्रियवल्लभ, कर्ता, हर्ता, कारयिता, योजनायोजनाश्रय ॥ ७६-८० ॥

विमर्श—योजनायोजनाश्रयः—योजनानामयोजनानां चेति योजनायोजनाः, तासामाश्रयः।

युक्तो योगपतिः श्रद्धापालको भूतशङ्करः ।
भूताध्यक्षो भूतनाथो भूतपालनतत्परः ॥ ८१ ॥
विभूतिदाता भूतिश्च महाभूतिविवर्धनः ।
महालक्ष्मीश्वरः कान्तः कमनीयः कलाधरः ॥ ८२ ॥
कमलाकान्त ईशानो यमोऽमरो मनोजवः ।
मनयोगी मानयोगी मानभङ्गो निरूपणः ॥ ८३ ॥
अव्यक्तानन्दनिरतो व्यक्ताव्यक्तनिरूपितः ।
आत्मारामपतिः कृष्णपालको रामपालकः ॥ ८४ ॥
लक्षणेशो लक्षभर्ता भावतीशः प्रजाभवः ।
भरताख्यो भारतश्च शत्रुघ्नो हनुमान् कपिः ॥ ८५ ॥

युक्त, योगपति, श्रद्धापालक, भूतशङ्कर, भूताध्यक्ष, भूतनाथ, भूतपालनतत्पर, विभूतिदाता, भूति, महाभूतिविवर्धन, महालक्ष्मीश्वर, कान्त, कमनीय, कलाधर, कमलाकान्त, ईशान, यम, अमर, मनोजव, मनयोगी, मानयोगी, मानभङ्ग, निरूपण, अव्यक्तानन्दनिरत, व्यक्ताव्यक्तनिरूपित, आत्मारामपति, कृष्णपालक, रामपालक, लक्षणेश, लक्षभर्ता, भावतीश, प्रजाभव, भरताख्य, भारत, शत्रुघ्नी, हनुमान्, कपि ॥ ८१-८५ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विमर्श—भूतशङ्करः—भूतानां भूतयोनिं प्राप्तानां शं कल्याणं करोति योऽसौ भूतशंकरः, शमित्युपपदे करोतेः 'कृञो हेतुताच्छील्यानुलोम्येषु' इति पाणिनीयसूत्रेण ताच्छील्ये द्योत्ये टप्रत्यये सति साधुता बोध्या ।

कपिचूडामणिः क्षेत्रपालेशो दिक्करान्तरः ।
दिशांपतिर्दिशीशश्च दिक्पालो हि दिगम्बरः ॥ ८६ ॥
अनन्तरत्नचूडाढ्यो नानारत्नासनस्थितः ।
संविदानन्दनिरतो विजयो विजयात्मजः ॥ ८७ ॥
जयाजयविचारश्च भावचूडामणीश्वरः ।
मुण्डमालाधरस्तन्त्री सारतन्त्रप्रचारकः ॥ ८८ ॥
संसाररक्षकः प्राणी पञ्चप्राणो महाशयः ।
गरुडध्वजपूज्यश्च गरुडध्वजविग्रहः ॥ ८९ ॥
गारुडीशो मन्त्रिणीशो मैत्रप्राणहिताकरः ।
सिद्धिमित्रो मित्रदेवो जगन्नाथो नरेश्वरः ॥ ९० ॥

कपिचूडामणि, क्षेत्रपालेश, दिक्करान्तर, दिशांपतिर्दिशीश, दिक्पाल, हि, दिगम्बर, अनन्तरत्नचूडाढ्य, नानारत्नासनस्थित, संविदानन्दनिरत, विजय, विजयात्मज, जयाजय-विचार, भावचूडामणीश्वर, मुण्डमालाधरस्तन्त्री, सारतन्त्रप्रचारक, संसाररक्षक, प्राणी, पञ्चप्राण, महाशय, गरुडध्वजपूज्य, गरुडध्वजविग्रह, गारुडीश, मन्त्रिणीश, मैत्रप्राणहिताकर, सिद्धिमित्र, मित्रदेव, जगन्नाथ, नरेश्वर ॥ ८६-९० ॥

नरेन्द्रेश्वरभावस्थो विद्याभावप्रचारवित् ।
कालाग्निरुद्रो भगवान् प्रचण्डेश्वरभूपतिः ॥ ९१ ॥
अलक्ष्मीहारकः क्रुद्धो रिपूणां क्षयकारकः ।
सदानन्दमयो वृद्धो धर्मसाक्षी सुधांशुधृक् ॥ ९२ ॥
साक्षरो रिपुवर्गस्थो दैत्यहा मुण्डधारकः ।
कपाली रुण्डमालाढ्यो महाबीजप्रकाशकः ॥ ९३ ॥
अजेयोग्रपतिः स्वाहावल्लभो हेतुवल्लभः ।
हेतुप्रियानन्ददाता हेतुबीजप्रकाशकः ॥ ९४ ॥
श्रुतिक्षिप्रमणिरतो ब्रह्मसूत्रप्रबोधकः ।
ब्रह्मानन्दो जयानन्दो विजयानन्द एव च ॥ ९५ ॥

नरेन्द्रेश्वरभावस्थ, विद्याभावप्रचारवित्, कालाग्निरुद्र, भगवान्, प्रचण्डेश्वरभूपति, अलक्ष्मीहारक, क्रुद्ध, रिपूणां, क्षयकारक, सदानन्दमय, वृद्ध, धर्मसाक्षी, सुधांशुधृक्, साक्षर, रिपुवर्गस्थ, दैत्यहा, मुण्डधारक, कपाली, रुण्डमालाढ्य, महाबीजप्रकाशक, अजेयोग्रपति, स्वाहावल्लभ, हेतुवल्लभ, हेतुप्रियानन्ददाता, हेतुबीजप्रकाशक, श्रुतिक्षिप्रमणिरत, ब्रह्मसूत्र-प्रबोधक, ब्रह्मानन्द, जयानन्द, विजयानन्द ॥ ९१-९५ ॥

विमर्श—अलक्ष्मीहारकः—न लक्ष्मीरलक्ष्मीर्दरिद्रादेवी तां हरति योऽसौ । अथवा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

